1) गादिच्छिन्नेति – गादिमत्यावच्छिन्नाक्षर पदम् । मयूरव्यसकेति समास । 2) लुप्तालुप्तेति – लुप्तविभक्तित्व तु एकार्थं इत्यनेन न तु अनतो लुगिति । 3) उत्तुङ्गस्तनेत्यत्र – 'बिम्बोष्ठी नरवरमुष्टिमेयमध्या सा नारी भवतु मन प्रहर्षिणीति' उत्तरार्धे पिङ्गलपाठे । इद प्रहर्षिणीछन्दो लुप्तविभक्तिकोदाहरणम् । 4) नमस्तुङ्गेति – अन्यस्मिन्नपि मूलस्तम्भे चमर स्यात् इति हर्षाख्यायिकायाम् । 5) पर्याप्त तप्तेत्यादि वृत्त सूर्यशतके । 6) कूजत्कोयष्टीति वृत्तमिद मेघकाव्ये । 7) हासो हस्ताग्रेति वृत्ते तुलिताद्रीन्द्रसारेति – तुलिताद्रिश्चासौ इन्द्रसारो यत्र तस्य द्विट् महिषासुर ।

---

१ अत्रेकारेण पूर्वस्य मकारस्य सन्धिर्न० E २ पदान्ज । ३ नतागीति F ४ AB add बिम्बोष्ठी नरवरमुष्टिमेयमध्या । सा बाला भवतु मन प्रहर्षिणीति ॥ इति पिङ्गलपाठ । E also adds the same two lines but reads पिंगी ते and drops इति० पाठ । ५ नमस्तुङ्ग A ६ मा in स्तम्भाय dropped in A, the whole line dropped in F ७ वैरञ्चा AE ८ चानना ABCD ९ पुरै० D १० पूरक० A

'गकारादौ' इति किम् ?, पदमध्येयतिः पादान्ते मा भूत् ।

यथा—

प्रणमत भवबन्धक्लेशनाशाय नारा-
यणचरणसरोजद्वन्द्वमानन्दहेतुम् ॥ १६.१४ ॥ इति ।

पूर्वोत्तरभागयोरेकाक्षरत्वे तु पदमध्ये यतिर्दुर्ज्ञेयति ।

यथा—

एतस्या गण्डतलममलं गाहते चन्द्रकक्षाम् ॥ १६.१५ ॥ इति ।

*

एतासां राजति सुमनसां दाम कण्ठावलम्बि ॥ १६.१६ ॥ इति ।

*

सुरासुरशिरोनिघृष्टचरणारविन्दः शिवः ॥ १६.१७ ॥ इति ।

*

पूर्वान्तवत्स्वरः सन्धौ क्वचिदेव परादिवत् ॥ ३ ॥ अ ।

योऽयं पूर्वपरयोरेकादेशः स्वरः सन्धौ विधीयते स क्वचित्पूर्वस्य अन्तवद् भवति क्वचित्परस्य आदिवत् । उभयादेशत्वात् । यथा पित्रोः पुत्रः पितुश्च मातुश्च भवति । तत्र पूर्वान्तवद्भावो यथा—

[1]स्यादस्थानोपगतयमुनासंगमेवाभिरामा ॥ १६.१८ ॥

*

[2]जम्भारातीभकुम्भोद्भवमिव दधतः ॥ १६.१९ ॥ इति ।

तथा—

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ॥ १६.२० ॥ इति ।

परादिवद्भावो यथा—

स्कन्धे विन्ध्यादिवुद्ध्या निकषति महिषस्याहितोऽसृग्हार्यात् ॥ १६.२१ ॥ इति ।

*

शूलं तूलं तु गाढं प्रहर हर हृषीकेशकेशोऽपि चक्र-
ध्वक्रेणाकारि किं ते० ॥ १६.२२ ॥ इति ।

अत्र हि स्वरस्य परादिवद्भावे व्यञ्जनमपि तद्भक्तत्वात् तदादिवद्भवति ।

'यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ।'

इति अन्तादिवद्भावविधावपि संबध्यते । तेन

अस्या वक्त्रालमवजितपूर्णेन्दुशोभं विभाति ॥ १६.२३ ॥

इत्येवंविधा यतिर्न भवति ।

---

1) स्यादस्थानोपगतेति वृत्तं मेघकाव्ये । 2) जम्भारातीमेति वृत्तं सूर्यशतके ।

---

१ पदमध्ये यतिर्दुर्ज्ञेयति पादान्ते० A. २ पदान्ते EF. ३ कण्ठावलीति B. ४ भावो dropped in E. ५ संगमेनामि० AEF. ६ द्रधतः सान्द्रतिन्दूरेणुमिति AB. ७ क्वचित्परस्यादिवत् । यथा F.

द्रष्टव्यो यतिचिन्तायां [1]याद्यादेशः परादिवत् ॥ ३ ब ।

यथा –

"अच्छिन्नप्रसराणि नाथ भवतः पातालकुक्षौ यशां –
स्यद्यापि क्षपयन्ति कोकिलकुलच्छायासपत्नं तमः ॥ १६.२४ ॥

*

विततघनतुषारक्षोदशुभ्रासु दूर्वा –
स्वविरलपदमालां श्यामलामुल्लिखन्तः ॥ १६.२५ ॥ इति ।

*

नित्यं प्राक्पदसंबद्धाश्चादयः प्राक्पदान्तवत् ॥ ४ अ ।

चादिभ्यः पूर्वं यतिर्न कर्तव्येत्यर्थः ।

यथा –

स्वादु स्वच्छं च सलिलमिदं प्रीतये कस्य न स्यात् ॥ १६.२६ ॥ इति ।

'नित्यं प्राक्पदसंबद्धा' इति किम् ?, "अन्येषां पूर्वान्तवद्भावो मा भूत् ।

यथा –

मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ १६.२७ ॥ इति ।

*

इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे ॥ १६.२८ ॥ इति ।

*

परेण नित्यसंबद्धाः प्रादयश्च परादिवत् ॥ ४ ब ।

प्रादिभ्यः परा यतिर्न भवतीत्यर्थः ।

दुःखं मे प्रक्षिपति हृदये दुःसहस्त्वद्वियोगः ॥ १६.२९ ॥ इति ।

'परेण नित्यसंबद्धाः' इति किम् ?, अन्येभ्यः परोऽपि यतिर्यथा स्यात् ।

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ॥ १६.३० ॥

"अयं च चादीनां प्रादीनां च एकाक्षरत्वेन एकाक्षराणामेव पदान्तपतौ अन्तादिवद्भाव इष्यते न त्वनेकाक्षराणां पदमध्यपतौ । तत्र हि पदमध्येऽपि चामीकरादिष्विव यतेरभ्यनुज्ञातत्वात् । तत्र चादीनां यथा –

प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ॥ १६.३१ ॥ इति ।

प्रादीनां यथा –

दूराकृष्टस्रजोऽपि हसितमिव परिस्पष्टमासां सरीभिः ॥ १६.३२ ॥ इति ।

---

1) अच्छिन्नप्रसराणीति – अस्य पूर्वार्धमिदम् – अत्यासन्नमिवाद्य(द्य)त्वगतपूतीनोत्सवसमये पत्युर्भोगभूतो दृश्यति किम्पि प्रीतिं मुहुः श्रोत्रयोः । 2) अन्येषां पूर्वान्तेति – अनित्यसंबद्धानाम् । 3) अयं च चादीनां इति – चकारः पदमध्ये प्रादय आदौ यतिमात्रो भवन्तीति भावः ।

---

१ अद्य० A. २ विरचन्ति A. ३ तद्विशेष AEP. ४ परा यति EP. ५ प्रमोदं A. ६ दृष्टं E. ७ श्लो०

तदेतत्सर्वं श्रव्यपदेनैव गतार्थमिति न सूत्रितम्। अनिर्दिष्टयतिकेऽपि च छन्दसि श्रव्यैव यतिः करणीया। न पुनरेवं यथा—

[1]तेन शशिमुखि गतेन सखि किं प्रियेण कुरु मानमपि तस्मिन्।
स तव वरतनु समदनः स्वयमेव समेति चरणयुगम्॥ १६.३३॥ इति।

तथा हि—

[2]अवह्वर्थापि मधुरा मनो हरति भारती।
तमोनिचयसंकाशा मत्तनादेव कोकिला॥ १६.३४॥ इति।

त्र्यादिर्गादिः॥ १७॥

त्रिचतुरादिः संख्या क्रमेण गघङादिसंज्ञा॥ १७॥

*

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ संज्ञाध्यायः प्रथमः समाप्तः॥ १॥ ग्रंथाग्रं १२५, अ० १८।

1) तेन शशिमुरीति—इयं सप्तपद्याशन्मात्रारूपाऽऽर्या पुनः सर्वथापि यतिरहिता। 2) अवह्वेति—वृत्तत्वं च पूर्वकथागतम्। इत्याचार्य० प्रथमोऽध्यायः संपूर्णः॥

१ चर० dropped in A　२ त्रिचतुरादिसंज्ञा AP.

अथ द्वितीयोऽध्यायः ।

छन्दः ॥ १ ॥

आशास्त्रपरिसमाप्तेः छन्द इत्यधिकृतं वेदितव्यम् ॥ १ ॥

पादः ॥ २ ॥

पाद इत्यधिकार आशास्त्रपरिसमाप्तेः ॥ २ ॥

इदानीमेकाक्षराद्याः षड्विंशत्यक्षरावसानाश्छन्दोजातीराह–

एकाक्षरोक्ता जातिः ॥ ३ ॥

एकाक्षरपादा उक्ता नाम भेदसंग्रहात्मिका जातिः ॥ ३ ॥

अत्युक्ता-मध्या-प्रतिष्ठा-सुप्रतिष्ठा-गायत्री-उष्णिग्-अनुष्टुब्-बृहती-पङ्क्ति-त्रिष्टुब्-जगती-अतिजगती-शक्करी-अतिशक्करी-अष्टि-अत्यष्टि-धृति-अतिधृतयः एकैकवृद्धाः ॥ ४ ॥

उक्तात एकैकाक्षरवृद्धपादा अत्युक्तादयः । तत्र द्व्यक्षरा अत्युक्ता जातिः । त्र्यक्षरा मध्या । चतुरक्षरा प्रतिष्ठा । एवं यावदेकोनविंशत्यक्षरा अतिधृतिः ॥ ४ ॥

कृतिः प्राविसमभ्युदश्च ॥ ५ ॥

प्र-आङ्-वि-सम्-अभि-उद् इत्येतेभ्यश्च परा कृतिरेकैकवृद्धाक्षरा । विंशत्यक्षरा कृतिः । एकविंशत्यक्षरा प्रकृतिः । द्वाविंशत्यक्षरा आकृतिः । त्रयोविंशत्यक्षरा विकृतिः । चतुर्विंशत्यक्षरा संकृतिः । पञ्चविंशत्यक्षरा अभिकृतिः । षड्विंशत्यक्षरा उत्कृतिः इति ॥ ५ ॥

अथासामेव जातीनामुपयोगिनो भेदानाह–

उक्तायां गः श्रीः ॥ ६ ॥

उक्तायां जातौ गुरुरेकाक्षरः पादः स च श्रीनामा । यथा–

गी-,र्धीः । श्रीः, स्तात् ॥ ६.१ ॥

अत्युक्तायां गौ स्त्री ॥ ७ ॥

यथा–

भ्रातर्, दृष्टा । इष्टा, सा स्त्री ॥ ७.१ ॥

पद्मित्येके ॥ ७.१ ॥

---

१ एकोनवि॰ BPP; एकानवि॰ C. २ प्राड्वि॰ च कृतिः NP. ३ उत् ABP. ४ चतुर्वि॰ to अभिकृति. dropped in A. ५ एवं षड्वि॰ A. ६ इति dropped in A; इति यावत् E.

लौ मदः ॥ ८ ॥

जय, जिन। जित-, मदं ॥ ८.१ ॥

पुष्पमिति कश्चित् ॥ ८.१ ॥

ग्लौ दुःखम् ॥ ९ ॥

यथा—

कस्य, नात्र। दुःख-, मस्ति ॥ ९.१ ॥

ग्गौ सुखम् ॥ १० ॥

यथा—

जिनः, स वः। क्रियात्, सुखम् ॥ १०.१ ॥ २।४ ॥

मध्यायां मो नारी ॥ ११ ॥

यथा—

निःसारे, संसारे। सारं किं, स्यान् नारी ॥ ११.१ ॥

यः केशा ॥ १२ ॥

यथा—

पुरंध्री, सुवेशा। इयं सा, सुकेशा ॥ १२.१ ॥

धूरिति भरतः ॥ १२.१ ॥

रो मृगी ॥ १३ ॥

यथा—

वल्लभा, गेहिनी। या मृगी-, लोचना ॥ १३.१ ॥

तडिदिति भरतः ॥ १३.१ ॥

सो मदनः ॥ १४ ॥

यथा—

विरहे, ऽभ्यधिकम्। मदनो, दहति ॥ १४.१ ॥

रजनीति भरतः। केचित्तु न्र-म्य-ज्र-स्ताम् एकैकोऽपि अग्निः, शङ्खः, शुभ्रं, दुग्धं इत्याहुः ॥ १४.१ ॥ २।४ ॥

प्रतिष्ठायां म्गौ कन्या ॥ १५ ॥

मगणो गुरुश्च। यथा—

दैवैः, येहां चके। सेयं मन्ये, धन्या कन्या ॥ १५.१ ॥

भगौ[1] सुमुखी ॥ १६ ॥

भगणो गुरुश्च । यथा–

क्षीणतनुर्, मद्विरहे । याश्रुमुखी, सा सुमुखी ॥ १६.१ ॥

ललितेति भरतः ॥ १६.१ ॥

जगौ[3] विलासिनी ॥ १७ ॥

जगणो गुरुश्च । यथा–

न लभ्यते, धनस्तनी । धनं विना, विलासिनी ॥ १७.१ ॥

जयेति भरतः ॥ १७.१ ॥

रगौ समृद्धिः ॥ १८ ॥

रगणो गुरुश्च । यथा–

पुण्यपात्रे, शुद्धचित्तैः । या प्रदत्ता, सा समृद्धिः ॥ १८.१ ॥

पुण्यैमिति भरतः ॥ १८.१ ॥

नगौ मृगवधूः ॥ १९ ॥

नगणो गुरुश्च । यथा–

तव पुरो, नयनयोः । किमिव सा, मृगवधूः ॥ १९.१ ॥

यगौ व्रीडा ॥ २० ॥

यगणो गुरुश्च । यथा–

तथा तेन, कृतं भर्त्रा । यथा चित्ते, ऽभवद् व्रीडा ॥ २०.१ ॥

सगौ सुमतिः ॥ २१ ॥

सगणो गुरुश्च । यथा–

भज धर्मं, वद सत्यम् । त्यज पापं, सुमतिः सन् ॥ २१.१ ॥

भ्रमरीति भरतः ॥ २१.१ ॥

तगौ[4] सोमप्रिया ॥ २२ ॥

तगणो गुरुश्च । यथा–

विभ्राजते, खे रोहिणी । चारुद्युतिः, सोमप्रिया ॥ २२.१ ॥ ४।८ ॥

सुप्रतिष्ठायां रो गौ प्रीतिः ॥ २३ ॥

यथा–

यस्य नैवार्थाः, नैव कामिन्यः । नापि वैराग्यं, तस्य का प्रीतिः ॥ २३.१ ॥

---

१ भगौ N. २ सा सुखी । ललितेति भरतः A. ३ जगौ A. ४ पुष्पं० to भरतः dropped in B; पुष्पमिति FF. ५ Sutra 22 with com. dropped in BFF.

रलगा विदग्धकः ॥ २४ ॥

रगणो लघुगुरू च । यथा–

यौवनेन वा, कार्मणेन वा । यो न दग्धको, ऽसौ विदग्धकः ॥ २४.१ ॥

वागुरेति भरतः ॥ २४.१ ॥

भो गौ पङ्क्तिः ॥ २५ ॥

यथा–

फाल्गुनमासे, फुल्लवनान्ते । पावकतुल्या, किंशुकपङ्क्तिः ॥ २५.१ ॥

अक्षरोपपदेत्यन्ये । कुन्तलतन्वीति भरतः ॥ २५.१ ॥

भ्लगा रतिः ॥ २६ ॥

भगणो लघुगुरू च । यथा–

साधुचरणा-, म्भोजयुगले । हन्त विदुषो, राजति रतिः ॥ २६.१ ॥

जो गौ सती ॥ २७ ॥

यथा–

स्वभर्तृभक्ता, विशुद्धशीला[2] । निरीहचित्ता, सती सतीयम् ॥ २७.१ ॥

शिखेति भरतः ॥ २७.१ ॥

त्लगा नन्दा ॥ २८ ॥

तगणो लघुगुरू च । यथा–

चित्ते सरला, वेषे तरला । दाने पृथुला, नन्दा महिला ॥ २८.१ ॥

य्लगा जया ॥ २९ ॥

यगणो लघुगुरू च । यथा–

ममानीयत, मनः कान्तया । मुखेनोल्लस-, ज्जिताम्भोजया ॥ २९.१ ॥

म्लगाः सावित्री ॥ ३० ॥

मगणो लघुगुरू च । यथा–

जैनेन्द्रं मुखं, दिश्याद्वः सुखम् । जिग्ये येन सा, सावित्री प्रभा ॥ ३०.१ ॥

सो गौ घनपङ्क्तिः ॥ ३१ ॥

यथा–

क्रियया हीनं, यदिह ज्ञानम् । रहितास्भोभि-, घनपङ्क्तिः सा ॥ ३१.१ ॥

न्लगा अभिमुखी ॥ ३२ ॥

नगणो लघुगुरू च । यथा–

शशिवदना, मृगनयना । अभिसरति, त्वदभिमुखी ॥ ३२.१ ॥

---

१ लघुगुरुस्थ P. २ विशुद्धशीला B. ३ [illegible]..४ लगौ A.

मृगचपलेत्यन्यः । कमलमुखीति भरतः ॥ ३२.१ ॥ ५।१० ॥

गायत्र्यां भौ सावित्री ॥ ३३ ॥

यथा—

देवानां यः स्त्रैणैः, साक्षात्क्षोभं निन्ये ।
सं ब्रह्मा ब्रह्मा किं, यत्कान्ता सावित्री ॥ ३३.१ ॥

भ्रौ तटी ॥ ३४ ॥

भगणरगणौ । यथा—

कामेभ्यो निस्पृहं[1], यस्योच्चैः स्यान्मनः ।
किं कुर्यात्तस्य सा, मन्दाकिन्यास्तटी ॥ ३४.१ ॥

सौ रमणी ॥ ३५ ॥

यथा—

[1]रजनीरमण-, प्रतिभे वदने ।
तिलकं शशकं, कुरुते रमणी ॥ ३५.१ ॥

नलिनीति भरतः ॥ ३५.१ ॥

त्यौ तनुमध्या ॥ ३६ ॥

तगणयगणौ । यथा—

लावण्यपयोधिः, सौभाग्यनिधानम् ।
सा कस्य न हृद्या, बाला तनुमध्या ॥ ३६.१ ॥

स्भौ गुरुमध्या ॥ ३७ ॥

सगणभगणौ । यथा—

चपलाकेकर-, नयना सा किल ।
रमणीकोविद, गुरुमध्या तव ॥ ३७.१ ॥

यौ सोमराजी ॥ ३८ ॥

यथा—

[2]स यः पातु कुन्द-, त्विषा देहभासा ।
समुद्द्योतितान्तो, जिनः सोमराजी ॥ ३८.१ ॥

अथ द्वितीयाध्याये पर्याया लिख्यन्ते—

1) रजनीरमणेत्यत्र शशकमिति—शशस्य तुल्यं शशकम् । तुल्ये कमलये संकुचितमिति भावः।
2) स यः पातु इत्यत्र सोमराजीति—चन्द्रप्रभः । सोमेन लाञ्छनेन राजते । कर्तरिन् ।

---

१ देवः किं ग ब्रह्मा ब. २ निःस्पृहं ए.

न्यौ शशिवदना ॥ ३९ ॥

नगणयगणौ। यथा—

मनसिजलीला-, कुलगृहभूमिः।
कुवलयनेत्रा, शशिवदनेयम् ॥ ३९.१ ॥

मुकुलितेत्यन्यः। मकरशीर्षेति भरतः ॥ ३९.१ ॥

म्नौ मालिनी ॥ ४० ॥

मगणनगणौ। यथा—

केतकीसंसृष्टैः, मालतीसंपृक्तैः।
पङ्कजैरर्हन्तं, मालिनी सोपास्ते[1] ॥ ४०.१ ॥

भ्यौ कामलतिका ॥ ४१ ॥

भगणयगणौ। यथा—

भाति मृदुपाणि-, पल्लवमनोज्ञा।
हासकुसुमश्रीः, कामलतिकेयम् ॥ ४१.१ ॥

म्सौ मुकुलम् ॥ ४२ ॥

मगणसगणौ। यथा—

यातोऽस्तं शशभृन्, मार्तण्डोऽभ्युदयम्।
व्याकोशं कमलं, नीलाब्जं मुकुलम् ॥ ४२.१ ॥

वीथीति भरतः ॥ ४२.१ ॥

त्रौ शफरिका ॥ ४३ ॥

नगणरगणौ। यथा—

कुवलयेक्षणे, रमयतो मनः।
तव विलोचने, शफरिकाचले ॥ ४३.१ ॥

गिरेति भरतः ॥ ४३.१ ॥

न्नौ कच्छपी ॥ ४४ ॥

नगणनगणौ। यथा—

लक्ष्यते सरसि, चन्द्रमःसदृशि।
लक्ष्मकान्तिरिह, कच्छपी पयसि ॥ ४४.१ ॥

भ्रौ लघुमालिनी ॥ ४५ ॥

---

१ सोपास्ते P. २ मगणौ A.

भगणरगणौ । यथा –

त्वद्वदनाग्रतो, मण्डलमैन्दवम् ।
संप्रति लक्ष्यते, श्रीर्लघु मालिनी ॥ ४५.१ ॥

स्यौ विमला ॥ ४६ ॥

सगणयगणौ । यथा –

निपतन्ति यस्मिन्, सरला दृशस्ते ।
तमुपैति लक्ष्मीर्, विमला च कीर्तिः ॥ ४६.१ ॥

त्रौ जला ॥ ४७ ॥

तगणरगणौ । यथा –

जातास्तव द्विषत्-, स्त्रीणां दृशो नृप ।
अश्रान्तमश्रुभिः[2], पर्यस्तकज्जलाः ॥ ४७.१ ॥

म्यौ [1]सुनन्दा ॥ ४८ ॥

भगणयगणौ । यथा –

श्रीमत्पार्श्वनाथ, त्वत्पादाब्जयुग्मे ।
भूयान्निर्विकल्पा, भक्तिर्मे सुनन्दा ॥ ४८.१ ॥

भ्मौ विक्रान्ता[3] ॥ ४९ ॥

भगणमगणौ । यथा –

नो भटसिंहास्ते, त्वद्रिपुपुर्यन्तः ।
वासरतिं सिंहाः, बिभ्रति विक्रान्ताः ॥ ४९.१ ॥

स्मौ सूचीमुखी ॥ ५० ॥

सगणमगणौ । यथा –

अधुना पद्मेपोर्, नयतीक्ष्णास्त्रत्वम् ।
इह जज्ञे सूची-, मुखया केतक्या ॥ ५०.१ ॥

य्मौ शिखण्डिनी ॥ ५१ ॥

यगणमगणौ । यथा –

हहा पान्थस्त्रीभिः, पिधीयन्ते कर्णाः ।
मुहुर्व्यातन्वाने, शिखण्डिन्यारावम् ॥ ५१.१ ॥ ६।१९ ॥

---

1) सुनन्दाच्छन्दसि सुनन्दा इति – सुष्ठु नन्दयतीति । लिहाद्यच् संज्ञायां अभावात् मन्दाशनो न भवति कृदन्तप्रथमपादे । 2) विक्रान्तायां सिंहा इति – हे राजन् सांप्रतं त्वद्रिपुपुरीमध्ये न ते भटसिंहाः किं तु शून्यत्वात् सिंहा एव विक्रान्ताः सांप्रतं दृश्यन्ते । शून्यानीति भावः ।

---

१ श्रीर्लघु० N. २ असुभिः A.
३ छन्दो०

उष्णिहि मौ गो गान्धर्वी ॥ ५२ ॥

यथा–

स श्रेयासि श्रेयांसः, श्रीमान्देवः पुष्णातु ।
क्षोभायाभूद्यच्चित्ते, गान्धर्वी न क्रीडापि ॥ ५२.१ ॥

[1]रजौ ग उष्णिक् ॥ ५३ ॥

रगणजगणौ गुरुश्च । यथा–

[2]उष्णिहीव सस्तौ, स्याद्ध्रुवं रजो गुरुः ।
नो भवेद्यदि क्षितौ, श्रीजिनेन्द्रशासनम् ॥ ५३.१ ॥

शिखेति भरतः ॥ ५३.१ ॥

ज्सौ गः कुमारललिता ॥ ५४ ॥

जगणसगणौ गुरुश्च । यथा–

[3]नरेन्द्रगणसेना-वृतः प्रथितशक्तिः ।
दधासि नृपते त्वं, कुमारललितानि ॥ ५४ १ ॥

अत्र केचिद् द्वाभ्यां विरतिमिच्छन्ति ।

इदं वदनपद्मं प्रिये तव विभाति ।
इह व्रजति मुग्धे, मनो भ्रमरता मे ॥ ५४.२ ॥

म्सौ गो मदलेखा ॥ ५५ ॥

मगणसगणौ गुरुश्च । यथा–

यावत्केसरिनादो, नायाति श्रुतिमार्गम् ।
तावद्बन्धगजाना, गण्डे स्यान् मदलेखा ॥ ५५.१ ॥

र्सौ ग उद्धता ॥ ५६

रगणसगणौ गुरुश्च । यथा–

या बभूव सुदर्पा, वैरिणा नृप सेना ।
त्वत्प्रतापविलासे, सोद्धतापि गतश्री ॥ ५६ १ ॥

त्सौ गो भ्रमरमाला ॥ ५७ ॥

---

1) उष्णिहीव सस्तावितिः–यथा उष्णिहि छन्दसि रजो गुरु स्यात् । कोऽर्थः । स्यात् ज रज गुरु अक्षर रगणो जगणो गुरुश्चेति लक्षण यथा उष्णिहि छन्दसि भवति तथा समारेऽपि रज पादलक्षण गुरु महत् स्यात् यदि जिनेन्द्रशासन न स्यादिति भावः । 2) नरेन्द्र[गण]सेनावृत इति–नरेन्द्रगणाना राक्षसमूहाना सेना । पक्षे नरेन्द्रभूताना गणाना प्रमथादीनाम् । प्रथिता शक्तिः सामर्थ्य यस्य । पक्षे शक्ति प्रहरणम् । कुमार स्कन्दः ।

---

१ रजौ A २ गुरु CBV ३ गुरु यथा A

तगणसगणौ गुरुश्च । यथा—

कुन्दे विचकिले वा, मन्दारकुसुमे वा ।
प्रीत्या मधुरसाढ्ये, भ्रान्ता भ्रमरमाला ॥ ५७.१ ॥

रौ गो हंसमाला ॥ ५८ ॥

यथा—

शैवलालीनिराशा, पङ्कजे बद्धवासा ।
किं वकोटावलीयं, हन्त सा हंसमाला ॥ ५८.१ ॥

भौ गः कलिका ॥ ५९ ॥

यथा—

[1]स्पर्शनमात्रवशाद्, या मकरन्दमुचा ।
किं भ्रमर भ्रमता, सौ कलिता कलिका ॥ ५९.१ ॥

सोपानमित्यन्यः । भोगवतीति भरतः ॥ ५९.१ ॥

भ्सौ गो विधुवक्त्रा ॥ ६० ॥

भगणसगणौ गुरुश्च । यथा—

अहि विरहतप्ता, रात्रिमभिलषन्ती ।
उदयति विधुबिम्बे, म्लायति विधुवक्त्रा ॥ ६०.१ ॥

म्भौ गः सरलम् ॥ ६१ ॥

मगणभगणौ गुरुश्च । यथा—

पापाभ्यासात्कुटिलं, चेतो रौद्रं भजते ।
शास्त्राभ्यासव्यसनाद्, धर्म्यं ध्यानं सरलम् ॥ ६१.१ ॥

भौ गश्चित्रम् ॥ ६२ ॥

भगणनगणौ गुरुश्च । यथा—

[2]कीर्तिरिह भवतः, कुन्दकुसुमसमा ।
रञ्जयति हृदयं, चित्रमिदमधिकम् ॥ ६२.१ ॥

नौ गो हरिविलसितम् ॥ ६३ ॥

यथा—

सपदि धलिनृपान्, समिति नियमयन् ।
प्रथयसि न विभो, न हरिविलसितम् ॥ ६३.१ ॥

---

1) स्पर्शनमात्रेत्यत्र मकरन्दमुचेति—मकरन्दं मुञ्चति इति मकरन्दमुचा । मूलविभुजेति कः ।
2) कीर्तिरिहेत्यत्र चित्रमिति—शुभ्रा सती हृदयं रञ्जयतीति चित्रं पक्षे रागं प्रापयतीति भावः ।

---

१ रगणद्वयं गुरु च । यथा C. २ भगणद्वयं गुरुश्च । यथा P. ३ गो dropped in A. ४ भागवतीति A. ५ सरलं dropped in A.

चपलेत्यन्ये। द्रुतगतिरिति भरतः ॥ ६३.१ ॥

भ्जौ गः शारदी ॥ ६४ ॥

भगणजगणौ गुरुश्च। यथा—

उज्ज्वलनिशाकरा, चारुकमलाकरा।
कस्य न मनोरमा, श्रीर्भवति शारदी ॥ ६४.१ ॥

त्नगा मधुकरिका ॥ ६५ ॥

तगणनगणौ गुरुश्च यथा—

पान्थ श्रय दयितां, प्राप्तो मधुसमयः ॥
गायन्त्यनुविटपं, प्रीता मधुकरिकाः[1] ॥ ६५.१ ॥

वज्रमित्यन्यः ॥ ६५.१ ॥

स्जौ गो विमला ॥ ६६ ॥

सगणजगणौ गुरुश्च। यथा—

समशत्रुमित्रता-, मवलम्ब्य निर्मर्मः[4]।
भज वीतरागतां, विमलात्मको भव ॥ ६६.१ ॥

ज्रौ गः सुभद्रा ॥ ६७ ॥

जगणरगणौ गुरुश्च। यथा—

कुमारपाल देव, त्वदीयविक्रमेण।
महौजसः[5] सुभद्रा-, पतेः स्मृतं न केन ॥ ६७.१ ॥

न्यौ गः कुमुद्वती ॥ ६८ ॥

नगणयगणौ गुरुश्च। यथा—

पतिविरहे यान्य-, मुखमपि नापश्यत्।
कलयति सा श्लाघाम्, इह कुमुदिन्येका ॥ ६८.१ ॥

स्सौ गो मुदिता ॥ ६९ ॥

यगणसगणौ गुरुश्च। यथा—

लतानां कलिकाभिः, प्ररोहत्पुलकैश्च।
वसन्तागमनेऽस्मिन्, वनश्रीर्मुदितेयम् ॥ ६९.१ ॥

त्रौ गो मनोज्ञा ॥ ७० ॥

नगणरगणौ गुरुश्च। यथा—

भुवनजैत्रमस्त्रं, रतिपतेरधीते।
पिकगिरा मधुश्रीः, अतिमनोज्ञयासौ ॥ ७०-१ ॥

---

१ द्रुतगतिरिति A | २ भरेगणनगणौ A | ३ मधुकरिका A | ४ निर्मम N | ५ महोज सु० A.

स्त्रौ गो दीप्ता ॥ ७१ ॥

सगणरगणौ गुरुश्च । यथा—

नवसिन्दूरभासो, मुकुलाः किंशुकेऽमी ।
ध्रुवमामेयबाणाः, रतिनाथस्य दीप्ताः ॥ ७१.१ ॥ ७।२० ॥

अनुष्टुभि त्रौ गौ विभा ॥ ७२ ॥

तरगगाः । यथा—

देव त्वयि क्षमानाथे, क्षीणान्यभूभुजां कीर्तिः ।
पूर्वाद्रिभाजि मार्तण्डे, का वा विभात्तु ताराणाम् ॥ ७२.१ ॥

र्यौ ल्गावनुष्टुप् ॥ ७३ ॥

रयलगाः । यथा—

कुर्वते विवेकारतिं, ये विरागहेतुष्वपि ।
ते पठन्ति चित्रं मुहुर्, बालिशा अनुष्टुप्धिया ॥ ७३.१ ॥

[1]गीर्गीर्विद्युन्माला ॥ ७४ ॥

समानेनैकादिरिति वचनाद् [2]गीरिति गचतुष्टयं गृह्यते । मौ गाविति तु न कृतं चतुर्भिश्चतुर्भिर्यथा विरतिर्ज्ञायेतेति । यथा—

सत्यं रम्याभोगा भोगाः, कान्ताः कान्ताः प्राज्यं राज्यम् ।
किं कुर्वन्तु प्राज्ञा यस्माद्, आयुर्विद्युन्मालालोलम् ॥ ७४.१ ॥

भौ गौ चित्रपदा ॥ ७५ ॥

यथा—

[1]व्योमनि सागरतीरे, पर्वतशृङ्गनिकुञ्जे ।
भ्राम्यति भीमकुलेन्दो, चित्रपदा तव कीर्तिः ॥ ७५.१ ॥

त्रौ ल्गौ सुमालती ॥ ७६ ॥

नरलगाः । यथा—

परिहृतोत्पलावली, कनककेतकी तथा ।
भ्रमर मालतीकृते, तदिति सा सुमालती ॥ ७६.१ ॥

भ्तौ ल्गौ माणवकं यैः ॥ ७७ ॥

भतलगाः । यैरिति त्र्यादिर्गादिरिति वचनाच्चतुर्भिरिति लभ्यते । यतिरिति चोपतिष्ठते । तेन चतुर्भिर्यतिरिति सिद्धम् ॥ यथा—

[2]शीतरुजान्योऽन्यरणद्, दन्तरवैर्विस्वरकम् ।
साम पठन् माणवको, ऽशासि मुहुर्यत्र शुकैः ॥ ७७.१ ॥

---

1) व्योमनि सागरेत्यत्र चित्रपदेति—चित्राणि पदानि, स्यादित्याद्यन्तरूपाणि स्थानानि वा यस्याः सा । पक्षे या भ्रमति सापि चित्राणि पदानि पदन्यासा यस्या एवंविधा स्यात् । 2 शीतरुजान्योन्येत्यत्र विस्वरकं ज्ञेयम् । शुकैरिति—एतावता यत्र पुरे शुका अपि विद्यासागराः सन्ति तदा मनुजानां का कथा ।

---

१ पूर्वाद्रिभाजि N. २ गीर्गी वि० A. गीर्गी वि० C ३ गीरिति ABCP.

त्रौ ल्गौ नाराचम् ॥ ७८ ॥

तरलगाः । यथा—

[1]दुर्वारवैरिदन्तिनां, कुम्भस्थलेषु निश्चलः ।
त्वत्कीर्तिकेतुवंशवन्, नाराच एष शोभते ॥ ७८.१ ॥

म्नौ गौ हंसरुतम् ॥ ७९ ॥

मनगगाः । यथा—

[2]मञ्जीरक्वणितयोग्यां, कुर्वाणं श्रवणभोग्याम् ।
आदत्ते यत मनांसि, यूनां हंसरुतमेतत् ॥ ७९.१ ॥

न्जौ ल्गौ ललितगतिः ॥ ८० ॥

नजलगाः । यथा—

मणिरसनास्खनिताद्, अनुसृतहंसकुलैः ।
श्रितमिव शिष्यपदं, ललितगतौ सुतनोः ॥ ८०.१ ॥

र्जौ गौ सिंहलेखा ॥ ८१ ॥

रजगगाः । यथा—

[3]पर्णपातमात्रभीत, कृष्णसारपोत[1] तात ।
किं विलम्बसे महा[2]त्मन्, त्व जहीहि सिंहलेखाम् ॥ ८१.१ ॥

ज्रौ ल्गौ प्रमाणी ॥ ८२ ॥

जरलगाः । यथा—

[4]तव प्रमातुमिच्छ[3]ता, यशश्चुलुक्यभूपते ।
समप्रमानजित्वरी, जगत्त्रयी प्रमाण्यभूत् ॥ ८२.१ ॥

मत्तचेष्टितमिति भरतः ॥ ८२.१ ॥

[5]र्जौ ग्लौ समानी ॥ ८३ ॥

रजगलाः । यथा—

रागरोषमोहदोष-, दारुदावपावक[4]स्य ।
तीर्थिकैः समं जिनस्य, नो [6]समानिका कलापि ॥ ८३.१ ॥

---

1) दुर्वारवैरीत्यत्र केतुश्छत्रे (श्रिते) पताकायाम् । 2) मञ्जीरक्वणितेत्यत्र मञ्जीरयोर्नूपुरयोर्यत् क्वणितं रणित तस्य योग्या अभ्यासस्ताम् (योग्यां श्रमम् B) । 3) पर्णपातेत्यत्र पोत तातेति—पुत्रवत्सले तात । हे कृष्णसारपोत तात । सिंहलेखामिति—सिंहस्य मर्यादाम् । 4) तव प्रमातुमित्यत्र प्रमाण्य भूदिति—प्रमाण्यभूदित्यखण्ड क्रियापदम् । 5) र्जौ ग्लौ समानीत्यत्र 'कवल-मामक भागधेय-पापापरसमानार्थे'ति सज्ञायां ङी । 6) समानिकेति—समान्येव स्वार्थिके के समानिका ।

---

१ पोतताप्त N २ महांस्त्व C ३ इच्छता A ४ मत्तवेष्टित० N ५ दारुदाहपा० F.

वृहत्यां भो मौ वक्त्रं डैः ॥ ८८ ॥

डैरिति पञ्चभिर्यतिः। यथा—

विभ्रमसारभ्रूविक्षेपं, मन्मथलीलालीलागारम्।
कस्य न चित्तं कुर्यात् क्षोभं, बालकुरङ्गाक्षीणां वक्त्रम् ॥ ८८.१ ॥

नो रौ वृहतिका ॥ ८९ ॥

यथा—

[1]विशदवृत्तलब्धात्मनः, शुचियशोयतेर्भूपते।
तव कमण्डलुर्वारिधिः, वृहतिका च मन्दाकिनी ॥ ८९.१ ॥

रनसा हलमुखी ॥ ९० ॥

रनसाः। यथा—

दन्तुरं कपिशनयनं, यन्मुखं विकटचिबुकम्।
तां स्त्रियं सुरतमभिलषन्, दूरतस्त्यज हलमुखीम् ॥ ९०.१ ॥

नौ मो भुजगशिशुसृता ॥ ९१ ॥

यथा—

[2]नयनविलसितैरस्याः, कथमिव वत मूर्छा ते।
भुजगशिशुसृ[3]ता यद्वा, ऽगतमुरगकन्येयम् ॥ ९१.१ ॥

वक्रगतेरित्यर्थः। शिशुपदस्य साभिप्रायत्वात्। यथा च[4]—

अभ्यस्यता तु तरु[5]णीगतिवक्रिमाण-
मुन्मूलिता[6]ः फणिशिशो भवतापराधाः ॥ ९१.२ ॥

इति। मधुकरिकेति भरतः ॥ ९१.२ ॥

भजसा उदयम् ॥ ९२ ॥

यथा—

[7]सुभ्रु भवदीयवदने, सत्यपि नितान्तरुचिरे।
निस्त्रप इवैष सहसा, वाञ्छति शशाङ्क उदयम् ॥ ९२.१ ॥

भौ र उत्सुकम् ॥ ९३ ॥

यथा—

आपदि दीनमनोरथं, सपदि हर्षपरायणम्।
मा कुरु मानस चापलं, संसर तत्त्वमनुत्सुकम् ॥ ९३.१ ॥

---

1) विशदवृत्तेत्यत्र शुचियशोयतेरिति—पवित्र उज्ज्वलश्च यश एव यतिस्तस्य। वृहतिकेति प्रच्छादनपटी। 2) नयनविलसितैरित्यादि—वतेति कोमलामन्त्रणे। भुजगशिशुसृतेति—भुजगशिशोरिव सृतं गमन यस्याः। 3) त(य)या चेति—शिशुपदस्य साभिप्रायत्वे संवादकमाह—अभ्यस्यतेति। तरुणीगतिकौटिल्य कुर्वता त्वया समुल मम हर्षो जायते इत्यपराधोन्मूलनम्। 4) सुभ्रु भवदीयेत्यत्र सुभ्रु इति—भ्रूसमानार्थो भ्रुशब्दोऽप्यस्ति तत ऊन्। अन्यथा ऊकारान्तत्वाभावाद् 'उतो प्राणी'त्यादिना सूत्रेणोत् न स्यात्। निस्त्रप इति निर्लज्जः।

१ सताय[ा] P. २ तथा च com. ३ तरणी N. ४ उन्मूलिता A. ५ तत्वम० N.

रनरा भद्रिका ॥ ९४ ॥

रनराः। यथा—

[1]पुण्यपापजलवर्धिते, सौख्यदुःखलतिके स्वयम्।
तज्जहीहि [2]परिविप्लवं, साधुता हृदय भद्रिका ॥ ९४.१ ॥

नौ र उपच्युतम् ॥ ९५ ॥

यथा—

[2]नृप कुरु करुणां जने, परिहर खलसंगमम्।
विमृश सुरविमानतस्, त्रिदशपतिमुपच्युतम् ॥ ९५.१ ॥

स्जसा अक्षि ॥ ९६ ॥

सजसाः। यथा—

[3]विषमास्त्र एष इति यत्, कवयो यदन्ति तदसत्।
प्रहरत्ययं हि मदनः, सुतनो तवाक्षिललितैः ॥ ९६.१ ॥

मः सौ कनकम् ॥ ९७ ॥

यथा—

[4]मिथ्यादर्शनदिग्भ्रमनाः, पापं धर्मधिया मनुते।
गाढोन्मत्तरसान्धदृशां, मृत्पिण्डोऽप्यथवा कनकम् ॥ ९७.१ ॥

सौ मस्तारम् ॥ ९८ ॥

यथा—

[5]सकलासुमतां रक्षायै, यतितव्यमितीर्यत् तत्त्वम्।
रसवादविदां तत्सारं, यदि वार्तिक! रैक्कं तारम् ॥ ९८.१ ॥

सिः सौम्या ॥ ९९ ॥

सिरिति सगणत्रयम्। यथा—

निजजीवितमात्ररसात्, कृतनिष्कृपकर्मवते।
मृगयामधुमद्यरते, कुरु धर्ममसौम्यमते ॥ ९९.१ ॥

---

1) पुण्यपापेत्यत्र जलवर्धिते इति—अन्यापि लता जलसिक्ता वृद्धिं याति तथेयम्। तज्जहीहीति—तस्मात् त्वं त्यजेति योगः। परिविप्लवमिति—चित्तोद्वेगम्। साधुता सज्जनतेति भावः 2) नृप कुरु करुणामित्यत्र त्रिदशपतिमुपच्युतमिति—इन्द्रोऽपि स्वर्गात् भ्रष्टः इति हेतोः का गतिः तवेति भावः। 3) विषमास्त्र एष इतीति—विषमानि पञ्चसंख्याकानि, पक्षे दुःसहानि अस्त्राणि यस्य सः। अक्षिललितैरिति—लोचनचेष्टितैः कटाक्षवर्तीरिति भावः। 4) मिथ्यादर्शनेत्यत्र गाढोन्मत्तरसान्धदृशामिति—गाढमुन्मत्तरसेन धतूरकरसेनान्धा विद्युप्ता एव तेषां तेषाम्। 5) सकलासुमतेत्यत्र वार्तिकेति—वार्ता प्रयोजनं अस्य, इकन्, तस्य सम्बोधने हे वार्तिक रसवादिन्। रसवादविदां इत्यत्र सारं रैक्कं तारं तार्क्ष्यं भवति।

---

१ परिप्लवं (परिप्लवं दुखं च Tippana) B. परि० corrected to परिप्लवं P. २ मृत्पिण्डोऽपरा A. ३ इति वरं A. ४ तारं रैक्कं A.
४ ७८.२

तभ्या रुचिरा ॥ १०० ॥

तभयाः। यथा—

नाश्रायि यैश्चरणपद्म-, द्वन्द्वं तव क्षणमपीश।
तैराश्रितं वनमजस्र-, दावज्वलत्तरु चिराय ॥ १००.१ ॥

नस्या विशाला ॥ १०१ ॥

नसयाः। यथा—

नृपतिलक मातु कीर्तिम्, तव भुवि कर्यं तु यस्याः।
भवति सकला त्रिलोकी, यदियमपि नो विशाला ॥ १०१.१ ॥

तन्मा मकरलता ॥ १०२ ॥

तनमाः। यथा—

"भैमे भवद्रिनारीणाम्, आर्द्राञ्जननयनाम्बोधेः।
आसूत्रि कुचतटे भट्टेः, नव्या मकरलतामङ्गिः ॥ १०२.१ ॥

नज्याः शशिलेखा ॥ १०३ ॥

नजयाः। यथा—

कलयति पाण्डुरभाव, तव विरहे मुनुः सा।
सुभग यथा दिवसादौ, गलितरुचिः शशिलेखा ॥ १०३.१ ॥

नौ सो लघुमणिगुणनिकरः ॥ १०४ ॥

यथा—

अपरमणिगुणगणः, सरिदधिप तव किंवान्।
हृदि हृदि विलसति यत्, लघुमणिगुणनिकरः ॥ १०४.१ ॥

मभ्नाः सिंहाक्रान्ता ॥ १०५ ॥

मभनाः। यथा—

त्वद्दृष्टेय भवति विभो, दीना प्रत्यर्थिनृपसभूः।
अनुसरेव शशिकला, सिंहाक्रान्तेव मुनयधूः ॥ १०५.१ ॥

रज्ञाः कामिनी ॥ १०६ ॥

रजराः। यथा—

"यत्प्रसादतो जनयां, पुष्पसारको जगद्रम।
उद्भवन्नवीनविभ्रमाम्, स्त्रः स्वर्गमि इव कामिनीः ॥ १०६.१ ॥

नगणवर्णोत्तरन्यः ॥ १०६.१ ॥ ०।१९ ॥

---

1) भैमे भवद्रीनारीणाम् भैमेर्भवद्रिनारीणाम् मकरलतामङ्गिः मकरलतामङ्गिः। आर्द्राञ्जननयनाम्बोधेः आर्द्राञ्जननयनाम्बोधेः। आसूत्रि—जनि। मकरलतामङ्गिः—मकरलतामङ्गिः। 2) यत्प्रसादतो इत्यत्र पुष्पसारको इति—अनुवृ। विभ्रमा विभ्रमाः।

---

१ कुचतटे ब २ नव्या म

पङ्क्तौ मभसगा मत्ता यैः ॥ १०७ ॥

मभसगाः । यैरिति चतुर्भिर्यतिः[1] । यथा—

"आताम्रत्वं वपुषि दधानो, घूर्णन् पृथ्वीतलपतनेच्छुः ।
द्राग्वारुण्यां निहितकरोऽयं, मत्तावस्थां प्रथयति भानुः ॥ १०७.१ ॥

इयं च यद्यपि "वानवासिकायामन्तर्भवति तथापि विशेषसंज्ञार्थमुक्ता । एवमन्यत्रापि" ॥ १०७.१ ॥

रयजगाः पङ्क्तिका ॥ १०८ ॥

रयजगाः । यथा—

"भ्रूविलासदूरीकृतोल्लसत्-, कामकार्मुकां कान्तिशालिनीम् ।
मञ्जुगुञ्जिमञ्जीरराजितां, पश्य कामिनीपङ्क्तिकामिमाम् ॥ १०८.१

मस्जगाः शुद्धविराट्[2] ॥ १०९ ॥

"सम्यग्ज्ञानचरित्रपात्रतां, यो दध्रे भुवनैकवान्धवः ।
त्रैलोक्यस्पृहणीयतां गतः, सत्यं शुद्धविराडयं मुनिः ॥ १०९.१ ॥

मन्यगाः पणवो डैः ॥ ११० ॥

मनया गुरुश्च । डैरिति पञ्चभिर्यतिः । यथा—

"स्याद्वादामृतमुदिते चित्ते, शास्त्रोक्तिः कटुरितरा भाति ।
एवं संसदि चतुरङ्गायां, जल्पामो जयपणवं दत्वा ॥ ११०.१ ॥

कुवलयमालेति भरतः । केचित्तु यगणस्थाने सगणं मन्यन्ते ॥ ११०.१ ॥

रजगा मयूरसारिणी ॥ १११ ॥

रजरा गुरुश्च । यथा—

"या घनान्धकारेष्वरेषु, प्रीतमानसा विसर्पतीह ।
क्षोभयन्त्यपि क्षणाद्भुजंगान्, संत्यजेन् "मयूरसारिणीं ताम् ॥ १११.१ ॥

---

1) मानाम्रत्वमित्यत्र वारुण्यामिति—वरुणो देवता अस्याः सा वारुणी पश्चिमा, वरुणस्यमुद्रादागता वारुणी सुरा च तस्याम् । निहितकर इति—करः किरणो हस्तश्च । 2) वानवासिकायामन्तर्भवतीति—द्वादशाक्षरा वानवासिका । पादचतुष्टये द्वादशे नवमे च वर्णे वानवासिकेति भावः । 3) एवमन्यत्रापीति—यत्र पदेन तदादेः पदं समाप्यति तत्र विशेषसंज्ञार्थे न तृतीयाय । 4) भ्रूविलासेत्यत्र मञ्जुगुञ्जीति—मञ्जु मनोहरं यथा स्यादेवं गुञ्जन्ति ध्वनन्तीत्येवंशीलानि मञ्जीराणि नूपुराणि तैः राजितां शोभिताम् । 5) सम्यग्ज्ञानेत्यत्र शुद्धविराडिति—शुद्धः सन् विराजते । क्विप् । 6) स्याद्वादेत्यत्र चतुरङ्गायामिति—चतुर्षु वार्तिकेषु-सत्य-सत्यवचिष्कासु अङ्गासु सेनासु । जयपणवमिति—जयपटहम् । 7) या घनान्धकारेत्यत्र पक्षेषु निशिताति भयङ्करेष्वरेषु, पक्षे मेघान्धकारेष्वरेषु । क्षोभयन्तीति—अतिशयेन भुजंगान्भित्यत्र दीर्घः । भुजंगानिति—सर्पान्कारणान्, पक्षे सर्पान् । 8) मयूरसारिणीमिति—मयूरसारिणी सप्तभगीवेदोक्ता । कर्तुमिति—क्विप्प्रत्यय इति भावः । (मयूरसारिणीं मनिसारिकाम् Tippana in P.)

---

1 वा. dropped in A. 2 °तारिण्यां B. 3 Padd. मगणः । यथा 4 Corr. acc. to A. 5 °कटवरेषु A. 6 °सौभवणा B.

नज्भगास्त्वरितगतिः ॥ ११२ ॥

नजना गुरुश्च । यथा–

दिनकरपीतशुचिरुचिश्, चरमगिरेः शिखरतटीम् ।
अनुसरति त्रपित इव, त्वरितगतिः सितकिरणः ॥ ११२.१ ॥

भ्मस्गा रुक्मवती ॥ ११३ ॥

भमसा गुरुश्च । यथा–

ये विजितात्मानो नयनिष्ठाः, जाग्रति लोकं रक्षितुकामाः ।
स्यान्नियतं तेषां वसुधेयं, रुक्मवती मृन्मय्यपरेषाम् ॥ ११३.१ ॥

चम्पकमाला सुभावेति चान्ये । पुष्पसमृद्धिरिति भरतः ॥ ११३.१ ॥

भिगौ चित्रगतिः ॥ ११४ ॥

भत्रयं गुरुश्च । यथा–

"यस्य न कापि कला न मतिर्, न व्यवसायलवोऽपि तथा ।
सोऽपि कथंचन जीयति चेद्, दैवमिदं खलु चित्रगति ॥ ११४.१ ॥

निगौ निलया ॥ ११५ ॥

नत्रयं गुरुश्च । यथा–

"अपि सरिदधिपतिसुता, हरिमपि परिहरति यत् ।
अधमपुरुषकृतरतिं, धिगहह कमलनिलयाम् ॥ ११५.१ ॥

जिगावुपिता ॥ ११६ ॥

जत्रयं गुरुश्च । यथा–

"स किं वद नीचसमाश्रयो, न किं कथय क्षितिरुन्नते ।
न चापलमुज्झसि लक्ष्मि किं, न चेद् उषितो जलधामनि ॥ ११६.१ ॥

रः सौ गो मणिरङ्गः ॥ ११७ ॥

यथा–

धीमतां हि गुणो विशदधीर्, जायते गुणिसंगमवाप्य ।
शोभते नितरां न किमङ्गे, कुङ्कुमारुणिते मणिरङ्गः ॥ ११७.१ ॥

---

1) यस्य न कापीत्यत्र चित्रगतीति – चित्रा अद्भुता गतिः प्रकारो यस्य सः । 2) अपि सरिदधिपतीत्यत्र कमलनिलयामिति – लक्ष्मीम् । 3) स किं वदेत्यत्र उन्नत इति – उन्नते पुंसि । उषितो जलधामनीति – चतुर्थः पादः काव्य पठनीयः । मूलमुषितो जलधामनि । पूर्तिः कार्या । कल्पोच्चयम् । जडेति – जलस्थापि नीचसमाश्रयो भवति, उन्नते प्रदेशे स्थितिर्न भवति ।

---

१ शुभावा D २ चित्रगति ABCD ३ उषित्व A. ४ मणिरङ्ग BD.

भौ म्गौ बन्धूकम् ॥ ११८ ॥

भनमा गुरुश्च। यथा—

[1]एतदभिनवभास्वद्बिम्बं, शोणरुचिरुचिरं प्रागवध्याः।
शेखरितनवबन्धूकश्री-, बन्धुपदमधुना संधत्ते ॥ ११८.१ ॥

त्रज्गा मनोरमा ॥ ११९ ॥

नरजा गुरुश्च। यथा—

निखिलदीनदुःखदारिणी, सकलबन्धुसंविभागकृत्।
गुणिजनामृतार्णवोपमा, भवति सा रमा मनोरमा ॥ ११९.१ ॥

तो जौ ग उपस्थिता ॥ १२० ॥

यथा—

[2]एषा भवतः समराङ्गणे, राजन् जयसिद्धिरुपस्थिता।
कीर्तिः कुपितेव भवश्रिया, सद्योऽभिससार दिगन्तरम् ॥ १२०.१ ॥

अत्र द्वाभ्यां यतिरित्येके ॥ १२०.१ ॥

र्मस्गाः कलिका ॥ १२१ ॥

रमसा गुरुश्च। यथा—

कुन्दयष्टिं हृष्टः परिचुम्बन्, किं न रे रोलम्ब त्रपसे त्वम्।
तत्तथा येन प्रागनुरागात्, क्रीडितं मालत्याः[2] कलिकायाम् ॥ १२१.१ ॥

भद्गगा मृगचपला ॥ १२२ ॥

भतना[3] गुरुश्च। यथा—

[3]साधु समाधावविचलताम्, आश्रय हे मानस सततम्।
वाञ्छसि यद्यव्ययपदवीं, मा कुरु वृत्तिं मृगचपलाम् ॥ १२२.१ ॥

मो नौ गः कुमुदिनी ॥ १२३ ॥

यथा—

आसाद्य प्रियमिह शशिनं, निर्गच्छद्भमरकुलमिषात्।
मूर्तं[4] दुःखमिव विरहजं, तत्कालं वमति कुमुदिनी ॥ १२३.१ ॥

कुसुमसमुदितेत्यन्ये ॥ १२३.१ ॥

मः सौ ग उद्धतम् ॥ १२४ ॥

---

1) एतदभिनवेत्यत्र शेखरितनवबन्धूकेति—शेखरितानि शेखरीकृतानि च तानि नवबन्धूकानि च तेषां श्रीः शोभा तस्याः बन्धुपदं सादरत्वं साम्यमिति भावः। 2) एषा भवत इत्यत्र उपस्थितेति—प्रादुर्भूता। 3) साधु समाधाविलत्र अविचलतेति—स्थिरत्वं। अव्ययपदवीमिति—मोक्षमार्गम्।

---

१ मृता dropped in D. २ मालत्या N. ३ भतनगा यथा A. ४ पूर्तं A.

यथा—

[1]"सर्पद्भिस्तव दिग्जययात्रा-, स्वेभिर्देव तुरंगमसैन्यैः।
प्राज्यैरुद्धूतमध्वरजस्तां, वृद्धिं प्राप न वृन्दमरीणाम्॥ १२४.१॥

नज्यगा विपुलभुजा॥ १२५॥

नजया गुरुश्च। यथा—

[2]"रिपुवनिताजननिःश्वासैर्, अविरतमुष्णतरैः क्षान्ता।
भजति चुलुक्य जयश्रीस्ते, विपुलभुजाविटपिच्छायाम्॥ १२५.१॥

स्जसगा माला॥ १२६॥

सजसा गुरुश्च। यथा—

गगनाङ्गणे कुमुदपण्ड[2]-, श्रियमुद्वहन्ति निपतन्त्यः।
भवदीक्षणोत्सवसतृष्णाः, नृप सुभ्रुवां नयनमालाः॥ १२६.१॥

प्रमितेत्यन्ये॥ १२६.१॥ १०।२०॥

त्रि[3]ष्टुभि भौ रो गौ रोचकम्॥ १२७॥

यथा—

[4]"कुम्भभुवो जयतीह माहात्म्यं, तद्वडवामुखतेजसश्चापि।
यस्य जगत्प्रलय[4]प्रगल्भोर्मिः, अद्यति रोचकगोचरं सिन्धुः॥ १२७.१॥

रः सौ ल्गावच्युतम्॥ १२८॥

यथा—

त्वं दधासि विभो परमेष्ठिताम्, ईश्वरत्वमपि त्वयि राजति।
अच्युतत्वमपि त्वमुपश्रितः, कोऽपरस्त्वदृते जिन देवता॥ १२८.१॥

तिरगौ लयग्राहि॥ १२९॥

तगणत्रयं गुरुद्वयं च। यथा—

वीणानिनादानुवन्धेन हृद्यं, काञ्चीरणत्कारचित्रीयमाणम्।
नव्याङ्गहारप्रकाराभिरामं, दत्ते प्रमोदं लयग्राहि लास्यम्॥ १२९.१॥

---

1) सर्पद्भिरित्यत्र [यात्रासु एभिः] वृन्दमरीणामिति—वैरिणां वृन्दं वृद्धिं न प्राप किं तु स्वसैन्योत्थितं रजः वृद्धिं प्रापेति भावः। 2) रिपुवनितेत्यत्र क्षान्तेति—अन्यापि काचित् या स्त्री भवति सा तापेन पीडिता सती वृक्षं याति। 3) कुम्भभवो जयतीत्यत्र घटयोनेर्यद्वडवानलस्य च रोचकगोचरं बुभुक्षाविषयं सिन्धुरद्यति प्रकटीकरोति। कोऽर्थः। अगस्तिना जगत्प्रलयप्रगल्भोर्मिरपि समुद्रक्षुलुंचेन पीतो वडवाग्निना च शोषितः। नाम्नि पुंसि चेति णको, रोचकः।

---

१ क्रान्ता N. २ खण्ड AD. ३ तृष्टुभि AD. ४ प्रलय dropped in D. —५ लुंचेन DEP. ६ काश्चीक्वणत्कार P.

भिद्गौ दोधकम् ॥ १३० ॥

भत्रयं गुरुद्वयं च । यथा—

[1]पुष्करमम्बुदगर्जितधीरैः, श्रव्यमदो धकधोंकृतिनादैः ।
व्यञ्जितपाठकृतिध्वनिपाद-, न्यासमसाविह नृत्यति सुभ्रूः ॥ १३०.१ ॥

[2]उपचित्रेयम् ॥ १३०.१ ॥

सिल्गा विदुषी ॥ १३१ ॥

सत्रयं लघुगुरू च । यथा—

[3]कुरुते तरसा न हि चापलं, स्वयमेव न चार्थयते परम् ।
प्रकटं कुरुते न वियाततां, प्रमदा विदुषी भवतीदृशी ॥ १३१.१ ॥

भद्गा गौ श्रीर्डैः ॥ १३२ ॥

[4]डैरिति पञ्चभिर्यतिः । भतना गुरुद्वयं च यथा—

या सुजनानामुपकरणाय, प्रद्विषतां च प्रतिकरणाय ।
मानधनानां भवति नराणां, श्रीरितरा स्यात् परिकरमात्रम्[5] ॥ १३२.१ ॥

सान्द्रपदमित्यन्ये । रुचिरेति भरतः । यतिनियमाभावे इदमेव प्रत्यवबोधः ॥ १३२.१ ॥

तो जौ गार्वुपस्थिता ॥ १३३ ॥

यथा—

या मानमहाविषघूर्णिताङ्गी, नाभूत् कलयापि वशंवदा ते ।
लोलन्मलयानिलदोलितात्मा, प्रीत्या सविलासमुपस्थिता सा ॥ १३३.१ ॥

जस्ता गार्वुपस्थितम् ॥ १३४ ॥

जसता गुरुद्वयं च । यथा—

[6]शिलीमुखततिं सत्पक्षनादां, मुहुर्निदधतं[7] वाणासनाद्धे ।
पुरः शरदृतुं सप्रेक्ष्य राजन्, उपस्थितमरिस्त्वामेव मेने ॥ १३४.१ ॥

---

1) पुष्करमम्बुदेत्यत्र मृदङ्गं ध्रुवं कैः धकधोंकृतिनादैः । धकं नाम वादित्रं तस्य ये धोंकृतिनादास्तैः । पाठस्य कृती उपाध्यायः व्यञ्जितः पाठकृतिन उपाध्यायस्य ध्वनिः पादन्यासेन यत्र नृत्ये । एतत् क्रियाविशेषणम् । 2) उपचित्रेयमिति—रुपचित्रा । चगणचतुष्टये नवमगुरावुपचित्रा । 3) कुरुते तरसेत्यत्र वियाततां पटुताम् । स्त्रीणां हि स्वभावोऽयं हावभावादिना स्वविषयं पुरुषं करोति परं मुखेन तं न प्रार्थयति । 4) शिलीमुखततिमित्यत्र भ्रमरश्रेणिं बाणश्रेणिं च । सन्तौ पक्षनादौ यस्याः सत् पक्षनादो यस्य वा । वाणासेति—वाणपुष्प-बीजकृशयोरद्धे । पक्षे धनुषि ।

---

१ पाठकृति DNP. २ तनुते AP. ३ नजावौ K. ४ डैरिति DK. ५ P adds वानवासिदेवं. ६ गौ उप० K. ७ निदधां N.

मात् तौ गौ शालिनी वैः ॥ १३५ ॥

[2]मस्तद्वयं गुरुद्वयं च । [3]वैरिति चतुर्भिर्यतिः । यथा –

"ऊर्मीभङ्गीर्निर्मिमाणा धुनीनां, व्यातन्वाना वीरुधां लास्यलीलाम् ।
उज्जृम्भन्ते शालिनीवारपाक-, स्फारामोदाः शारदा वांयवोऽमी ॥ १३५.१ ॥

मभता गौ वातोर्मी[4] ॥ १३६ ॥

[5]वैरिति वर्तते । यथा –

"स्वच्छत्वूणां विपिनें[5] प्रस्थितानां, क्षिप्तः पांशुर्दृशि वातोर्मिकाभिः ॥
तापः सूर्येण च मूर्ध्नि प्रकीर्णः, को वा नास्कन्दति संप्राप्तभङ्गान् ॥ १३६.१ ॥

मो भौ गौ[6] वा ॥ १३७ ॥

वातोर्म्या एव लक्षणान्तरम् । [7]वैरिति [8]वर्तते । यथा –

"घोराकारा घनघोपविशेषा, दूरोत्क्षिप्तक्षितिरेणुविमिश्रा ।
लोकक्षोभं सहसा विदधाना, वातोर्मीयं कुरुते जगदन्धम् ॥ १३७.१ ॥

मभ्नल्गा भ्रमरविलसितम् ॥ १३८ ॥

मभना लघुगुरू च । [9]वैरिति वर्तते । यथा –

"प्रत्याख्यातापि कमलवनं, यातो तत् किं करतलचलनैः ।
मुग्धे विद्धि स्फुटकमलधिया, वक्त्रापातिभ्रमरविलसितम् ॥ १३८.१ ॥

"वानवासिकेयम् ॥ १३८.१ ॥

नौ सो गौ वृन्ता[10] ॥ १३९ ॥

वैरिति वर्तते । यथा –

जिनपतिगुरुपदपीठे यो, ऽशठमतिरिह लुठति प्रीत्या ।
विगलति निखिलमघं तस्मात्, परिणतफलमिव वृन्तान्वात् ॥ १३९.१ ॥

न्यभा गौ पतिता वैः ॥ १४० ॥

नयभा गुरुद्वयं च । वैरिति षड्भिर्यतिः" । यथा –

---

1) ऊर्मीभङ्गीरित्यत्र ऊर्मी कल्लोलः । धुनीनां नदीनाम् । व्यातन्वानाः कुर्वाणाः । शालिनीवारपाकेति – उक्षाः शालयोऽनुप्ता नीवाराः । यद्वा शालिनः शोभना ये नीवारा वनव्रीहयः इति वा कार्यम् । एतावता त्रिधा वायुवर्ण्यते शीतो मन्दः सुगन्धिश्च । 2) स्वच्छत्वूणामित्यत्र वातोर्मिकाभिर्वातमण्डलीभिः । नास्कन्दति न पीड[य]ति । 3) घोराकारेत्यत्र घोरो भयङ्करः आकारो यस्याः सा, महद् घोषवती । 4) प्रत्याख्यातापीत्यत्र निराकृतापि । यदीति शेषः । यातेति – प्राप्ता । चलनैरिति – निक्षेपैः । 5) वानवासिकेयमिति – मत्तमुखश्रीगन्धो नयमे द्वादशे च ले सति वानवासिका । एतद्भेदविशेषाद् भ्रमरविलसितस्य ।

---

१ मातौ N; मतौ A २ मतद्वयं N ३ वातोर्मी वै G. ४ वैरिति चतुर्वर्तते A. ५ विपिने N. ६ गौ वैर्वा G. ७ इति च वर्तते B. ८ विशेषाद् NP. ९ 'सितं वै. GH. १० वृन्तं A; वृन्ता वैः GH. ११ मातो D.

[1]वहति न मन्दं दक्षिणवायुर्, भ्रमति न तूर्णं चूतपरागः ।
दधति न पिक्यः पञ्चमरागं, किमु पतिता त्वं पादतलेऽस्य ॥ १४०.१ ॥

रनरल्गा रथोद्धता ॥ १४१ ॥

रनरा लघुगुरू च । यथा–

तावकीनकटके रथोद्धताः, धूलयो जगति कुर्युरन्धताम् ।
चेदिमाः करिघटा मदाम्भसा, भूयसा प्रशमयेन्न सर्वतः ॥ १४१.१ ॥

[2]अपरान्तिकेयम् ॥ १४१.१ ॥

रनभा गौ स्वागता ॥ १४२ ॥

रनभा गुरुद्वयं च । यथा–

वल्लभं सुरभिनिःश्वसनज्ञं, दाक्षिणात्यपवनं सुहृदं च ।
पृच्छतीह परपुष्टविघुष्टैः, स्वागतानि नियतं वनलक्ष्मीः ॥ १४२.१ ॥

नौ रल्गा भद्रिका ॥ १४३ ॥

नद्वयं रो लघुगुरू च । यथा–

परिहर नितरां परापदं, कुरु जिनवचनेऽनुरागिताम् ।
इति तव चरतः परे भवे, भवतु सपदि भद्रिका गतिः ॥ १४३.१ ॥

अपरवक्त्रमिति भरतः । [3]उत्तरान्तिकेयम् ॥ १४३.१ ॥

रज्रल्गाः श्येनी ॥ १४४ ॥

रजरा लघुगुरू[4] च । यथा–

भ्रान्तगृध्रवृन्दकङ्कमण्डल-, श्येनिका त्वदीयवैरियाहिनी ।
आपतत्कृतान्तरौद्रकिंकर-, व्याकुलेव लक्ष्यते क्षमापते ॥ १४४.१ ॥

निःश्रेणिकेत्यन्ये ॥ १४४.१ ॥

[4]नो जौ ल्गौ सुमुखी ॥ १४५ ॥

यथा–

कनकरचितघनपीनकुचा, मनसिजविभ्रमकेलिगृहम् ।
चलनयना नवकुन्ददती, न हरति कस्य मनः सुमुखी ॥ १४५.१ ॥

द्रुतपादगतिरिति भरतः ॥ १४५.१ ॥

---

1) वहति न मन्दमिति–प्रसरति । एतानि कामिन्याः भर्तुः पादपतने कारणानि । तदभावे पतितेति । 2) अपरान्तिकेयमिति–वैतालीयादेर्युस्यादजापरान्तिका । एतद्भेदत्वाद् रथोद्धतायाः । 3) उत्तरान्तिकेयमिति–वैतालीयादेरोजला । चारुहासिनीति–चारुहासिनी प्रत्यन्तरे । 4) नो जौ ल्गौ सुमुखीति–नन्वत्र एन्द्रोनाम्यात्परस्गुरेति ईद् न प्राप्नोति । अत्राह–शोभनं मुखं यस्याः सा अनिर्दिष्टा स्त्री, ततो ङीः । ततः सुमुखीव इदं एन्द्रः प्रधानत्वात् सुमुखी ।

---

१ सुरभिनीश्वसनज्ञं ADDOP. २ चारुहासिनीयं DOP; उत्तरा० । चारु- यं A. ३ ल्गौ च A. ४ वैरवाहिनी D.
५ एन्द्रो-

मस्जा गावेकरूपम् ॥ १४६ ॥

मसजा गुरुद्वयं च। यथा–

काष्ठे वा कनकेऽथवा मणौ वा, लोष्टे वा रमणीषु वा तृणे वा।
शापे वा स्तवनेऽपि वा वितृष्णं, साधूनां मन एकरूपमेव ॥ १४६.१ ॥

तो जौ ल्गौ मोटनकम् ॥ १४७ ॥

यथा–

"दन्तद्युतिधौतदिगन्तरया, रम्यं नवयौवनया विहितम्।
साचीकृतलोलविलोचनकं, दृष्टं भवता मुखमोटनकम् ॥ १४७.१ ॥

तभजलगा उत्थापनी ॥ १४८ ॥

यथा–

सर्पद्विपेन्द्रभरकम्पमही-, प्रभ्रश्यदद्रिशिखरध्वनिभिः।
अम्भोधिमध्यशयितस्य हरेर्[1], उत्थापनी जयति ते[1] पृतना ॥ १४८.१ ॥

तो नौ ल्गौ मुखचपला ॥ १४९ ॥

यथा–

"आकाङ्क्षसि यदि सुखमसमं, जन्मापि विमलमिह मनुषे।
नागीमिव निरवधिकुटिलां, नारीं परिहर मुखचपलाम् ॥ १४९.१ ॥

न्यनल्गाः कमलदलाक्षी ॥ १५० ॥

नयनलगाः[2] यथा–

विरहनिदाघः सुभग दृढाद्, अतिशयदीर्घीकृतदिवसः।
कृतगुरुतापः कृशयति तां, कमलदलाक्षीं सरितमिव ॥ १५०.१ ॥

रुचिरमुखीति भरतः ॥ १५०.१ ॥

स्मनल्गा विमला ॥ १५१ ॥

समनलगाः। यथा–

शरदायातेयं गगनमणेर्, इव तेजः प्रौढिं तव भजताम्।
नृप कीर्तिर्ज्योत्स्नां तुहिनरुचेर्, इव दिक्षु भ्राम्यत्यतिविमला ॥ १५१.१ ॥

नस्ला गावशोका ॥ १५२ ॥

नसना गुरुद्वयं च। यथा–

---

1) दन्तद्युतीति – साचीकृतेति चक्रीकृतम्। 2) आकाङ्क्षसीत्यत्र मुखचपलामिति – वाचालाम्।

---

१ मणौ वा A. २ शिखाध्व० A. ३ सा पृ० N; ४ D drops नयनलगाः to कमलदलाक्षी.
५ विहरनि० N. ६ कथयति APB. ७ तेजः प्रौढं N. ८ कीर्तिर्ज्योत्स्ना AC. ९ नस्ला P.

[1]अलिवलयहुंकृतिभिरुच्चैः, इयमिह निषेधति भवन्तम्।
वनभुवमितः पथिक मा गाः, कुसुमितसमुल्लसदशोकाम् ॥ १५२.१ ॥

सज्या लगौ सारणी ॥ १५३ ॥

सजयलगाः। यथा—

मदनेत्रिलोचनभालाग्निना, ज्वलितः क्षणादिह जीवेत् कथम्।
त्रिवलीतरंगभ्रुपः स्युर्न चेद्, रससारसारणयः सुभ्रुवः ॥ १५३.१ ॥

तौ जो गाविन्द्रवज्रा ॥ १५४ ॥

यथा—

स्वस्वागमाचारपरायणानां, पुण्यात्मनां यैः कुरुते विरुद्धम्।
क्षोणीभुजस्तस्य भवत्यवश्यं, रौद्रेन्द्रवज्राभिहतस्य पातः ॥ १५४.१ ॥

जतजा गावुपेन्द्रवज्रा ॥ १५५ ॥

यथा—

[2]दधासि धात्रीं विदधासि दुष्ट-, क्षमाभृतां निर्दलनं प्रसह्य।
कुमारपाल क्षितिपाल कस्त्वम्, उपेन्द्रवज्रायुधयोस्तदत्र ॥ १५५.१ ॥

एतयोः परयोश्च संकर उपजातिश्चतुर्दशधा ॥ १५६ ॥

एतयोरिन्द्रवज्रोपेन्द्रवज्रयोः संकरोऽन्योन्यपादमीलनमुपजातिः। सा च प्रस्तारभेदाच्चतुर्दशधा। एवं परयोरिन्द्रवंशा-वंशस्थयोः संकरः उपजातिश्चतुर्दशधैव। स्थापना"।

ऽ।।, ।ऽ।, ऽऽ।, ।।ऽ, ऽ।ऽ, ।ऽऽ, ऽऽऽ, ।।।ऽ, ऽ।।ऽ, ।ऽ।ऽ, ऽऽ।ऽ, ।।ऽऽ, ऽ।ऽऽ, ।ऽऽऽ,

आद्यभेदोदाहरणं यथा—

प्रायः पुमांसोऽभिनवार्थलाभे, गुणोज्ज्वलेष्वप्यकृतादराः स्युः।
अवाप्य कुन्दं मधुपो हि जह्ये, गतोपजातिभ्रमणाभिलाषः ॥ १५६.१ ॥

एवमन्येष्वप्युदाहार्याः। समवृत्तप्रस्तावेऽप्युपजातीनामुपन्यासो लाघवार्थः॥ १५६.१ ॥

सर्वजातीनामपीति[4] वृद्धाः ॥ १५७ ॥

सर्वजातीनां उक्तादीनां प्रायो गायत्र्यादीनां इतः परासां जगत्यादीनां "कृतनामाकृतनामविसदृशप्रस्तारूपस्वस्वपादानां स्वल्पभेदानां संकरः उपजातिरिति बहुश्रुताः प्राहुः। यथा त्रिष्टुभः स्वप्रस्तारेण—

---

1) अलिवलयेति भवन्तमिति—कंचिद् पथिकं वनलक्ष्मीः निषेधयति। 2) दधासि धात्रीमित्यत्र क्षमाभृतामिति—राज्ञां गिरीणां च। कस्त्वमिति—क इव। नारायण-पुरंदरयोस्तदत्र संग इति मन्ये। 3) स्थापनेति—अनेनैतावता वर्णेन पादरूपनम्। यदि गुरुस्था इन्द्रवज्रायाः पादः। तत्र हि जगणाद् आद्यो वर्णो गुरुः। लघुर्भवेदुपेन्द्रवज्रायाः पादः। तत्र हि जगणाद् आद्यो वर्णो लघुः। अनुयं प्रस्तेषु आद्यान्तिमभेदयोर्भेदेषोरयं प्रस्तारः समाप्यति। आद्यभेदस्य इन्द्रवज्रारूपत्वादन्त्यभेदस्योपेन्द्रवज्रारूपत्वाद्योर्भेदनम्। 4) इत्यवानाकृतनामेति—विसदृशप्रस्तारूपाः स्वस्वपादा यस्याम्। एकैकाक्षरैः न बहुभिः।

---

१ सारिणी B.III. २ दमनः K. ३ वर K. ४ यथा dropped in K. ५ तस्योरुद्रि- K. ६ अपि इत्थं बहुः H.

[1]"कामे कमाहिँ कमियं गु दुक्खं, छिंदाहि दोसं विणेप्पज्ज रागं ॥ १५७.१ ॥

तथा—

[2]"सकारए सिरसा पंजलीओ, कायग्गिरा भो मणसा य निच्चं ॥ १५७.२ ॥

परजातिप्रसारेण यथा—

[3]"युधिष्ठिरो धर्ममयो महाद्रुमः, स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखा।
माद्रीसुतौ पुष्पफले समृद्धे, मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च ॥ १५७.३ ॥

[4]"जे आवि मंदेत्ति गुरुं विइत्ता, डहरे इमे अप्पसुयत्ति नच्चा ॥ १५७.४ ॥ ११।३० ॥

जगल्यां तौ त्रावेन्द्रवंशा ॥ १५८ ॥

ततजराः। यथा—

[5]"दारेषु सुग्रीवकपीश्वरस्य यद्, रागानुबन्धं सहसा व्यपञ्चयः।
तत् ते प्लवंगाधिपते किमुच्यते, ह्यन्तेन्द्रवंशानुगुणं त्वया कृतम् ॥ १५८.१ ॥

जतज्रा वंशस्थम् ॥ १५९ ॥

यथा—

पुरूरवोनाहुषिपूरवः पुरा, दधुर्धरां धारयतेऽधुना भवान्।
अपूर्वमेतच्चरितं न तावकं, वदन्ति वंशस्थमिदं महीपते ॥ १५९.१ ॥

वसन्तमञ्जरी, अर्भवंशा चेत्यन्ये ॥ १५९.१ ॥

नभज्याः कलहंसा ॥ १६० ॥

यथा—

[6]"गुणलवेऽपि सुभग प्रियसख्या, गुणिकथाक्रमवशात् प्रकृते ते।
घटयते किमपि नाटितलज्जा-, कृतकमाशु सुतनुः कलहं सा ॥ १६०.१ ॥

द्रुतपदा, मुखरं चेत्यन्ये ॥ १६०.१ ॥

रनभसाश्चन्द्रवर्त्म ॥ १६१ ॥

रनभसाः। यथा—

[7]"सैंहिकेयभयविह्वलमनसः, स्वप्रभाभिरिह दक्षमुनिसुताः।
नाममात्रमपि सोढुमपटवश्, चन्द्रवर्त्म रचयन्ति हृतत्तमः ॥ १६१.१ ॥

---

1) (हिं इति यद्यपि अनुस्वाराद्यैर्योऽस्ति तथाप्यत्र प्रस्तारे हिं इत्यक्षरस्य लघुत्वं प्रस्तार्यम् Tippana in B.) कामे कमाहीति अकृतनाम। छिंदाहीति इन्द्रवज्रायाः पादः। 2) सकारएत्ति अकृतनाम। कायग्गिरेति इन्द्रवज्रापादः। 3) युधिष्ठिरो धर्मेति वंशस्थपादः। स्कन्ध इति लयग्राहिपादः। यतः तिर्यो लयग्राहि। माद्रीसुताविति—नकुलसहदेवौ। इन्द्रवज्रा। मूलमिति शा[लि]नीपादः॥ 4) जेआविति इन्द्रवज्रापादः। डहरेत्ति केकिरवच्छन्दः। 5) दारेषु सुग्रीवकपीश्वरस्येत्यत्र हे वालिन् इन्द्रोऽपि पुरा अहल्याभ्यायां ऋषिपत्न्यां लुब्धोऽभूत् त्वमसि इन्द्रपुत्र इति तवेदं युज्यत इति भावः। 6) गुणलवेपीत्यत्र प्रकृते प्रारब्धे। नाटितलज्जेति—अभिनयविषयं प्रापिता वृथा यथेति सा। कृतकमिति—कृत्रिमम्। 7) सैंहिकेयेत्यत्र दक्षमुनिसुताः २७ तारकाः। हृततम इति—तमः शब्देन राहुर्भण्यते।

---

१ कमाहि ACDN. २ पिणइज्ज A; पिणइज्ज P. ३ पंजलिओ A. ४ इ A. ५ जे वावि P. ६ मंदेति A; मंदेति B. ७ विइत्ता A. ८ निच्चा P. ९ नाणुपि ADP. १० अभवंशा A. ११ सोढमप० A.

सीस्तोटकम् ॥ १६२ ॥

सीरिति चत्वारः सगणाः। यथा—

[1]"परलोकविरुद्धैकुकर्मरतं, बहिरार्जवमादधतं कुटिलम्।
विषकुम्भमिवेद्धसुधापिहितं, त्यज मित्रमतोटकतैकगुणम् ॥ १६२.१ ॥

[2]"मात्रासमकमिदम् ॥ १६२.१ ॥

नभभ्रा द्रुतविलम्बितम् ॥ १६३ ॥

यथा[1]—

परुषसान्द्रवचोरचनाञ्चिता, रुदितहासविलोलविलोचना।
[2]"अवचनं कथयत्यतिरागितां, द्रुतविलम्बितचित्रगतेरियम् ॥ १६३.१ ॥

हरिणप्लुतमिति भरतः ॥ १६३.१ ॥

नौ म्यौ पुटो जैः ॥ १६४ ॥

ननमयाः। जैरित्यष्टभिर्यतिः। यथा—

[1]"तरलत्वणिमाम्भःपूर्णकुम्भी, सुचरितफलपाकोल्लासवल्ली।
सुतनु तव विराजत्यङ्गसंगान्, नयनपुटनिपेया यौवनश्रीः ॥ १६४.१ ॥

नौ म्रौ ततम् ॥ १६५ ॥

ननमराः। यथा—

नवयसि वियुक्तानां योषितां, प्रिय कथय निराशानां का गतिः।
त्वमपि सुभग गन्ता देशान्तरं, गगनमपि च मेघव्यूहैस्ततम् ॥ १६५.१ ॥

नौ भ्रावुज्ज्वला ॥ १६६ ॥

ननभराः। यथा—

विनयितमनसोऽपि निरन्तरं, वत विदधतु किं नु विवेकिनः।
नयनगतिरियं हि सुदुःसहा, चकितमृगहगामहोज्ज्वला ॥ १६६.१॥

चलनेत्रेत्यके ॥ १६६.१ ॥

तीः कामावतारः ॥ १६७ ॥

तीरिति चत्वारस्तगणाः। यथा—

[1]"मध्ये नताङ्ग्या नग्ना रोमराजीति, यन्मन्यते मुग्धलोको न वत् किं तु।
तुङ्गस्तनास्थानिकाकुट्टिमारूढ-, कामावताराय निःश्रेणिकां विद्धि ॥१६७.१॥

---

1) परलोकेत्यत्र अतोटकस्यैकगुणमिति—न कलहकरीति तुटतीति अतोटकं तस्य भावः अतोटकत्वं एवं सुखे यस्मात्। कलहकारिता एकगुण इति भावः। त्यज मित्रमिति पाठे भादधतं इति विशेषणं न घटते मित्रगतस्य संयुक्तासाधारणगुणकत्वे। तस्मादयं भ्रष्टपाठ इति सुधीः पाठः। 2) मात्रासमकमिदमिति—अत्रमुपलक्षणम्। 3) भवचनं क्रियाविशेषणम्। 4) तरलत्वणिमेति—चञ्चलं मनोहरं तरुणं पयसस्य कुम्भी। सुचरितफलेति—पक्वोऽनुभवः। 5) मध्ये नताङ्ग्या इति—मध्ये पतिव्रतगुणः। आस्थानिकेति—आस्थानशाला।

---

१ सिद्धः ३० A. २ नभनरा नवा P. ३ भवीरागां K. ४ पूर्णकुम्भा A. ५ उच्चस्तिकां K. ६ तु BKP; dropped in A. ७ चरणे. PK. ८ नभीलगः A. ९ निःश्रेणिकं K.

न्यौ न्यौ कुसुमविचित्रा ॥ १६८ ॥

नयनयाः । यथा –

सरसिजवक्त्रा कुवलयनेत्रा, विकचजपोष्ठी विचकिलदन्ता ।
श्यमनुरूपा चनु कुसुमेषोः, जयति धनुःश्रीः कुसुमविचित्रा ॥ १६८.१ ॥

इयं मदनविकारा गजलुलितं वा अन्येषाम् ॥ १६८.१ ॥

जसजसा जलोद्धतगतिश्चैः ॥ १६९ ॥

जसजसाः । चैरिति षड्भिर्यतिः । यथा –

[1]विकसितकुसुमं सदाफलयुतं, निसर्गशिशिरं [2]तटे विटपिनम् ।
निपातितवती हृदा [3]सरिदियं, निकामकलुषा जलोद्धतगतिः ॥ १६९.१ ॥

यीर्भुजंगप्रयातम् ॥ १७० ॥

यीरिति चत्वारो यगणाः । यथा –

[4]न सूरिः सुराणां गुरुर्नासुराणां, पुराणां रिपुर्नापि नापि स्वयंभूः ।
सला एव विज्ञाश्चरित्रे सलानां, भुजंगप्रयातं भुजंगा विदन्ति ॥ १७०.१ ॥

अम्रमेयेति भरतः ॥ १७०.१ ॥

रीः स्रग्विणी ॥ १७१ ॥

रीरिति रगणाश्चत्वारः । यथा –

[5]तारकामल्लिकोन्मालिकामालिनी, चारुचन्द्रप्रभाकेतकीशालिनी ।
भोगभाजां भुजंगेश्वराणां प्रिया, सेयमुज्जृम्भते शर्वरीस्रग्विणी ॥ १७१.१ ॥

पद्मिनीति भरतः ॥ १७१.१ ॥

जीर्मौक्तिकदाम ॥ १७२ ॥

जीरिति जगणाश्चत्वारः । यथा –

[6]समाधिपयोधिनिमग्नमदीनम्, अनीहमकाममवाममनाधि ।
जिनेन्द्रं मनो मम वाञ्छति नाम, न विभ्रमधाम न मौक्तिकदाम ॥ १७२.१ ॥

मीः कल्याणम् ॥ १७३ ॥

मीरिति मगणाश्चत्वारः । यथा –

---

1) विकासिकुसुममित्यत्र एवंविधं वृक्षं निपातिवती । बबरा अन्योत्किरभ्रूद्या । 2) न सूरिः सुराणामित्यत्र बृहस्पतिः । पुराणां रिपुरित्यन्धः । भुजंगप्रयातमिति – प्रयातं गतिम् । 3) तारकेत्यत्र मालिः नीति – मलमल्लिपारणे । भोगभाजामिति – पद्मे सर्पाणाम् । स्रग्विणीति – मालावती । 4) समाधिपयोधिनिमग्नमित्यत्र नामेति – कोमलामन्त्रणे । विभ्रमधामेति – विलासगृहम् । मौक्तिकदामेति – मुक्ताफलहारम् ।

---

१ जपौष्ठी ABCD. २ विकसि० AP. ३ तटविट० A; तटे विपिनं C. ४ सरदियं A. ५ मालिका-मल्लिका A. ६ जितेन्द्र A.

[1]आदिस्रष्टा यः सर्वेषां सन्मार्गाणां, प्रत्यादेष्टा यः पापानां त्रैलोक्येऽस्मिन्।
तत्त्वज्ञानात् संसाराब्धेः प्राप्तः पारं, दिश्याद् देवः श्रीनाभेयः कल्याणं सः॥१७३.१॥
काञ्चनमिदमिति कश्चित्॥ १७३.१॥

नाद् भज्राः प्रियंवदा॥ १७४॥

नगणात् परे भजराः। यथा—
[2]प्रणयतत्परमिमं सखि प्रियं, मधुरमालप मयैव शिक्षिता।
विधुरिता समदकोकिलारवैर्, यदि भविष्यसि मधौ प्रियंवदा॥ १७४.१॥
मत्तकोकिलमित्यन्ये॥ १७४.१॥

ताल्ललिता॥ १७५॥

तगणात् परे[1] भजराश्चेत् तदा ललिता। यथा—
[3]ग्रामेऽत्र पाप कलहंसतां दधद्, धत्से त्रपां नहि किमन्ध भाव्यताम्।
रम्यं वपुर्न मधुरं न ते रुतं, रे काकपाक ललिता न वा गतिः॥ १७५.१॥

स्जौ सौ प्रमिताक्षरा॥ १७६॥

सजौ सद्वयं च। यथा—
बहुभिः किमालैलपितैः कुधियां, सरसाभिधेयघटनारहितैः।
[4]रसभावभावितधियां हि वरं, प्रमिताक्षराऽपि रचनाऽर्थवती॥ १७६.१॥
चित्रेयम्॥ १७६.१॥

मौ यौ वैश्वदेवी डैः॥ १७७॥

डैरिति पञ्चभिर्यतिः। यथा—
[5]जिष्णुर्वित्तेशो धर्मराजः प्रचेताः, ईशः श्रीनाथस्तेजसां धाम चेति॥
यत् त्वं प्रख्यातः श्रीचुलुक्यक्षितीश, मूमस्तेनेयं वैश्वदेवी तनुस्ते॥ १७७.१॥
चन्द्रकान्तेत्यन्ये॥ १७७.१॥

म्मौ स्मौ जलधरमाला घैः॥ १७८॥

मभसमाः। घैरिति चतुर्भिर्यतिः। यथा—

---

1) आदिस्रष्टेत्यत्र प्रत्यादेष्टेति—विराजां। 2) प्रणयतत्परमित्यत्र शिक्षितेति—भानीव पादे पतिते भाक्षेत्यादि कथिते सति। मा तां किं मां शिक्षयसि। उपालम्भे इदं पदं योज्यम्। 3) ग्रामेऽत्रेत्यत्र पापेति—हे पापिन्। भाव्यतामिति—लभ्याम्। भाव्यतामिति—पर्यालोच्यताम्। काकपाक बायसशिशो। बायसशिशोरन्यत्वोक्तिः। 4) रसभावभावितधियामित्यत्र प्रमिताक्षरेति—सरसार्थरचनारहिता श्लोकाश्चरादयः। 5) जिष्णुर्वित्तेशो इत्यत्र जयतीति जिष्णुः, पदे इन्द्रः। वित्तस्य ईशः, पदे धनदः। धर्मस्य राजा, पदे यमः। प्रचेतसो वरुणस्य सः, पदे वरुणः। ईशः स्वामी, पदे शम्भुः। श्रीनाथो विष्णुः, पदे नारायणः। तेजसां सूर्यः, पदे सूर्यः। इति त्रिभिर्देवैश्च व्याप्तोऽसि, यत्त्वं पदं। वैश्वदेवीति—विश्वदेवसम्बन्धिनी वैश्वदेवी।

---

१ क्वचे ८. २ परतगणादेर् ८. ३ [ग्रामेत्यादि] ८, [ग्रामेत्यादि]. ४ [रसेत्यादि] ८. ५ [जिष्णुरित्यादि] ८.

त्वत्सेनाभिः कृतरिपुधामलोपे, दृष्ट्वा व्योम्नि स्फुरदुरुधूमस्तोमम्।
ग्रीष्मेऽप्युल्काः सपदि मयूरा राजन्, शङ्कायन्ते जलधरमालाभ्रान्त्या ॥ १७८.१ ॥
कान्तोत्पीडेत्यन्ये ॥ १७८.१ ॥

न्जौ भ्यौ नवमालिनी जैः ॥ १७९ ॥

नजभयाः। जैरित्यष्टभिर्यतिः। यथा—

"कलयति वैरिभूमिपतिलक्ष्मीं, परिमलहारिकीर्तिकुसुमौघम्।
सपदि ददाति तुभ्यमनवद्यं, नृप नवमालिनीयमसिलेखा ॥ १७९.१ ॥

न्जौ ज्रौ मालती ॥ १८० ॥

नजजराः। यथा—

"भ्रमर सखे व्रज यत्र सा प्रिया, कथय दशामिति मे तदग्रतः।
अभिनवपुष्पितरम्यमालती-, परिमलमुद्वसितं पिबाथवा ॥ १८०.१ ॥
वरतनुरित्यन्ये ॥ १८०.१ ॥

नौ रौ प्रमुदितवदना ॥ १८१ ॥

यथा—

"स्खलितवचसि भर्तरि भ्रूटिं, प्रियसखि घटयेत्यपि प्रेरिता।
अविदितरसविभ्रमा बालिका, प्रमुदितवदना भवत्युन्मुखी ॥ १८१.१ ॥
चञ्चलाक्षीत्यन्ये। गौरीत्यपरे ॥ १८१.१ ॥

सा प्रभा छैः ॥ १८२ ॥

सा प्रमुदितवदना छैः सप्तभिर्यतिश्चेत् प्रभा नाम। यथा—

प्रचुरविभवता नवं यौवनं, विमललवणिमा समग्राः कलाः।
सकलमपि सखे तदेतन्मुधा, यदि मृगनयना न हेमप्रभा ॥ १८२.१ ॥

न्जौ ज्यास्तामरसम् ॥ १८३ ॥

नजजयाः। यथा—

"सततविकाससमुद्भुरशोभं, सकलकलङ्ककलापरिमुक्तम्।
तव वदनं मदिराक्षि किमेवद्, भवति न तामरसं न च चन्द्रः ॥ १८३.१ ॥
कमलविलासिनीत्यन्ये ॥ १८३.१ ॥

---

1) कलयति वैरीत्यत्र अङ्गीकरोति। अन्या मालिनी परेषां अर्थं गृह्णाति तत एव एव कुसुमानि ददाति। इयं मालिनी शत्रूणां लक्ष्मीं लाति तुभ्यं चारुकीर्तिकुसुमौघं वितरति इति नवत्वमस्याः। 2) भ्रमरसख इत्यत्र दशामिति—दशामवस्थाम्। पिबाथवेति—तवापि मालतीरसं पिबतोऽन्तरायो भविष्यतीति पिब। 3) स्खलितवचसि इत्यत्र अन्यस्त्रीनामोच्चारणात् गोत्रस्खलितेऽपि कृते प्रियेण, अकुपितत्वेन उन्मुखी। 4) सततविकासेत्यत्र तामरस सततं विकासि चन्द्रश्च कलङ्कपरिमुक्तो न भवति।

---

१ प्युक्ताः N. २ हारी कीर्ति० N. ३ अविदित B. ४ अपर. A. ५ नजरया: P. ६ विरुद्ध AP.

जरा विभावरी ॥ १८४ ॥

जरजराः । यथा—

"पयोनिधेरवाप्य तोयसंपदं, मदाद् बलाहकेन पश्य यत् कृतम् ।
य एष तस्य हर्षकारणं सुतः, स एव संवृतो विभावरीपतिः ॥ १८४.१ ॥
वसन्ततत्वरमित्यन्ये ॥ १८४.१ ॥

रयन्याः कुमुदिनी ॥ १८५ ॥

रयनयाः । यथा—

"बोधितापि रम्यैः करनिकरैस्ते, ह्रासलेशमासादयति न यस्मात् ।
मुञ्च मुञ्च तस्मादिह नलिनीयं, रोहिणीपते हन्त कुमुदिनीतः ॥ १८५.१ ॥

भ्तौ न्सौ ललना डैः ॥ १८६ ॥

भतनसाः । डैरिति पञ्चभिर्यतिः । यथा—

"रम्यनितम्बां नवतनुलतिकां, संभृततृष्णां गजगतिरुचिराम् ।
विन्ध्यधरित्रीं तव नृप रिपवः, संप्रति भेजुर्न तु निजललनाम् ॥ १८६.१ ॥

नौ रयौ कामदत्ता ॥ १८७ ॥

ननरयाः । यथा—

"निकृतिकलुषया धिया वितीर्णं, बहुतरमपि निष्फलत्वमेति ।
सुकृतममृतकारणं प्रसूते, ध्रुवमिह कणिकापि कामदत्ता ॥ १८७.१ ॥

नो रिर्मेघावली ॥ १८८ ॥

रिरिति रगणत्रयम् । यथा—

स्तनितघोरघोषाट्टहासाकुला, तरलतारविद्युच्छटालोचना ।
विरहिणीजनप्राणघातोद्यता, नभसि राक्षसीयं न मेघावली ॥ १८८.१ ॥
वसन्तेति कश्चित् ॥ १८८.१ ॥

त्यौ त्यौ पुष्पविचित्रा ॥ १८९ ॥

तयतयाः । यथा—

"भ्राम्यद्भ्रमरव्याकीर्णोद्भुरगन्धा, मन्दारवती सन्तानप्रसवाढ्या ।
नाभेयजिनस्योद्दामा सुरनाथैर्, दिष्टया रचिता पूजा पुष्पविचित्रा ॥ १८९.१ ॥

---

1) पयोनिधेरित्यत्र संवृतः प्रच्छादितः । 2) बोधितापि रम्यैरित्यत्र ह्रासलेशमिति—विकासः ह्रासं च । कुमुदिनीत इति—इयं नलिनी यस्मात् ह्रासलेशमपि नासादयति तस्मात् मुञ्च मुञ्च इति सम्बन्धः । इतः प्रदेशे । 3) रम्यनितम्बामित्यत्र गिरिमध्यं नितम्बस्थलं च । पक्षे नवाः तन्व्यः कृशाः लतिकाः यस्याम् । संभृता पोषिता तृष्णाभिलाषः पिपासा च यया सा ताम् । 4) निकृतिकलुषयेत्यत्र निकृतिर्धिक्कारः । अमृतेति—मोक्षकारणम् । कामदत्तेति—इच्छया दत्ता । 5) भ्राम्यद्भ्रमरेत्यत्र दिष्टयेति—भाग्येन ।

---

१ कुमुदिनीव N. २ नि इत्त० AB. ३ द्वीपाकुला N.
४ छन्दो०

सा मणिमाला चैः ॥ १९० ॥

सा पुष्पविचित्रा चैः पड्भिर्यतिश्चेन्मणिमाला । यथा—

[1]"सन्तोषधनानां का नाम समृद्धिर्, चारित्रसुधाम्नां धिक्कामपिपासाम् ।
निर्बीजसमाधावास्तां सुरसौख्यं, जैनी यदि कण्ठे वाक् किं मणिमाला ॥ १९०.१ ॥

स्यौ स्यौ केकिरवम् ॥ १९१ ॥

सयसयाः । यथा—

[2]"पथिक प्रयाहि त्वरयैव नो चेत्, पुरतः समुज्जृम्भिणि मेघकाले ।
भवतो द्विजिह्वस्य हरिष्यतेऽसून्, समदध्वनत्केकिरवः प्रचण्डः ॥ १९१.१ ॥

निसौ ह्रीः ॥ १९२ ॥

निरिति नगणत्रयं सश्च । यथा—

[3]"सितमहसि धवलयति धरां, सुभग कुरु यदिह समुचितम् ।
तव विशदगुणहृतहृदया, ह्रियमपि परिहरति सुतनुः ॥ १९२.१ ॥

ज्सौ स्यौ कोलः ॥ १९३ ॥

जससयाः । यथा—

[4]"चुलुक्यनृपते त्वयि विभ्रति क्ष्मां, विहाय धरणीधरणप्रयासम् ।
पयोधिपुलिने रमतां यथेच्छं, स संप्रति चिराय पुराणकोलः ॥ १९३.१ ॥ १२।३६ ॥

अतिजगत्यां नतिगा उर्वशी ॥ १९४ ॥

नगणः तगणत्रयं गुरुश्च । यथा—

[5]"अजननियोंपितामकुल वंशे सतां,
मलिनिमानं स्वशीलेन यास्तन्वते ।
भगवतो वासुदेवात् प्रसूतापि हि,
त्रिदशवेश्यात्वमङ्गीचकारोर्वशी ॥ १९४.१ ॥

न्जौ ज्रौ गः सुवक्त्रा ॥ १९५ ॥

नजजरगाः । यथा—

[6]"हृतहृदयः खलु यद्विलासलक्ष्म्या,
रतिमपि पुष्पशरस्तृणाय मेने ।

---

1) सन्तोषधनेत्यत्र निर्बीजसमाधाविति – निरालम्बध्याने । 2) पथिकप्र(प्र)येति – पुरतः इति हेत्वलंकारोऽत्र । द्विजिह्वस्येति – द्वितीया विद्वा यस्याश्रवस्येत्यर्थः (कलत्रस्येत्यर्थः – Tippana in B) । 3) सितमहसीत्यत्र ह्रियमपीति – मित्रं प्राह । 4) चुलुक्येत्यत्र पुराणकोल आदिवराहः । 5) अजननियोंपितामित्यत्र अनुत्पत्तिरेव भूयात् । उर्वशी हि वासुदेवस्य ऊरौ जातेति श्रुतिः । 6) हृतहृदय इत्यत्र किलेति संभावनायाम् ।

---

१ मसिमलो A. २ केकीरवं N. ३ हृदहृदया B.

लवणिमवारितरंगिणी किलेयं,
हरति न साऽपि मुनेर्मनः सुवक्त्रा ॥ १९५.१ ॥
अचलेत्यन्ये ॥ १९५.१ ॥

भीगावङ्गरुचिः ॥ १९६ ॥

भचतुष्टयं गुरुश्च । यथा—

येन विधिप्रतिपक्षतयेव सदा,
ऽकारि कृतार्थक एव दरिद्रजनः ।
कस्य मुदं न ददाति नृपो भरतः,
सोऽङ्गरुचिप्रतिपिद्धसहस्रकरः ॥ १९६.१ ॥

म्नौ म्नौ गः प्रहर्षिणी गैः ॥ १९७ ॥

मनजरगाः । गैरिति त्रिभिर्यतिः । यथा—

"उत्प्रेङ्खन्त्रिदशधनुश्छलेन वर्षा-,
लक्ष्म्योद्यन्मणिरुचिचित्रतोरणस्रक् ।
पद्मेपोर्भुवनजयोत्सवैकचिह्नम्,
आबद्धा सपदि मनःप्रहर्षिणीयम् ॥ १९७.१ ॥

ज्भौ ज्भौ गो रुचिरा धैः ॥ १९८ ॥

जभसजगाः । धैरिति चतुर्भिर्यतिः । यथा—

"समुद्गसद्दशनमयूखचन्द्रिका-,
तरङ्गिते तव वदनेन्दुमण्डले ।
सुलोचने कलयति लाञ्छनच्छवि,
घनाञ्जनद्रवरुचिरालकावली ॥ १९८.१ ॥

म्तौ य्सौ गो मत्तमयूरम् ॥ १९९ ॥

मतयसगाः । धैरिति वर्तते । यथा—

"प्रावृट्लक्ष्म्या निश्चितमत्रावतरन्त्याः,
सभूयाग्रे कल्पितकोलाहलमुच्चैः ।
जल्पन्तोऽमी हन्त निदाघापसरेति,
प्रातीहार्यं मत्तमयूराः कलयन्ति ॥ १९९.१ ॥

---

1) उत्प्रेङ्खदित्यत्र त्रिदशेति—विविधवर्णा । उल्लेखकचिह्नेति—वान्ते म्यक इति सूत्रेण गुरुत्वम् ।
2) समुद्गसदित्यत्र मयूखचन्द्रिकेति—चन्द्रकान्तेनाम । 3) प्रावृट्लक्ष्म्येत्यत्र सभूयेति—मिलित्वा ।

---

१ लक्ष्मोद्यन् ज. २ म्यूख० म.

नौ त्रौ गः क्षमा ॥ २०० ॥

ननतरगाः। घैरिति वर्तते। यथा—

[1]अयि जड यतिबन्धो किमङ्गशौचैः,
कचिदपि सुकृतं स्यान्मुधासि मूढः।
यदिह च परलोके च साधु तत्त्वं,
शृणु कुरु हृदयस्थां क्षमामजस्रम् ॥ २००.१ ॥

मौ जौ गः श्रेयोमाला ॥ २०१ ॥

घैरिति वर्तते। यथा—

[2]लक्ष्मीलीलागारं विनम्रपुरंदर-,
भ्राम्यद्भृङ्गश्रेणीकृतस्तवनध्वनि[3]।
नेत्रानन्दं ताम्राङ्गुलीदलबन्धुरं,
श्रेयोमालां दद्याज्जिनेन्द्रपदाम्बुजम् ॥ २०१.१ ॥

नौ तौ गः कुटिलगतिश्छैः ॥ २०२ ॥

छैरिति सप्तभिर्यतिः। यथा—

[3]यदसरलतरभ्रूर्विभ्रमालका,
कुटिलगतिरतिप्रौढवाग्वक्रिमा।
तदियमघटि भोः कौतुकात् कामिनी,
नियतमनृजुना केनचिद् वेधसा ॥ २०२.१ ॥
नर्तकीत्यन्ये ॥ २०२.१ ॥

नौ त्रौ गः क्ष्मा ॥ २०३ ॥

ननमरगाः। छैरिति वर्तते। यथा—

[4]त्वदरिमृगदृशामावासप्रदानाद्,
भयमिव परमं राजन् धारयन्तः।
प्रचलति भवतः सैन्ये दिग्जयार्थं,
प्रतिदिशमगमन् कम्पं क्ष्माभृतोऽमी ॥ २०३.१ ॥

---

1) अयि जडेत्यत्र यतिबन्धो इति—साध्वाभासवचनः ब्रह्मबन्धुवत्। 2) लक्ष्मीलीलेत्यत्र नेत्रानन्दमिति—नेत्राणि आनन्दयति नेत्रानन्दम्। 3) यदसरलेत्यत्र विभ्रमालकेति—वक्रभ्रमरालका। कुटिलेति—वक्रम्। अनृजुनेति—वक्रेण विधिना। 4) त्वदरिमृगदृशामित्यत्र त्वद्वैरिवनितागृहप्रदानादेव त्वत्सैन्ये प्रसरति सति अमी क्ष्माभृतः पर्वता. कम्पं दधुरिति भावः।

---

१ गा ১.২ मूढ AC. २ ध्वनि B ४ गतिरपि A. ५ नियतमघटि A. ६ क्ष्मा छै GH. ७ अगमत् N.

यमौ रौ गश्चन्द्रिणी चैः ॥ २०४ ॥

यमररगाः। चैरिति पड्भिर्यतिः। यथा—

[1]धराभारं विभ्रल्लीलया बाहुदण्डे,
जयत्येष श्रीमानूर्जितः क्षोणिनाथः।
भुजंगीभिर्गीतैरुज्ज्वलैर्यशोभिः,
बभूव श्रोद्दामैश्चन्द्रिणी नागभूमिः ॥ २०४.१ ॥

नौ यौ गश्चन्द्रिका ॥ २०५ ॥

ननरयगाः। यथा—

[2]निखिलकुवलयप्रपञ्चितानन्दा,
परिणतशरकाण्डपाण्डुरच्छाया।
इह जगति चुलुक्यचन्द्र निस्तन्द्रा,
प्रसरति तव कीर्तिचन्द्रिका नित्यम् ॥ २०५.१ ॥

जतौ स्जौ गो मञ्जुभाषिणी ॥ २०६ ॥

जतसजगाः। यथा—

[3]नरेन्द्र रुष्टे त्वयि महीभुजां मतिः,
नवे पृषच्चर्मणि न चित्रवर्मणि।
कटु कणन्ती लुठति शृङ्खला पद-,
द्वये न कान्तानुशयमञ्जुभाषिणी ॥ २०६.१ ॥

न्सौ रौ गश्चन्द्रलेखा ॥ २०७ ॥

नसररगाः। यथा—

सुभगसुखदं मोहजालं जनानां,
हृदयहरणं बन्धनं लोचनानाम्।
सुललितवपुः सा सखे पीयते ते,
[4]विरहतमसा चन्द्रलेखेव तन्वी ॥ २०७.१ ॥

न्सौ जौ गो लयः ॥ २०८ ॥

नसजजगाः। यथा—

त्वमसि शरणं प्रसीद जगत्पते,
वितर सुतरां मनेह समीहितम्।
चरणकमले जिनेश्वर तावके,
भवतु मनसश्चिरं परमो लयः ॥ २०८.१ ॥

---

1) धराभारमित्यत्र चन्द्रिणी चन्द्रा सन्त्यस्या इति चन्द्रिणी। 2) निखिलकुवलयेत्यत्र कुवलयेति—पृथ्वीमण्डल चन्द्रविकासिकमलं च। निस्तन्द्रेति—मोहत्यागा। 3) नरेन्द्र रुष्टे इत्यत्र पृषच्चर्मणीति—नूतनहरिणचर्मणि मतिरासीत्। अवमद्यमेवेति भावः। चित्रवर्मणीति—अनुपयोगमात्रे। 4) विरहतमसेति—विरहराहुणा।

न्सौ तौ गो विद्युन्मालिका ॥ २०९ ॥

नसततगाः । यथा–

"घनतमसि नष्टान् द्रष्टुमत्र[1] क्षणे,
निखिलपथिकान् संहारबुद्ध्या ध्रुवम् ।
यत परिगृहीताः प्रावृषा दीपिकाः,
स्फुरितरुचिविद्युन्मालिकाव्याजतः[2] ॥ २०९.१ ॥

स्जौ स्जौ गो नन्दिनी ॥ २१० ॥

सजसजगाः । यथा–

वसुधाधिपत्यमिह देव नार्थये,
जिननाथ नापि पुरुहूतसंपदम् ।
वरदोऽसि चेन्मम[3] तदा सदा मतिर्,
भवताद् भवद्गुणगणाभिनन्दिनी ॥ २१०.१ ॥

कनकप्रभा, जया, सुमङ्गलीति च केचिदाहुः । मनोवतीति भरतः ॥ २१०.१ ॥

न्जौ न्सौ गो मदललिता ॥ २११ ॥

नजनसगाः । यथा–

कलितकलङ्कशितिसिचयसंपत्,
करदलितेद्धतिमिरयमुनाम्बुः ।
प्रथयति गौरवपुरमृतरश्मिर्,
मुर्शलधरस्य "समदललितानि ॥ २११.१ ॥

स्जौ सौ गः कुटजम् ॥ २१२ ॥

सजससगाः । यथा–

परमं प्रकर्षमधिरुह्य विदध्यात्
किमिव प्रवासविषमस्थितिभाजाम् ।
कुरुते यतः प्रथमतोऽपि[4] "घनर्तुः
कुटजप्रसूनरजसा जगदन्धम् ॥ २१२.१ ॥
भ्रमर इत्यन्यः[5] ॥ २१२.१ ॥

---

1) घनतमसीति – निबिडान्धकारे । पक्षे घनस्य मेघस्य दुर्दिनम् । क्षणे इति – वर्षालक्षणकाले । ध्रुवमिति – शङ्के । यतेति – निन्दायाम् । व्याजत इति – छलात् । 2) समदललितेति – विलासक्रीडितानि । 3) घनर्तुरिति – मेघागमः ।

---

१ अनेक्षणे N. २ स्फुरिद रुचि N. ३ मम न तदा A. ४ मुरल० P. ५ प्रथमतो घनक्षतः A. ६ भ्र० अन्यः dropped in B.

नौ त्सौ गो गौरी ॥ २१३ ॥

नतसगाः । यथा—

ननु भव कुसुमेषो निशितशस्त्रस्
त्रणमसि यतिनोऽस्य प्रशमवृत्तेः ।
क्वचिदपि खलु तेऽन्ये मनसि येषां
निवसति [1]मृगनेत्रा कनकगौरी ॥ २१३.१ ॥

त्भौ स्जौ गो लक्ष्मीः ॥ २१४ ॥

तभसजगाः । यथा—

विद्वद्वृन्दैरुचितमुदीर्यते सदा
सिद्धेशनन्दन पुरुषोत्तमो भवान् ।
यत्त्वां स्वयंवरविधिनाभ्युपेयुषी
लक्ष्मीरियं [2]रणमकराकरोत्थिता ॥ २१४.१ ॥

त्भौ जौ गो अभ्रकम् ॥ २१५ ॥

तभजजगाः । यथा—

[3]अभ्यस्यतीव रसवादकलामयं
सान्ध्यैः[4] क्षणोऽभिमतचन्द्रमहोदयः ।
तारौषधिप्रकटनाभिरतः सखे
प्रोद्दीपयन् विविधवर्णमिहाभ्रकम् ॥ २१५.१ ॥

म्तौ स्त्रौ गः कोहुम्भो डैः ॥ २१६ ॥

मतसरगाः । डैरिति पञ्चभिर्यतिः । यथा—

लक्ष्मीः[5] कान्ताभिर्विकचनेत्रोत्पलाभिम्
ताम्बूलं[6] पत्रैः [7]परिणतैर्नवारैः ।
काव्यं कोहुम्भाभिधनवच्छन्दसेदं
चेतोहारित्वं भजति वेदग्ध्यभाजाम् ॥ २१६.१ ॥

---

1) मृगनेत्रेति—मृगस्य नेत्रे इव नेत्रे यस्याः सा मृगनेत्रा । 2) रणमकराकरोत्थितेति—संग्रामसमुद्रसमुत्थिता । 3) अभ्यस्यतीवेत्यत्र इवेत्युत्प्रेक्षायाम् । सान्ध्यागमयः सुवर्णभावनकलां शीलयति । कथंभूतः चन्द्रस्य महानुदयो यत्र सः । पक्षे चन्द्रं सुवर्णम् । तारः तारकाः, ओषधयस्तासां प्रकटनेऽभिरतः । पक्षे तारं रूप्यं ओषधिः । पुनः कथंभूतः अभ्रकं मेघं विविधवर्णं कुर्वन् । पक्षे स्वच्छपत्रमिति । 4) परिणतैरिति—पक्वैः ।

---

१ क्षण तृणमसि A; क्षतस्तृणमसि N. २ नारुपेयुषी A. ३ सान्ध्यक्षणो ABHP. ४ कोम्भो N; कोम्भो H; कोहुंभो P; कोहुंभो O. ५ लक्ष्मी का० A. ६ ताम्बूलैः N. ७ कोहुंभाभिध P. कोहुंभाभिध P.

स्यौ स्जौ गः सुदन्तम् ॥ २१७ ॥

सयसजगाः। यथा—

त्रिदिवं व्रजद्भिर्दिविषत्पतेः[1] पुरः
सुभटैर्जवान्निर्दलिता इवार्गलाः।
करवालघातैस्त्रुटितास्तदा समिद्-
वसुधासु दन्ताः करिणां चकाशिरे[2] ॥ २१७.१ ॥

नौ सौ गः कमलाक्षी ॥ २१८ ॥

यथा—

[1]विरचितनिविडतरोत्कलिकाभिः
कमिव नयसदजुरं न विद्ध्युः।
सपदि शरदि सरितः कलहंस-
प्रकटितगतिललिताः कमलाक्ष्यः ॥ २१८.१ ॥

नीगौ त्वरितगतिः ॥ २१९ ॥

नगणचतुष्टयं गुरुश्च। यथा—

[3]नृवर तव धनुरधिगुणं[3]
धनति च युधि भयवशतरला।
कलयति च पिचुनिचयतुलनां
त्वरितगतिरिन्द्रपतिपृतना ॥ २१९.१ ॥

लघुगतिश्चपला वेल्यन्ये[4] ॥ २१९.१ ॥ १३।२६ ॥

शक्वर्यौ नौ सौ ल्गावपराजिता छैः ॥ २२० ॥

ननरसलगाः। छैरिति सप्तभिर्यतिः। यथा—

[4]शशधरवदनं कुशेशयलोचनं
शुचिरुचिरुचिरं ललाटतटस्थितम्।
विशदकरुणयाधियासितमृद्धयो
जिनमनुसरतां भवन्त्यपराजिताः ॥ २२०.१ ॥

---

1) दिविषत्पतेः पुर इति—इन्द्रनगरस्येति भावः। समिद्वसुधेति—संग्रामधरणिषु। 2) विरचिते-त्यत्र रणरणकैर्वीचिभिश्च। कलहंसैः पक्षे कलहंसवत्। कमलान्येवाक्षीणि यासां ताः। नदीविशेषणेन कमलाक्षी-पदेन स्त्रियोऽप्याकृष्टाः। 3) नृवर तवेति—चकारद्वयं धननकलनयोस्तुल्यकालतायोतनार्थम्। पिचुशब्देन तूलम्। 4) शशधरवदनमित्यत्र भो भव्याः जिनं अनुसरतां पुंसां संपदोऽन्यापराजिता भवन्ति। कं चन्द्रवदनं कमलनयनम्। पु० कं ललाटेति—तदाज्ञाशिरसाङ्कितकरणात् करणाभावनम्।

---

१ गं A. २ चकासिरे AP. ३ अधिगुणं A. ४ वेलन्ये DFP. ५ स्थिति B.

म्सौ म्भौ गावलोला ॥ २२१ ॥

मसमभगगाः। छैरिति वर्तते। यथा—

आत्मारामपदैकव्यापाराभिरतानां,
संसाराब्धिरगाधस्तेषां गोष्पदमात्रम्।
अन्तस्तत्त्वसमाधेः प्राणायामनिरोधान्,
नासावंशनिपण्णा येषां दृष्टिरलोला ॥ २२१.१ ॥

नौ भ्रौ ल्गौ प्रहरणकलिता ॥ २२२ ॥

ननभनलगाः। छैरिति वर्तते। यथा—

[1]तव गुणनिकरैरपि दृढविपुलैः,
अहितसमुदयः सपदि नियमितः।
नरपतितिलक त्वमिह भुजलतां,
प्रथयसि किमसिप्रहरणकलिताम् ॥ २२२.१ ॥

नौ म्यौ ल्गौ करिमकरभुजा ॥ २२३ ॥

ननमयलगाः। छैरिति वर्तते। यथा—

[2]रणभुवि नृपते निस्त्रिंशदण्डेन ते,
रिपुभटकरटिप्रोन्माथिना भूम्भितम्।
जलनिधिजठरे पाठीनकूर्मावली-,
करिमकरभुजौर्वेणेव तेजस्विना ॥ २२३.१ ॥

नौ तौ गौ वसन्तः ॥ २२४ ॥

ननततगैगाः। छैरिति वर्तते। यथा—

[3]सखि भवति भवच्छ्रुपगण्डूपपाद-,
प्रतिहतिभिरियं यत्प्रसूनप्रसूतिः।
कुरवकवकुलाशोकमुख्यद्रुमाणां,
तदिह ननु तवायत्तसंपद् वसन्तः ॥ २२४.१ ॥

नन्दीमुखीत्येके ॥ २२४.१ ॥

म्रौ तौ गौ लक्ष्मीः ॥ २२५ ॥

मरततगगाः। छैरिति वर्तते। यथा—

---

1) तव गुणेत्यत्र यदि त्वद्गुणैरेव वैरिसमूहो वद्धः तदा किं त्वं सखीं भुजलतां ख्यातिं प्रापयसि गुणैरेव कार्यसंपादकत्वात्। 2) रणभुवीत्यत्र करिन् हस्तिन्। समुद्रमध्ये मत्स्यविशेषकच्छपश्रेणिगजमत्स्य-भुजा वडवानलेनेव। 3) सखि भवति इत्यत्र त्वदालिङ्गनसुखेन ताम्बूलच्छटादानात् पादप्रहारात् प्रत्येकं कुरवकवकुलाशोकाः पुष्पादिभाजो भवन्ति।

---

१ गोः पद० B. २ नाशावंश ADP. ३ किमपि प्रह० A. ४ रिपुतट० A. ५ the word is dropped in B and P. ६ कुरुवक P.
७ छन्दो०

"मामद्वैतानुरागां मन्यतेऽसौ वृणाये-,
त्येवं दौर्भाग्यदुःखोन्मूलनं चिन्तयन्ती।
मन्ये त्वत्खड्गधारां तद्भवं कर्तुकामा,
कामं सिद्धेन्द्रसूनो सेवते राजलक्ष्मीः॥ २२५.१॥

मो रौ सो ल्गौ जया॥ २२६॥

मररसलगाः। छैरिति वर्तते। यथा—

"माद्यद्गन्धद्विपानां लसद्दशनाशनि-,
क्रीडाघातैः समन्ताद् विदारितसानवः।
यस्योच्चैः सह्यविन्ध्योज्जयन्तहिमालयाः,
शैलाः शंसन्ति संप्रत्यपीह दिशां जयान्॥ २२६.१॥

भ्रम्यल्गा ज्योत्स्ना॥ २२७॥

मरमयलगाः। छैरिति वर्तते। यथा—

हृष्यत्तातालकुक्षौ स्फूर्जद्गुहायां गिरेर्,
मूर्च्छत्कान्तारमध्ये भूपाल घोरं तमः।
नागीनां किंनरीणां पौलिन्दवामभ्रुवां,
क्रीटागानेषु कीर्तिर्ज्योत्स्नाऽधुना हन्ति ते॥ २२७.१॥

नम्रसल्गाः सिंहः॥ २२८॥

नमरसलगाः। छैरिति वर्तते। यथा—

समदनागेन्द्राणां कपोलविपाटने,
स किल सद्योऽजिघ्रन् प्रियावदनाम्बुजम्।
वदिति शक्यं चित्रं चरित्रमहाद्भुतं,
हरिणपोतैर्द्रष्टुं न सिंहविजृम्भितम्॥ २२८.१॥

जसौ नौ गौ राजरमर्णायम्॥ २२९॥

जसरनगगाः। छैरिति वर्तते। यथा—

"समुद्भूतधरित्रीतलः प्रमुदितार्यो,
विनम्रत्वराराधनानुसृतपादः।

---

1) मामद्वैतेत्यत्र चिन्तयन्तीति—ध्यायन्ती। सिद्धेन्द्रसूनो हे कुमारपाल! राजलक्ष्मीरिति—एषाऽत्वा त्वत्खड्गे जयश्रीरिति भावः। 2) माद्यद्गन्धेत्यत्र नखानिवेत्रम्। सानवः पुनर्मुक्ताः कूटानि। संशंसन्ति सूचयन्ति। 3) समुद्भूतधरित्रीतलेत्यत्र शैलाधिराजवद् रमणीयत्वेन शोभसे। कथम्। समुद्भूतेति समानं विशेषणम्। पु० भार्यो गौरी, आर्याः सायकः। धारणा मेधाः। पक्षे नरमेगणश्च। तेनैव वा अनुसृताः पादाः पर्वतपर्वताः। त्रिपथगामिति—स्वर्गमर्त्यपातालगामिनीं गङ्गां च।

---

१ सिद्धेन्द्रसूनो ब. २ वन्द्यो० ए. ३ शंसन्ति ब. ४ समुद्भिदार्यो ब.

चुलुक्यनृप कीर्तिं दधद्विपथगां त्वं,
विभासि खलु शैलाधिराजरमणीयः ॥ २२९.१ ॥

म्तौ न्सौ गावसंबाधा डैः ॥ २३० ॥

मतनसगगाः । डैरिति पञ्चभिर्यतिः । यथा—

"नैतल्लक्ष्माङ्के किमुत कटुरसं वाधा-,
हेतुः संलीनं विषमिह सहजप्रीत्या ।
तेनायं मूर्च्छां विरचयति सुधारश्मिः,
शङ्के निःशङ्कः सपदि विरहिलोकानाम् । २३०.१ ॥

म्भौ जौ गौ वसन्ततिलका ॥ २३१ ॥

भजजगगाः । यथा—

[2]"सत्कर्णिकारचितविभ्रमभासमानां,
नव्यस्फुरद्रुचिरपत्रलतावलीकाम् ।
दिष्ट्या वसन्त तिलकाङ्घ्रिवचारुशोभां,
कान्तां वनश्रियमिमां त्वमुपागतोऽसि ॥ २३१.१ ॥

उद्गर्पिणी सैतवस्य । सिंहोन्नता काश्यपस्य ॥ २३१.१ ॥

स्नौ भौ गौ वलना ॥ २३२ ॥

रनभभगगाः । यथा—

[3]"नव्ययौवननटस्य तनोति नियोगं,
निश्चितं वरतनुर्विकसन्मुखरागा ।
हस्तकैरभिनयं कुरुते युवती यद्,
व्यश्नुतेऽङ्गवलनादि पदे पद एषा ॥ २३२.१ ॥
लतेत्यन्यैः ॥ २३२.१ ॥

त्रत्रल्गाः सुकेसरम् ॥ २३३ ॥

नरनरलगाः । यथा—

[4]"घटयसे ज्यया किमिति काम कार्मुकं,
यदभवत् पुरस्तव जगद् वशंवदम् ॥
मधुकरीनिनादमयमत्रमश्रितैर्,
जलरुहां सुकेसरपरागचूर्णकैः ॥ २३३.१ ॥

---

1) नैतल्लक्ष्माङ्के किमुतेत्यत्र सहजप्रीत्येति—उभयोः समुद्राजातत्वात् बान्धवत्वम् । 2) सत्कर्णिकारेत्यत्र कर्णिका कर्णिकारवृक्षे पक्षे कर्णिकारा वृक्षास्तत्र चिता मिलिता ये वयः पक्षिगस्तेषां भ्रमः । पक्षे विभ्रमो विलासः । पत्रलता पीलतिवलि उदरस्था त्रिवली । पक्षे पल्लवानां श्रेणी । तिलको वृक्षविशेषः । पक्षे पुष्पं च । कान्तां प्रियां मनोज्ञाम् । 3) नव्ययौवनेत्यत्र व्यश्नुते भजते । 4) घटयसे ज्ययेत्यत्र अन्यत्रापि पक्षीकरणं अभिमन्त्रितचूर्णकैर्मन्त्रीत्यर्थः ।

---

१ सिंहोदता P. २ अन्ये A. ३ घटयेज्यया N.

नीर् गावुपचित्रम् ॥ २३४ ॥

नीरिति नगणाश्चत्वारो गद्यं च। यथा—

[1]अनुसर हिमकरकिरणसमूहं,
भज नवकिसलयमृदुशयनीयम्।
प्रियसखि ननु शरदियमुपतस्थे,
यदभिसरति दिनपतिरुपचित्रम् ॥ २३४.१ ॥

नजभजलगा धृतिः ॥ २३५ ॥

नजभजलगाः। यथा—

[2]विहर नितम्बविम्बफलके सुदृशां,
गतनिधनानि संचिनु धनानि भृशम्।
रचय चिरं च सुन्दरनराधिपतां,
तदपि न किंचनास्ति तव चेन्न धृतिः ॥ २३५.१ ॥
मणिकटकमित्यन्ये[1] ॥ २३५.१ ॥

भौ रसलगा दर्दुरकः ॥ २३६ ॥

भभरसलगाः। यथा—

[3]मृत्युमुपैति यदा यदा कणशो दल-,
लेष तदापि न हन्त विश्वसनोचितः।
कालमवाप्य पुनर्जनश्रवणज्वरं,
दुर्जनदर्दुरकः करोति कटूक्तिभिः ॥ २३६.१ ॥

भ्जस्खाद्यौ स्खलितम् ॥ २३७ ॥

भजसनेभ्यः परौ गौ। यथा—

[4]पुष्पशररम्यवनुता सलवणत्वं,
शाङ्गमधुरता चतुरता बहुकलत्वम्।
सर्वमपि चास्य सुभगस्य रतये मे,
केवलमिदं व्यथयति स्खलितगोत्रम् ॥ २३७.१ ॥
महिता, कान्ता, वनमयूरश्चेत्यन्ये ॥ २३७.१ ॥

---

1) अनुसरेत्यत्र उपचित्रमिति—चित्रायाः समीपं उपचित्रम्। 2) चिरं(हर) नितम्बविम्बेत्यत्र विम्बशब्दः शोभार्थे ततो नितम्बविम्बमेव फलकं विपुलत्वात्। 3) मृत्युमुपैतीत्यत्र कणश इति कणेन कणेन इत्यर्थे वीप्सायां शस्। विश्वसनोचितः विश्वासाय नो युक्तः। अवाप्येति—प्राप्य। जनकर्णज्वरं कटु कठिनवाग्भिः। 4) पुष्पशररम्येत्यत्र सर्वां प्रति सखी प्राह—सर्वं एवास्य सुभगस्य रतये प्रीतयेऽस्ति। केवलं परस्त्रीनामग्रहणं पीडयति नान्यत्।

---

1 after this P reads रजौ सौ ज्लौ भानुपम्या. 2 सलवणत्वं N. 3 स्खलितगोत्रः P.

लगौ चेदिन्दुवदना ॥ २३८ ॥

भजसनेभ्यः परौ लघुगुरू चेदिन्दुवदना । यथा—

[1]सस्पृह इव त्वयि रतेरपि दयितस्,
त्वद्वदनवीक्षणवशाद् गलितधनुः ।
ताडयति नैष भवतीं शरनिकरैर्-,
इन्दुवदने न रमणे तदसि रता ॥ २३८.१ ॥

नभन्ता गौ शरभललितम् ॥ २३९ ॥

नभनतगगाः । यथा—

[2]वहसि गन्धैकरटिघटां पृष्ठदेशे,
कररदैः प्रहरसि च मत्तान्युवाहे ।
दलयसि क्षितिधरशिरःपादपातैर्,
इदमहो शरभ ललितं ते न यत्नः ॥ २३९.१ ॥

तच्छरभा घचैः ॥ २४० ॥

तच्छरभललितं घचैश्चतुर्भिः पड्भिश्चेद्यतिः शरभासंज्ञम् । यथा—

मृगरिपुः शशकतुलनां यत्पुरस्तात्,
कलयति द्विरददलनव्यक्तकेलिः ।
[3]तव सुतः स इह शरभोऽनन्यवीरः,
सुतवती ननु[4] शरभिके त्वं तदेका ॥ २४०.१ ॥

भभन्या गौ कुटिलम्[5] ॥ २४१ ॥

भभनयगगाः । घचैरिति वर्तते । यथा—

[4]श्रीचौलुक्यक्षितिपतिलक दिग्यात्रार्थं,
त्वत्सैन्येऽस्मिन् प्रसरति किल पातालेन्द्रः ।
न्यञ्चद्भूमीभरकुटिलितमूर्ध्नां मन्ये,
साह्यार्थं रचयति भुजदण्डानुच्चैः ॥ २४१.१ ॥
हंसश्येनीत्येके ॥ २४१. ॥ १४।२२ ॥

अतिशक्वर्यौ रजससया ऋषभः ॥ २४२ ॥

सजससयाः । यथा—

---

1) सस्पृह इत्येतत्र गलितधनुरिति—उकारान्तोऽप्यस्ति धन्वन् शब्दः । 2) वहसि गन्धेत्यत्र करसहिताः रदाः । अन्यथा प्राणितूर्याङ्गाणामिति सूत्रेण समाहृतिः स्यात् तथा नपुंसकता एकवचनं च स्यात् । यत्नः प्रयासः । 3) तव सुत इत्यत्र न विद्यते अन्यो वीरो यस्माल्लोऽनन्यवीरः । 4) श्रीचौलुक्येत्यत्र साह्यार्थं भुजदण्डस्य उच्चैःकरणं शङ्कायाः ।

---

१ लगौ A. २ गन्धकरिघटां B. ३ न तु N. ४ कुटिलं घचैः G. ५ मूर्ध्नां BN.

[1]जगतां विभुः पृथुजटापिहितांसदेशः,
सततं महर्षिगणसेवितपादपद्मः।
मकरध्वजप्रमथनप्रथितप्रभावः,
क्षपभव्वजः स भगवान् भवतोऽस्तु भूत्यै ॥ २४२.१ ॥

नीसौ शशिकला ॥ २४३ ॥

नीरिति नगणाश्चत्वारः सश्च। यथा—

[2]अरतिमति हि मम वपुषि विदधतीं,
तिरयसि यदि नवजलद शशिकलाम्।
स्वयमपि किमिति न कलयसि करुणां,
यदिह विरचयसि कटु रसितमहो ॥ २४३.१ ॥

अत्र सप्तभिर्यतिरित्येके। चन्द्रावर्तेति पिङ्गलः ॥ २४३.१ ॥

सा स्रक् चैः ॥ २४४ ॥

सा शशिकला चैः षड्भिर्यतिश्चेत् स्रक्संज्ञा। यथा—

प्रसरति तव सुभग विरहदहने,
शृणु यदजनि किमपि कुवलयदृशः।
सरसिजमपि तपति नवविचकिल-,
स्रगपि सपदि जनयति भृशमरतिम् ॥ २४४.१ ॥

मालेति पिङ्गलः ॥ २४४.१ ॥

मणिगुणनिकरो जैः ॥ २४५ ॥

शशिकलैव जैरष्टभिश्चेद्यतिर्मणिगुणनिकरः। यथा—

[3]नृवर यशसि मतिरविकलकलता,
भुजबलमनुपममतिनयपरता।
नतिरनुगुरुजनमुचितचतुरता,
त्वयि जयति नृपतिमणिगुणनिकरः ॥ २४५.१ ॥

नौ म्यौ यो मालिनी ॥ २४६ ॥

ननमयाः। जैरिति[3] वर्तते। यथा—

प्रतिमुहुरिह[4] दोलान्दोलनव्याकुलानां,
कुवलयनयनानामाननैरुल्लसद्भिः।

---

1) जगतामित्यत्र विभुर्व्यापकः स्वामी च। महर्षिगणेति—महर्षयः सप्तर्षयः। गगाः प्रमथादयः। क्षपभव्वज मादिदेव ईश्वरश्च। 2) अरतिमित्यत्र भति हि इति—अतिशयेनेत्यर्थेऽलण्दमव्ययम्। कटुरसित-मिति—कलिगर्जारवम्। 3) नृवर यशसीत्यत्र नृपमणयः प्रधानराजानः। 4) इहेति—वसन्ते। व्याकुलानामिति—व्याक्षिप्तानाम्। द्यौ आकाशः।

---

१ पिहितांश० N. २ इत्या A. ३ इति पाठालच्छन्दसोनुवर्तते B.

विमललवणिमाम्भश्चन्द्रिकां द्राक्[1] किरद्भिः,
नवशशधरमालामालिनीवाभवद् द्यौः ॥ २४६.१ ॥
नान्दीमुखीति भरतः ॥ २४६.१ ॥

नौ मो रौ चन्द्रोद्योतः ॥ २४७ ॥

ननमरराः। जैरिति वर्तते। यथा—

[1]ज्वलति सुभग तस्यास्त्वद्वियोगानले,
भवति न खलु किंचित् प्रीत्यै कुरङ्गीदृशः[3]।
सपदि दहति देहं यच्चान्दनोऽपि द्रवः,
प्रथयति नवचन्द्रोद्योतोऽपि नेत्रव्यथाँ[4]ः ॥ २४७.१ ॥

नौ तभ्रा उपमालिनी ॥ २४८ ॥

ननतभराः। जैरिति वर्तते। यथा—

[2]नृपवर रिपवस्ते विहाय पुरस्थितिं,
नवनवमुनिमुद्रानुपः खलु संप्रति।
विदधति तृणपर्णोटजान्यभिजाह्नवी-,
यमुनमनु च चर्मण्वतीमुपमालिनि ॥ २४८.१ ॥

मिद् यौ चित्रा ॥ २४९ ॥

मिरिति मगणत्रयं यगणद्वयं च। जैरिति वर्तते। यथा—

[3]शत्रौ मित्रे हर्म्येऽरण्ये संमदे वा गदे वा,
राज्ये भैक्षे[5] रत्नें लोष्ठे काञ्चने वा तृणे वा।
सोतँस्विन्यां कामिन्यां वा निन्दने वा स्तुतौ वा,
चित्रां चित्तावस्थां हित्वा संश्रयेथाः समाधिम् ॥ २४९.१ ॥
मण्डूकी, चञ्चला वेत्यन्ये ॥ २४९.१ ॥

माद्रम्ययाश्चन्द्रलेखा छैः ॥ २५० ॥

मगणात्परे रसययाः। छैरिति सप्तभिर्यतिः। यथा—

[4]राजन् सत्यं तदेतद् ब्रूमोऽद्भुतं वर्णनं ते,
दोर्दण्डस्यामभिः स स्पर्धां करोतु त्वदीयाम्।
आच्छिन्द्यायो मुरारेर्वक्षःस्थलात् कौस्तुभं वा,
यः कर्षेच्चन्द्रलेखां शंभोर्जटामण्डलाद्वा ॥ २५०.१ ॥

राद्वा ॥ २५१ ॥

---

1) ज्वलति सुभगेत्यत्र भवद्वियोगाग्नौ। प्रीत्यै संतोषायेति। नवचन्द्रोद्योत—इति ज्योत्स्ना। 2) नृपवरेत्यत्र मालिनी नर्दाविशेषस्तस्याः समीपम्। 3) शत्रौ मित्रे इति—संमदे हर्षे। गदे रोगे। 4) राजन् सत्यमित्यत्र आच्छिन्द्यादिति—हठेन गृह्णाति। मुरारेर्विष्णोः।

---

१ द्राक् N. २ नान्दीमुखीति C. ३ कुरङ्गदृशः A. ४ नेत्रव्यथान् A; नेत्रव्यथाम् P. ५ नृप पर्णोट० N. ६ भैक्षे CP. ७ श्रोत० AB. ८ चेतस्ये MP. ९ आच्छिद्यायो N.

रगणात्परे यदि रम्ययास्तदा वा चन्द्रलेखा। ररमययाः। छैरिति वर्तते। यथा—

[1]एक एव क्षणोऽसावानन्दनिष्यन्दहेतुः,
सत्कृतैः प्राक्तनैर्मे कैश्चित् सखेऽद्य प्रबुद्धम्।
नेत्रनीलोत्पलानां पीयूषवृष्टिं किरन्ती,
यत्पुरः कम्बुकण्ठी सा चन्द्रलेखेव दृष्टा ॥ २५१.१ ॥

स्जनन्या एला ङैः ॥ २५२ ॥

सजननयाः। ङैरिति पञ्चभिर्यतिः। यथा—

[2]चलितैर्घटोद्भवमुनिदिशमभि यस्य,
प्रबलैर्बलैर्बलमथनसदृशमूर्तेः[3]।
[4]निपिपेविरे चिरमुदधितटवनान्ताः,
परितो लसद्बहललवलिघकुलैलाः ॥ २५२.१ ॥

न्जभज्राः प्रभद्रकम् ॥ २५३ ॥

नजभजराः। यथा—

[5]जयति जगत्रयोपकृतिकारणोदयो,
जिनपतिभानुमान् परमधाम तेजसाम्।
भविकसरोरुहां गलितमोहनिद्रकं,
भवति यदीयपादलुठनात् प्रभद्रकम् ॥ २५३.१ ॥

र्जर्जरास्तूणकम् ॥ २५४ ॥

रजरजराः। यथा—

[6]स्फीतनव्यैंगन्धलुब्धपदपदौघसेविताश्-,
चैत्रमासि पदय भान्ति चूतमञ्जरीशिखाः।
ऊर्ध्वदृश्यमानकद्रुपत्रकृष्णपक्षकाम्,
तूणका इवेह वीरमन्मथेन लम्बिताः ॥ २५४.१ ॥

नो जौ भौ कलभाषिणी ॥ २५५ ॥

नजजभराः। यथा—

[7]स्फुरति च दक्षिणमारुतो मृदुशीतलः,
प्रतिदिशमुल्लसितं च केसररेणुभिः।

---

1) एक एव क्षण इत्यत्र यद् यस्मात् कारणात्। पुरोऽग्रे। 2) चलितैर्घटोद्भवेति—अगस्त्यदिशं दक्षिणामभि अभिलक्ष्यी कृत्येति भावः। 3) इन्द्रतुल्यमूर्तेः। 4) सेविता इति। 5) जयति जगत्रयेत्यत्र प्रकृष्टे भद्रं प्रभद्रं तदेव स्वार्थे के प्रभद्रकम्। 6) स्फीतनव्येत्यत्र ऊर्ध्वं दृश्यमानाः कद्रुपत्राणां वाग्यानां कृष्णाः पुच्छका येषु ते। 7) स्फुरतीत्यत्र मित्रं प्रति मित्रं प्राह। उल्लसितं प्रकृष्टम्। स्मित[पुष्पैः] केसरिल-क्षियाः। प्रसृता व्याप्ताः। प्रियेति—वल्लभा।

---

१ निस्पन्द० N. २ चलितैः N. ३ उद्गत N. ४ नजभज्राः GHP. ५ भव्य० L. ६ पुष्प-पुरस्सर० ABFP.

पिकयुवतेः प्रसताश्च पञ्चमगीतयस्,
तदपि सखे मयि न प्रिया कलभाषिणी ॥ २५५.१ ॥
अरविन्दमित्येके ॥ २५५.१ ॥

रान्नभभ्राः सुन्दरम् ॥ २५६ ॥

रगणात्परे नभभराः । यथा—

[1]निर्ममे सपदि पत्रलता न कपोलयोर्,
नापि यावकरसो निहितोऽधरपल्लवे ।
वल्लभाभिसरणोत्सुकया सुदृशानया,
सुन्दरत्वमधिकं तदपि प्रतिपद्यते ॥ २५६.१ ॥
मणिभूषणं, रमणीयं चेत्येके ॥ २५६.१ ॥

नाद्गौः ॥ २५७ ॥

नगणात्परे नभभ्राश्चेत्तदा गौर्नाम । ननभभराः । यथा—

[2]अनुदिनमपि हन्त दुहन्ति कवीश्वरान्,
त्रुटति न च यदीयसदुक्तिपयः शुचि ।
हृदयमुकुरमध्येमधिश्रयतां सदा,
निरुपमचरितग्रथिता मम सैव गौः ॥ २५७.१ ॥

नौ रो यौ भोगिनी ॥ २५८ ॥

यथा—

[3]दधति तव चुलुक्यचन्द्र धात्रीं भुजेऽस्मिन्,
भजतु जलनिधौ चिराय निद्रामुपेन्द्रः ।
विदधतु दिगिभाः करेणुकाभिर्विलासं,
सममभिरमतां च वासुकिर्भोगिनीभिः ॥ २५८.१ ॥

तॅजसस्याः शिशुः ॥ २५९ ॥

तजससयाः । यथा—

[4]त्वं नासि दृशोः पथि विमुक्त तथापि नाथ,
पापं भुवने तव गिरो जिन नाशयन्ति ।

---

1) निर्ममे सपदीत्यत्र यावकेति—अलक्तकरसः । अधरपल्लवे—स्त्रियः अधरं शोभार्थं अलक्तकरसेन सिञ्चन्ति । भर्त्रभिगमनव्याकुलतया अङ्गीक्रियते । 2) अनुदिनमपीति [अत्र] हन्तेति—कोमलामन्त्रणे । दुहन्ति दोहनं कुर्वन्ति । मुकुरेति—आदर्शमध्यम् । गौरिति—धेनुर्वाक् च । 3) दधति तव चुलुक्येत्यत्र उपेन्द्रः कृष्णः । दिगिभाः दिग्हस्तिनः । वासुकिः शेषनागः । 4) त्वं नासि दृशोरित्यत्र विमुक्तेति—वि विशेषेण कर्मणो मुक्तो विमुक्तस्तत्सबोधनम् । ध्वनितेनेति—शब्देन ।

---

१ सुन्दरीत्वं N. ४ त्रुटति N. २ मध्यानधि० N. ३ तजससया: P.
८ छन्दो०

त्रस्यन्ति हि शैलशिखरान्तरितस्य दूराद्,
लीलाध्वनितेन मृगराजशिशोर्गजेन्द्राः ॥ २५९.१ ॥

भ्यससयाः केतनम् ॥ २६० ॥

भयससयाः। यथा–

"कोकिलवधूनां कलपञ्चमरागगीतिश्,
चूतविटपानां नवपल्लवसपदश्च।
दक्षिणसमीरो मृगशावदृशां कटाक्षाः,
बिभ्रति हि जैत्रायुधतां झषकेतनस्य ॥ २६०.१ ॥

त्मौ जौ रो मृदङ्गः ॥ २६१ ॥

तमजजराः। यथा–

कृत्वा जगत्त्रयजयं मकरध्वजप्रभुः,
संगीतकं सपदि कारयते रतेः पुरः।
आकाशरङ्गभवने नवनिर्ति नर्तकी,
विद्युद्, घनर्तुरपि "मेघमृदङ्गवादकः ॥ २६१.१ ॥

मुः कामक्रीडा ॥ २६२ ॥

मुरिति पञ्च मगणाः। यथा–

उक्ता वाचं नो दत्ते तल्पे शेते व्यावृत्ताङ्गी,
"पर्याक्षिप्तक्षौमप्रान्ता प्रस्थातुं काङ्क्षत्याशु।
कामक्रीडावार्तागोष्ठीप्रारम्भेऽप्युच्चैर्गीतां,
धत्ते पत्युः प्रीत्यै वामारम्भाप्येवं सा बाला ॥ २६२.१ ॥ १५।२१ ॥

अष्टौ नग्रा भौ गो मणिकल्पलता ॥ २६३ ॥

नजरभभगाः। यथा–

उपलतृणस्वरूपचिन्तामणिकल्पलता-,
"व्यतिकरतो मुधैव मेरुर्मदमुद्वहति।
जयति यदुजयन्त एकोऽयमचिन्त्यफलं,
प्रदददलंकरोति नेमिः स्वयमेष जिनः ॥ २६३.१ ॥

भीः स्गौ हारमाला ॥ २६४ ॥

भीरिति भचतुष्टयं सगौ च। यथा–

---

1) कोकिलवधूनामित्यत्र चूतविटपानां सहकारशाखानाम्। झषकेतनस्येति – कन्दर्पस्य। 2) मेघमृदङ्गवादक इति – मेघा एव मृदङ्गाः तान् वादयतीति तथोक्तः। 3) पर्याक्षिप्तेत्यत्र पराङ्मुखी पर्योक्षिप्तः भाक्षिप्तो वस्त्रस्य प्रान्तो यया सा। वामारम्भेति – विपरीतारम्भापि कामोद्रेकाद् प्रीत्यै भवति। 4) व्यावृत्तेति – सबन्धादेव मेरुर्हर्षं बिभर्ति।

---

१ केतनकं P.

[1]ऐक्षवकार्मुक कौसुमसायक भटमानिन्,
मुञ्च चतुर्मुखशंभुचतुर्भुजजयगर्वम् ।
उत्तमसंयमवर्मावृतात्मनि जिननाथे,
संप्रति शम्बरसूदन संहर शरमालाम् ॥ २६४.१ ॥

भुगौ संगतम् ॥ २६५ ॥

भुरिति पञ्चभगणा गुरुश्च । यथा—

[2]वीर तवासिपथेन गतैररिभिस्त्रिदिवं,
तत्र दिवस्पतिमानिभिराकुलितः प्रबलैः ।
अद्य हरिर्विमृशन् सचिवैः सह तद्विजये,
त्वन्नवसंगतकल्पनमौपयिकं मनुते ॥ २६५.१ ॥

पद्ममुखी, सुरतावसथं, उद्धरणं, सोपानकं चान्येषाम् ॥ २६५.१ ॥

भुगौ कामुकी ॥ २६६ ॥

भुरिति मगणपञ्चकं गुरुश्च । यथा—

संवृत्तोऽयं सन्ध्याकालः प्राप्तोऽस्ताद्रेः शृङ्गं भानुर्,
विस्फूर्जद्भिर्ध्वान्तस्तोमैरेकीभूतं [3]काष्ठाचक्रम् ।
चापाकृष्टिं व्यातन्वानः कन्दर्पोऽपि क्रीडत्युच्चैर्,
गच्छन्त्येतास्त्यक्ताशङ्कं क्रीडास्थानं कामुक्योऽपि ॥ २६६.१ ॥

सुगौ वा ॥ २६७ ॥

सुरिति सगणपञ्चकं गुरुश्चेदियमपि कामुकी । यथा—

[4]अपयाहि पितामहचित्तविलोभिनि धिक् त्वाम्,
अपि कौशिककामुकि न त्वमपि त्रपसे किम् ।
असि हास्यपदं नलकूबरकामिनि यद्वः,
कुलिशातिदृढेऽत्र जिनेन्द्रहृदि प्रविविक्षा ॥ २६७.१ ॥

सोमडकमित्यन्ये ॥ २६५.१ ॥

---

1) ऐक्षवकार्मुकेत्यत्र—इक्षोरिदं ऐक्षवम् । कुसुमसंबन्धिनो बाणा यस्य कौसुमसायकस्तत्संबोधनम् । ब्रह्मेश्वरकृष्णजयमानम् । वर्मेति—सन्नाहः । जिनपतौ । शम्बरसूदनेति—हे काम । 2) वीर तवेत्यत्र दिवस्पतिमानिभिः पूज्यैः । नवसंगतेति—नवं संगतं मैत्र्यं तस्य यत्कल्पनं निष्पादनं एवंविधं उपायम् । 3) काष्ठाचक्रमिति—दिक्चक्रम् । कामुक्यः कुलटाः । 4) अपयाहीति—पितामहो ब्रह्मा तस्य ध्यानारूढस्य चित्तप्रलोभि[नी] इयं तिलोत्तमा । इन्द्रस्य विश्वामित्रस्य वा कामुकी उर्वशी तस्य संबोधनम् । अत्र कौशिकशब्दस्योभयार्थत्वम् । त्रपसे लज्जां न करोषि । नलकूबरेति—धनदपुत्रकामिनि हे रम्भे । कुलिशेति—वज्रादप्यतिदृढे ।

---

१ चतुर्भुज शंभुचतुर्भुज A. २ आतुलितः N. ३ सुरता च सयमुद्धरणसो० N. ४ अपि. FN.

नुगौ चलधृतिः ॥ २६८ ॥

नुरिति नगणपञ्चकं गुरुश्च। यथा–

प्रणमदखिलसुरपतिकनकमुकुट-,
स्फुटरुचिनिचितनखमणिकिरणचये।
कुरु जिनचरणजलरुहि नमनरुचिं,
"चलधृतिमपजहि च विषयसुखधियम् ॥ २६८.१ ॥

नुलावचलधृतिः ॥ २६९ ॥

नुरिति नगणपञ्चकं लघुश्च। यथा–

विलुलितचिकुरमधरनिहितदशनम्,
अविरलपुलकनिचितकुचयुगमयि"।
रतिरसरभसमणितमुखरितमिह,
विलसति तव सखि सुखमचलधृति" ॥ २६९.१ ॥

नभौ जिगौ मङ्गलमङ्गना धैः ॥ २७० ॥

नभौ जिरिति जगणत्रयं गुरुश्च। धैरिति चतुर्भिर्यतिः ॥ यथा–

"कुटिलतां धृतवती गुरुभोगमदोद्धता,
विदधती प्रलयवेपथुसादपरंपराम्।
विषधरीव पुरतः स्फुरितां यतिनामहो,
विचरतां सुगतिमार्गममङ्गलमङ्गना ॥ २७०.१ ॥

अनिगा ऋषभगजविलसितं छैः ॥ २७१ ॥

भरौ नगणत्रयं गुरुश्च। छैरिति सप्तभिर्यतिः। यथा–

"अद्भुततुङ्गमूर्तिरतिशयललितगतिर्,
देव समग्रकर्मवनविदलनरसिकैः।
निर्भरमन्तरङ्गरिपुबलविजयपटुर्,
नाथ दधासि वत् त्वमृषभगजविलसितम् ॥ २७१.१ ॥

मत्तगजविलसितमिति भरतः ॥ २७१.१ ॥

---

1) चलधृतिमिति–अस्थिरस्वास्थ्यं अपजहि त्यज। 2) अयीति–कोमलामन्त्रणे। 3) अचलधृतीति–अचला स्थिरा धृतिः समाधिर्यत्र। 4) कुटिलतामित्यत्र यकारं उभयत्र। गुरुश्चासौ भोगश्च तेन उद्धता दर्पभाग्। पक्षेऽहिकायः। मूर्च्छाकम्पस्वेदधर्मिणः। भुजगीव अग्रतः। स्फुरिता जाता। यतिनां यतिनाम्। [अहो]आश्चर्यम्। 5) अद्भुततुङ्गेत्यत्र अन्तरङ्गेति–गजपक्षे अन्तर्मध्ये अङ्गति गच्छति यद्रिपुबलम्।

---

१ स्फुरता N. २ रसिक N.

निजस्गा ललितपदं जैः ॥ २७२ ॥

निरिति नगणत्रयं जसगाश्च । जैरिति पञ्चभिर्यतिः । यथा—

[1]चुल्लुकक्कुलजलनिधिशशाङ्क तव दीनं,
रिपुनिवहमतितरलकातरमुपेक्ष्य ।
त्वदसिरुचितमसि विततते युधि भवन्तं,
ललितपदमभिसरति वीर जयलक्ष्मीः ॥ २७२.१ ॥

यमन्सर्गाः जयानन्दं चैः ॥ २७३ ॥

यमनसरगाः । चैरिति षड्भिर्यतिः । यथा—

[2]नमच्छक्रश्रेणीमणिमुकुटकोटीविघट्टैर्,
निघृष्टाङ्घ्रे देव प्रबलजडतान्धभानो ।
सुधाधारासारैरिव सदसि वाचां प्रपञ्चैर्,
जयानन्दस्यन्दं सपदि जगतामादधानः ॥ २७३.१ ॥
प्रवरललितमित्येके ॥ २७३.१ ॥

भौ त्रौ न्गौ महिषी जैः ॥ २७४ ॥

भरनरनगाः । जैरिति दशभिर्यतिः । यथा—

[3]सिद्धनरेन्द्रनन्दन भवद्विपक्षनगरे,
संप्रति सौधभित्तिलिखितास्तुरंगमचमूः ।
वीक्ष्य[4] नितान्तकोपकुटिलेक्षणा प्रति मुहुः,
शृङ्गविघट्टनैर्विघटयत्यरण्यमहिषी[5] ॥ २७४.१ ॥

म्भौ न्मौ न्गौ मदनललिता घचैः ॥ २७५ ॥

मभनमनगाः । घचैरिति चतुर्भिः षड्भिश्च यतिः । यथा—

[4]गाढाक्रान्ता कुचयुगभरेणार्ता च विरहे,
नित्योद्भिन्नातिघनजघनप्राग्भारधरणे ।
सव्रीचीभिर्धृतकरतला कान्ते कृतरतिर्,
मन्दं मन्दं मदनललिता याति प्रियगृहम् ॥ २७५.१ ॥

न्जभ्जगा वाणिनी ॥ २७६ ॥

नजभजरगाः । यथा—

---

1) चुलुक्येत्यत्र वैरिवृन्दम् । खलद्गकान्तिरेव तमोऽन्धकारः तस्मिन् विततते विस्तृते सति युधि संग्रामे अभिमुखमागच्छति । 2) नमदित्यत्र इन्द्रश्रेणिरत्नमुकुटकोट्यग्रैः । जयश्रीलोर्निष्यन्दं रसं पर्पदि । 3) सिद्धनरेन्द्रेत्यत्र त्वद्वैरिपुरे । अरण्यमहिषीति—परस्परं नित्यवैरत्वादिति भावः । 4) गाढाक्रान्तेत्यत्र सव्रीचीभिः सलज्जाभिः । कान्ते भर्तरि । कृतप्रीतिः ।

---

१ चुलुक्य० com; N; २ यमनसर्गाः GH; ३ तुरंगचमूः N. ४ वीक्ष A; ५ विघटनैः N.

[1]अविरलपुष्पवाणललितानि दर्शयन्ती,
परिमलहारितामरसवक्त्रमुद्वहन्ती।
मदकलराजहंसगमनानि भावयन्ती,
शरदिह मानसं हरति हन्त वाणिनीव ॥ २७६.१ ॥

नजिर्गा वा ॥ २७७ ॥

नगणो जत्रयं रगणो गुरुश्च यदा तदापि वाणिनी। यथा—

[2]कुरु करुणां वितर प्रतिवाचमत्र कां वा,
हृदि दयितां निदधासि निमीलिताक्षियुग्मम्।
अयमपि ते ननु दासजनोऽनुकम्प्य एव,
जयति सै वीरजिनो गदितो सुवाणिनीभिः ॥ २७७.१ ॥

भ्रभ्रजगाः पञ्चचामरम् ॥ २७८ ॥

जरजरजगाः। यथा—

[3]त्वदीयपादपङ्कजे निधाय भक्तिमुज्वलां,
मनुष्यकीटका वयं विदध्महे किमद्भुतम्।
यदीयजन्मनो महोत्सवं तथा प्रचक्रिरे,
जिनेन्द्र सप्तविंशतिश्च पञ्च चामराधिपाः ॥ २७८.१ ॥

रजर्जर्गाश्चित्रम् ॥ २७९ ॥

रजरजरगाः। यथा—

[4]कान्तिरिन्दुकौमुदीसहोदरा वचोविलासः,
सर्वदा सुधोज्ज्वलो यशश्च दुग्धसिन्धुबन्धुः।
क्षुण्णशङ्खसोदरा गुणास्तवामलं चरित्रं,
चित्रमेतदेभिरीश मे मनस्तथापि रक्तम् ॥ २७९.१ ॥

भस्तर्गाः सुरतललिता ॥ २८० ॥

मनसतरगाः। यथा—

[5]संप्राप्ते मधुसमयसाम्राज्ये पिकीसमूहाः,
शंसन्ति प्रतिदिशगिदं मन्ये नितम्बिनीनाम्।

---

1) अविरलपुष्पेत्यत्र अन्यत्र वाणो वृक्षभेदः। लेखा मत्ता च वाणिनी। 2) कुरु करुणामित्यत्र सगमदेवेन मायया कामिनीरूपाणि यानि विष्पादितानि ताभिरुक्तम्। निमीलितेति क्रियाविशेषणम्। यदिव इति—प्रोक्तः। स्वर्गमर्त्यच्छेकरामाभिः। 3) त्वदीयपादेत्यत्र द्वात्रिंशद् देवेन्द्राः। व्यन्तरेन्द्रा न गण्यन्ते अल्पर्द्धित्वात्। 4) कान्तिरिन्दुरित्यत्र पय.पयोधिसोदरः। रक्तमिति—रागभाग्। 5) संप्राप्त इत्यत्र शंसन्ति कथयन्ति।

---

१ युग्म. BPP. २ नु कां एवं N, नुकम्प्य एवं P. ३ स dropped in N. ४ जन्मतो N. ५ dropped in N.

मानित्वं त्यजत सुभगंमन्यत्वमस्तु दूरे,
कन्दर्पः सुरतललितौपाध्यायकं प्रपेदे ॥ २८०.१ ॥
भ्रौ न्भौ भ्गौ शैलशिखा ॥ २८१ ॥

भरनभभगाः। यथा—

[1]"शीतरुजा विधुतचिबुकैः कृतदन्तरवो,
गाढतरप्रयुक्तगजदन्तकराभिनयः।
शैलशिखाप्रदेशमधिरुह्य तुषारऋतौ,
पश्यति भास्करोदयपथं तव वैरिजनः ॥ २८१.१ ॥
भ्रौ य्नौ म्गौ वरयुवतिः ॥ २८२ ॥

भरयननगाः। यथा—

[2]"स्फूर्जति संगरप्रदोषे तुरगखरखुर-,
क्षुण्णरजोन्धकारघोरे विलसति नृपते।
वैरिमहीभुजां समन्तात्सुरवरयुवती-,
संगमहेतुरेकदूती भवदसिलतिका ॥ २८२.१ ॥
र्नीगा ललना ॥ २८३ ॥

रगणो नगणचतुष्टयं गुरुश्च। यथा—

दिक्षु चक्षुरनिलहृतकुवलयतरलं,
प्रक्षिपत्यतनुमृगपतिनिनदचकिता।
सिद्धराजसुत भजति मृगयुवतितुलां,
सांप्रतं वनभुवि तव रिपुनृपललना ॥ २८३.१ ॥
सौ नौ मो गो वेल्लिता ॥ २८४ ॥

यथा—

[3]"सरितां कमितुः स्तवैकितघनफेनव्याजाद्-,
विततेषु तटेषु वहललवलीच्छायेषु।
श्रममाप्नवती त्रिजगति संचारैर्,
नियतं नृप [4]"वेल्लितसुखमभजत् त्वत्कीर्तिः ॥ २८४.१ ॥
म्तौ स्तौ त्गौ कोमललता घडैः ॥ २८५ ॥

मतसततगाः। घडैरिति चतुर्भिः पञ्चभिर्यतिः। यथा—

---

1) शीतरुजेत्यत्र गाढतर प्रयुक्तो गजदन्तानां कराभ्यां कृत्वाभिनयोऽनुकरणं येन स तथा। कोऽर्थः। यार्कावन्यः। 2) स्फूर्जतीत्यत्र सग्रामरात्रिमुखे। 3) सरितां कमितुरित्यत्र समुद्रस्य। स्तवकितेति—फेनसञ्चका हि कल्लोलैरित्यन्तः प्रेङ्खोल्यन्ते। लवलीलतासु। 4) वेल्लितेति—आन्दोलनसुखम्।

---

१ सुभगंमान्यत्वं N. २ स्तवकित० N.

"मत्तालीनां स्निग्धमधुरोद्गारैर्मेहुर्गीतिकैर्,
आक्षिप्तोऽसारोहणमृगः स्वच्छन्दचारी यवः।
मन्दं मन्दं दक्षिणमरुद्व्यालेप तेनाधुना,
सद्यःपुष्पत्कोमललतालास्यैकशिक्षागुरुः ॥ २८५.१.१६।२३ ॥

अत्यष्टौ यमनसभलगाः शिखरिणी चैः ॥ २८६ ॥

यमनसभलगाः। चैरिति षड्भिर्यतिः। यथा—

"हरन् सर्वान्भोजश्रियमविरतं सिन्धुपतिना,
कृतार्थस्तन्वानो निशितमसि विद्योतमसमम्।
सुधांशुस्तद्वंशे त्वमिव जयसिंहक्षितिपते,
कलापूर्णैः पद्मोदयशिखरिणीहाभ्युदयते ॥ २८६.१ ॥

उ्सजस्यल्गाः पृथ्वी जैः ॥ २८७ ॥

जसजसयलगाः। जैरित्यष्टभिर्यतिः। यथा—

"त्वदीयरिपुभूभुजां पुरि पुरारिवेश्माग्रतो,
निरीक्ष्य चमरी वृषं सपदि मन्मथव्याकुला।
परिस्पृशति जिह्वया "ककुदकेन कण्डूयते,
निमीलितविलोचना किल चुलुक्यपृथ्वीपते ॥ २८७.१ ॥

विलम्बितगतिरिति भरतः ॥ २८७.१ ॥

भौ न्भौ न्लौ गो वंशपत्रपतितं जैः ॥ २८८ ॥

भरनभनलगाः। जैरिति दशभिर्यतिः। यथा—

"जर्जरसारिमध्यलुठिताः क्वचिदपि गज्रिनो,
भङ्गुरवंशपत्रपतिताः क्वचिदपि रथिनः।
क्वापि च सादिनो "हततुरगमबलपिहिताः,
शत्रुबलेऽभवंस्त्वयि रणाङ्गणमवतरति ॥ २८८.१ ॥

वंशदलमित्यन्ये ॥ २८८.१ ॥

---

1) मत्तालीनामित्यत्र आरोहणमृग इति—यतो हरिणवाहनः स च गीतिरति.। मृगं विना यतोऽपि चलितुं न शक्नोति। कास्यं नाम्यम्। 2) हरन् सर्वानित्यत्र यद्यपि जयसिंहदेवचरिते धारायां नरि(र)वर्मराजोऽभूत् तथापि तस्य या राष्ट्रकोशादिसमृद्धलक्ष्मीः सा सर्वापि भोजोपार्जितासीत्। उत्कटत्वाच्च विरोधः। सिन्धुदेशराजः समुद्रश्च। तेन विहितपूजः। निशि रजन्यां अन्धकारे विशिष्टोद्योत निरुपमं प्रकाशम्। पक्षे निशितं तीक्ष्णं। खड्गकान्तिं कुर्वन्। तस्य चन्द्रस्य वंशे यथा त्वं तथा उदयगिरौ सुधांशुः। कलाषोडशः पक्षे विज्ञानम्। 3) त्वदीयरिपुभूभुजामित्यत्र ईश्वरायतने चमरी वनगौ कामान्धा पाषाणमयं वृषं भजानानी जिह्वास्पर्शनाद्यनङ्गचेष्टाः करोति। 4) ककुदकेनेति—अकारान्तोऽप्यस्ति। 5) जर्जरसारीत्यत्र सारि. अंघाडीति प्रतीता। गज्रिनो गजारूढाः। वंशा. वाहनानि तेभ्यः। रथिन इति रथवन्तः। सादिनोऽश्वाराः॥ 6) हततुरगेति—उपरि तुरगा अधस्तादश्वसमूहा [सादिनो?] जाता इति भाव.।

---

१ स य° N. २ कृतार्थ P. ३ शार्दू° B. ४ गज्रिनो N.

सौ ज्भौ जो गावतिशायिनी[1] ॥ २८९ ॥

सजसजभजगगाः। [2]ऐरिति वर्तते। यथा माघस्य[3]–

इति धौतपुरन्ध्रिमत्सरान् सरसि मज्जनेन,
श्रियमाप्नवतोऽतिशायिनीमपमलाङ्गभासः।
अवलोक्य तदेति यादवानपरवारिराशेः,
शिशिरेतररोचिषाप्यपां ततिषु मङ्क्तुमीषे ॥ २८९.१ ॥

यादवीत्यन्ये ॥ २८९.१ ॥

मो भौ तौ गौ मन्दाक्रान्ता घचैः ॥ २९० ॥

मभनततगगाः। घचैरिति चतुर्भिः षड्भिश्च यतिः। यथा–

जन्मस्नाने स चरमजिनः स्वर्णकुम्भौघधारा-,
सारं सोढा कथमिति पुरा वज्रिणा शङ्कितेन।
दृष्टः पश्चाज्जयति चरणाङ्गुष्ठपर्यन्तलीला-,
मन्दाक्रान्तामरगिरिशिरःकम्पतो विस्मितेन ॥ २९०.१ ॥

श्रीधरेति भरतः ॥ २९०.१ ॥

मभ्नरसलगाः भाराक्रान्ता ॥ २९१ ॥

मभनरसलगाः। घचैरिति वर्तते। यथा–

[4]चौलुक्येन्द्र त्वमिह न हि चेदिमां किल धारयेः,
कूर्मक्रोडाधिपफणिपतिद्विपाद्रिषु सत्स्वपि।
सर्पन्त्या ते करटिघटया दिशां विजये तदा,
भाराक्रान्ता नृप वसुमती क्षणान्निपतेदधः ॥ २९१.१ ॥

मभ्रम्यलगाः हारिणी ॥ २९२ ॥

मभनमयलगाः। घचैरिति वर्तते। यथा–

प्रासादेषु त्वदरिनगरे शून्यत्वमासेदुषि,
श्रीचौलुक्य क्षितिपतिशिरश्चूडामणे सम्प्रति।
प्रेङ्खोलन्तो विषधरपतेर्बालभिताः कञ्चुका,
व्यातन्वन्ति ध्वजपटतुलामुद्धमन्तोहारिणीम् ॥ २९२.१ ॥

---

1) मापस्येति–माघस्यश्लोकम्। शिशिरेति–सूत्रेण। 2) चौलुक्येन्द्र कच्छार्धमण्डलेश्वर-सहस्रार्जुनादिषु।

---

1 ये added in ms. 2 पु-जो ५. 3 व यादव- ५. 4 व रदघ- ४. 5 विष्णुरेव ५. 6 मनोहरिणा ५.
7 ज्यो-

न्सौ म्रौ स्लौ गो हरिणी चर्वैः ॥ २९३ ॥

नसमरसलगाः। चर्वैरिति पड्भिश्चतुर्भिर्यतिः। यथा—

कथय किमियं लक्ष्मच्छाया शुचेस्तु भवेत् कथं,
तव हिमरुचे यद्वोत्सङ्गे कृतः कृपया ध्रुवम्।
नभसि रभसाद् वद्धाटोपप्रधावितलुब्धक-,
क्षुभितहरिणीगर्भाद् भ्रष्टः कुरंगक एव हि ॥ २९३.१ ॥

वृषभललितमित्येके ॥ २९३.१ ॥

नः स्मौ तौ गौ पद्मम् ॥ २९४ ॥

नसमततगगाः। चर्वैरिति वर्तते। यथा—

त्यजत मनुजा जातेर्गर्वं किं तयैवैकया स्यात्,
गुणपरिचयो लोकेऽत्यन्तं हन्त दत्ते प्रतिष्ठाम्।
अजनि चुलुकाचान्ताम्भोधिः कुम्भजन्माप्यगस्त्यः,
"कुलगृहमभूद्देव्या लक्ष्म्याः पङ्कजातं च पद्मम् ॥ २९४.१ ॥

नस्मम्यल्गा रोहिणी ॥ २९५ ॥

नसममयलगाः। चर्वैरिति वर्तते। यथा—

"कुवलयमुदं व्यातन्वानः पूर्णोल्लसन्मण्डलः,
शिरसि घटयन् पादन्यासं निःशेषपृथ्वीभृताम्।
उदयमधुना प्राप्तः श्रीमत्सिद्धेन्द्रसूनो भवान्,
इव "कृतबुधानन्दः सोऽयं श्रीरोहिणीवल्लभः ॥ २९५.१ ॥

नुर् गौ वसुधारा ङैः ॥ २९६ ॥

नुरिति पञ्चभिर्नगणाः गुरुद्वयं च। ङैरिति पञ्चभिर्यतिः। यथा—

"प्रणतसुरविसरमणिमुकुटतटकोटि-,
परिघट्टितचरणनखरुचिनिचयरम्ये।
इह भवति भगवति विहरति जिननाथे,
प्रतिभवनमभिवर्तति जगति वसुधारा ॥ २९६.१ ॥

---

1) कुलगृहं प्रधानसदनम्। 2) कुवलयमुदमित्यत्र—कैरवं भूवलयं च। मण्डलं बिम्बं देशश्च। कुर्वन्। प्रादानां चरणानां किरणानां च न्यासम्। समग्राणां राज्ञां पर्वतानां च। 3) कृतबुधेति—पुत्रत्वाद्बुधानन्दकृत् पक्षे पण्डितानन्दनो दानादिना। चन्द्रः। 4) प्रणतसुरेत्यत्र वसुधारेति—सुवर्णरत्नादिवृष्टिः।

---

१ तया वैकया A. २ मुदां A; मदं P. ३ घटयत् N. ४ नगणपञ्चकं गुरु० A. ५ परिघट्टित N. ६ पतति dropped in N; जगति in E

नजभ्जजा ल्गावविंतथम् ॥ २९७ ॥

नजभजजेभ्यः परौ ल्गौ। यथा—

[1]श्रृणु परमोपदेशमिह मुग्धमते सततं,
भवजलधेः परेण यदि यातुमनास्त्वमसि।
विसृज परिग्रहं भज कृपां त्यज कामकथाम्,
अवितथवाग्भवापहर मा परकीयधनम् ॥ २९७.१ ॥
नर्कुटकमिति जयदेवः ॥ २९७.१ ॥

तत् कोकिलकं छचैः ॥ २९८ ॥

तदवितथं छचैः सप्तभिः षड्भिश्च यतिश्चेत् कोकिलकसंज्ञम्[1]। यथा—

कलयति कोकिले मधुरपञ्चमगीतिमिमां,
मलयसमीरणो भवति पश्यत नाट्यगुरुः।
इह हि यदाज्ञया नवनवाद्भुतभङ्गिजुषः,
किसलयहस्तकान् वितनुते [2]सहकारलता ॥ २९८.१ ॥
इह केचिदष्टभिः पञ्चभिश्च यतिमिच्छन्ति ॥ २९८.१ ॥

गौ चेद्वाणिनी ॥ २९९ ॥

नजभजजेभ्यः परौ गौ चेद्वाणिनीसंज्ञम्। यथा—

[3]परभृतकूजितानि जरठेक्षुरसो नवेन्दुर्,
मलयसमीरणो मलयजं मधुसंगमश्च।
अपि न तथा हरन्ति मिलितानि मनो यथेदं,
मदभरलज्जभाषितमहो खलु [4]वाणिनीनाम् ॥ २९९.१.१७।१४ ॥

धृत्यां भ्रभ्या रौ काञ्ची दैः ॥ ३०० ॥

मरभयररा:। दैरिति एकादशभिर्यतिः। यथा—

[5]संप्राप्तेऽस्मिन् जगच्चक्षुषि रवौ प्रत्यग्गिरेर्गह्वरं,
प्रेयःसंकेतवेश्माभिसरणे धत्से पिधानांशुकम्।
मुग्धे ध्वान्तानुरूपं किमु मुधैवौत्सुक्ययोगात् कणत्-,
काञ्चीमञ्जीरकोलाहलमिमं शक्ता निषेद्धुं[1] न चेत् ॥ ३००.१ ॥
वाचालकाञ्चीत्यन्ये ॥ ३००.१ ॥

भिम्भसा मणिमाला ॥ ३०१ ॥

भत्रयं मभसाश्च। दैरिति वर्तते। यथा—

---

1) श्रृणु परमोपेत्यत्र परेणेति अव्ययं परार्थे। अवीति—सत्यवाग्। 2) सहकारलतेति—चूतमञ्जरी। 3) परभृतेत्यत्र कोकिलजल्पितानि। कटिनेक्षुरसः। मदभरे अव्यक्तजल्पनम्। 4) मत्तच्छेकानां स्त्रीणाम्। 5) संप्राप्तेऽस्मिन्नित्यत्र पश्चिमपर्वतस्य। मणीति—मेखलानूपुरयोः कलकलः।

---

१ तदवितथं dropped in P. २ कोकिलसरं CN. ३ निरोद्धुं AP.

[1]"देवं तवारिनरेशपुरन्ध्रीमुखाम्बुजशशिनः,
प्रोल्लसिताधिकविस्मयमुर्वीं" संवीक्ष्य भुजगताम्[2]"।
प्राभृतसारकृते निरवद्यामद्याप्यनवरतं,
मूर्धनि धारयते मणिमालां पातालपरिवृढः[4]" ॥ ३०१.१ ॥

मना यिः कुसुमितलतावेल्लिता ङ्चैः ॥ ३०२ ॥

मतना यगणत्रयं च। ङ्चैरिति पञ्चभिः षड्भिश्च यतिः। यथा—

कङ्केल्लिस्कन्धे कुसुमितलतावेल्लिता मन्दमन्दं,
क्रीडादोलेयं स्मरविरचिता दाक्षिणात्यानलेन।
अस्यां खेलन्ती रतिरतितरां हन्त[3] गीतिं तनोति,
व्याकूजन्मत्तभ्रमररमणीहुंकृतीनां छलेन ॥ ३०२.१ ॥

घछैश्चित्रलेखा ॥ ३०३ ॥

चतुर्भिः सप्तभिश्च यतिश्चेत् सैव चित्रलेखा। यथा—

पश्योष्णांशोरभ्युदयमधुना सूचयन्ती पुरस्तात्,
सन्ध्या सेयं चित्रयति गगनाभोगवेश्मान्तराले।
शङ्कच्छेदस्वच्छरुचिरुचिरानभ्रभित्तिप्रभागान्,
वर्णैः पीताताम्रद्युतिकपिशैस्तन्वती चित्रलेखाः ॥ ३०३.१ ॥

मभा यिश्चन्द्रलेखा ॥ ३०४ ॥

मभना यगणत्रयं च। घछैरिति वर्तते। यथा—

[6]"ज्वालं ज्वालं सुभग तव महान् विप्रयोगानलस्तां,
दाहं दाहं किमिव विरचयेदन्यदस्मात्परेण।
लावं लावं विकचकमलिनीश्रेणयस्तंह्रिघातैः,
[7]"लेखं लेख शकलयति तथा सा नखैश्चन्द्रलेखाम् ॥ ३०४.१ ॥

मभन्जभ्राश्चलम् ॥ ३०५ ॥

मभनजभराः। घछैरिति वर्तते। यथा—

शास्त्राभ्यासे व्यसनमनुपमं परोपकृतौ रतिः,
[8]"सत्पात्रेषु प्रणयपरतया प्रदानमनारतम्[9]"।
प्रीतिः पादाम्बुरुहि जिनपतेर्भेदमलात्मनां",
विद्युल्लेखाजलधरपटलीचलात्मनि जीविते ॥ ३०५.१ ॥

---

1) देव तवारीत्यत्र रिपुनृपस्त्रीमुखाम्भोजसकोचचन्द्रसमानस्य। 2) उर्वीं पृथ्वीम्। पक्षे गुर्वीम्। 3) हस्तगतां पक्षे सर्पवाम्। 4) पातालस्वामी शेषः। 5) ज्वालंज्वालमित्यत्र वियोगाग्निः। 6) लेखं लेखं आलेख्यालेख्य। 7) सत्पात्रेष्विति—आदरवत्परतया। 8) अनेति—नित्यम्। 9) भमलेति—विद्युद्वात्मनाम्।

---

१ देवतावारिनरपु. A. २ परिदः A. ३ दन्तगीतिं A. ४ स्त्रि dropped in B. ५ चूर्णयन्त्यङ्घि N. ६ सकलयति A.

म्भौ न्यौ रौ केसरम् ॥ ३०६ ॥

मभनयरराः । यद्भैरिति वर्तते । यथा –

[1]"सारंगाणां न कुलमिह न वा यूथं [2]"महादंष्ट्रिणां,
कर्णातिथ्यं न च भजति कदुगन्धद्विपानां ध्वनिः ।
तत्किं दिक्षु क्षिपसि रभसया नेत्रे त्वमुद्यत्करो,
यद्वा ज्ञातं विधुवति पवनस्त्वत्केसरं[3]" केसरिन् ॥ ३०६.१ ॥

नौ मौ यौ चन्द्रमाला छधैः ॥ ३०७ ॥

ननममयया: छधैरिति सप्तभिश्चतुर्भिश्च यतिः । यथा –

[4]"सरसि[1] सरसिजं तद्वाकाशे पार्वणं चन्द्रबिम्बं,
कुवलयनयने तावत्साम्यं नाभजत्त्वन्मुखस्य ।
[5]"जनयतु कनकाम्भोजश्रेणीर्लक्ष्मीः स्वर्गसिन्धुर्-,
घटयतु यदि वा सोऽपि स्रष्टा कोटिश्चन्द्रमाला: ॥ ३०७.१ ॥

नौ म्तौ भ्रौ ललितम् ॥ ३०८ ॥

ननमतभराः । छधैरिति वर्तते । यथा –

[6]"परममुपशमं वर्मीकृत्य स्थितेऽत्र महामुनौ,
प्रहरणमपरं दृष्ट्वा: किंचित्रिशातमतीव यत् ।
पशुपतिविजयं स्मारं स्मारं[2] पराक्रमगर्वितः[3],
फलयसि ललितं पौष्पं शस्त्रं मनोभव किं मुधा ॥ ३०८.१ ॥

भ्रनिसा भ्रमरपदं शैः ॥ ३०९ ॥

भरौ नगणत्रयं सश्च । शैरिति नवभिर्यतिः । यथा –

वारिदमुक्तवारिभरपरिशमितघनरजा,
उद्गतरोहिणीशकरधवलितसकलककुप् ।
कस्य धृतिं ददाति न हि शरदतुरजनिरियं,
चुम्बनलालसभ्रमरपदविदलितकुमुदा ॥ ३०९.१ ॥

म्सौ ज्सौ त्सौ शार्दूललालितं ठैः ॥ ३१० ॥

मसजसततसाः । ठैरिति द्वादशभिर्यतिः । यथा –

---

1) सारंगाणामित्यत्र हरिणानां वृन्दम् । 2) महेति – वराहदंष्ट्रिणाम् । 3) त्वत्स्कन्धकेशम् । 4) सरसि सरे[त्यत्र] पर्वणि भवं पार्वणं राकाजातम् । 5) आदौ जनयत्विति – तदेत्यध्याहारो विधेयः । स्वर्गेति – गङ्गा । स्रष्टेति – ब्रह्मा । 6) परममुपेत्यत्र समाधीकृत्य । निशातं तीक्ष्णम् । ईश्वरविजयं स्मृत्वा स्मृत्वा ।

---

१ सरसि dropped in A. २ तीक्ष्णं C. ३ गर्वितं M.

"नष्टं त्यक्तमिथःप्रतीक्षणरसैः सारंगमिथुनैर्,
यातं विस्मृतशृङ्गभारविधुरैर्व्रीणसकुलैः।
लीनं पल्वलपङ्क एव सहसा क्रौडैर्ध्वनेति चेत्,
कान्तोचाटुविधित्सयापि हि भवान् शार्दूल ललितम् ॥ ३१०.१ ॥

मतन्जभ्राः कुरङ्गिका डछैः ॥ ३११ ॥

मतनजभराः। डछैरिति पञ्चभिः सप्तभिश्च यतिः। यथा—

"अस्या वक्त्रेन्दौ विजयिनि चिराय लाञ्छनवर्जिते,
प्रालेयांशो त्वं स्फुरसि दिवि धृष्ट नित्यमचेतनः।
साकूतालोकाद्भुतनयनकेलिनिर्जितलोचना,
याऽरण्ये तस्थावुचितचतुरेह सैव कुरङ्गिका ॥ ३११.१ ॥

न्सौ मौ यावनङ्गलेखा चडैः ॥ ३१२ ॥

नसममयाः। चडैरिति षड्भिः पञ्चभिश्च यतिः। यथा—

"प्रियसखि मधुं मा स्मावज्ञासीर्मानयैनं यथावत्,
तव हि वकुले क्रीडामित्रेऽस्मिन् पुत्रके चूतवृक्षे।
भवनपरिखापद्मिन्यां सख्यां न्यस्तरोलम्बवर्णा-,
वलिकिसलयव्याजादेतेनानिन्यिरेऽनङ्गलेखाः ॥ ३१२.१ ॥
विबुधंप्रियेत्यन्ये। ॥ ३१२.१ ॥

र्सौ जौ भावुज्ज्वलं जैः ॥ ३१३ ॥

रसजजभराः। जैरित्यष्टभिर्यतिः। यथा—

"पाणिपादविलोचनाननपद्मकाननशालिनी,
निम्ननाभिमहाह्रदा त्रिवलीतरंगविभूषिता।

---

1) नष्टमित्यत्र त्यक्तं मिथो यत्र क्रियाविशेषणम्। विस्मृतशृङ्गभारं यथा स्यादेवं विधुरैः पीडितैः गण्डकजीवैः। क्रोडैर्वराहैः। ललितं सविलासं यथा भवति तथा। 2) अस्याः वक्त्रेन्दावित्यत्र हे प्रालेयांशो चन्द्र। रे धृष्ट त्वं अस्या वदनेन्दौ सर्वोत्कृष्टे सति कलङ्कहीने सति आकाशेऽचेतनः सन्नित्यं स्फुरसि अतो हेतोः त्वत्तः इह लोके सा कुरङ्गिकाप्युचितचतुरा या अस्याः साभिप्रायालोकनाद्भुतनयनकेल्या निर्जिते विलोचने यस्याः सा एवंविधा सती अरण्ये तिष्ठति स्म। मृगी सा पशुरपि धन्या या अरण्ये लज्जिता सती वसति। त्वं तु पशोरपि पशुः यत् निर्जितोऽपि गगने भ्रमसीति भावः। 3) प्रियसखि मधुमित्यत्र हे इष्टसखि मधुं वसन्तं भावगण्य किं तु एनं मानय। अनेन हि बकुलसहकारपद्मिनीषु किसलयव्याजात् अनङ्गलेखाः आनिन्यिरे आनीताः। को भावः। दम्पत्योर्मिथस्परस्परं प्रेम्णा लेखप्रेषणं सोऽनङ्गलेखः। यथाहमिह स्थितवत्यपि तावकी त्वं अपि तत्र वसन्नपि मामकः। लिखितपत्रमनङ्गरसाकुला विरहिणी प्रहिणोति पतिं प्रति। एवं पतिरपि तां दयितां प्रति प्रेषयति। 4) पाणिपादेत्यत्र त्रिवली उदरस्था वलित्रयी। चक्रवर्त्यत्र—पक्षिविशेषः।

---

१ प्रतिक्षण O. २ जातं B. ३ ध्वनिति N. ४ कांचादु० N; ५ लोकाद्भुत० N. ६ this is found under s. 313 after the word यतिः in BCDFNP; but this is never the place where n. indicates alternative names.

कुङ्कुमारुणपीवरस्तनचक्रवाकयुगाञ्चिता,
केलिसिन्धुरिवोज्वला मदनस्य राजति कामिनी ॥ ३१३.१ ॥

मालिकोत्तरमालिका वेत्यन्ये ॥ ३१३.१ ॥

नौ रीर्निशा डैः ॥ ३१४ ॥

नद्वयं रचतुष्टयं च। डैरिति त्रयोदशभिर्यतिः। यथा—

"मलयजरसलिप्तरम्याङ्गभाजां सिते वाससी,
शरदि हृदि च बिभ्रतीनां विशुद्धां नवैकावलीम्।
विकचकुमुदकर्णपूराञ्चितानां कुरङ्गीदृशां,
हिमरुचिकिरणावदाताभिसृतुं निशा श्रेयसी ॥ ३१४.१ ॥

तारकेत्यन्ये ॥ ३१४.१ ॥

नौ सौ त्यौ पङ्कजवक्त्रा घडैः ॥ ३१५ ॥

नननसतयाः। घडैरिति चतुर्भिर्नवभिश्च यतिः। यथा—

"इह किमु विलसति सर्वऋतुश्रीः किं नु[2] मृगाक्षी,
बहुजनजडिमविजृम्भणहेतुः कुन्दैरदा[3] वा।
अभिनवमृदुतरपल्लवपाणिः संभृततृष्णा,
समुदितनिविडपयोधरभारा पङ्कजवक्त्रा ॥ ३१५.१ ॥

सजभ्सा[4]ः सुरभिर्खिर्डैः ॥ ३१६ ॥

सनजनभसाः। त्रिर्डैरिति त्रीन् वारान् पञ्चभिर्यतिः। पञ्चभिः पञ्चभिः पञ्चभिश्च यतिरित्यर्थः। यथा—

"स्फुटदुज्ज्वलवकुलाकुलमधुपावलिरसितैः,
पवनाहतलवलीदलपटलैरतिचपलैः।
मदने प्रियसुहृदि प्रतिभुवनं कृतविजये,
"सुरभिर्भुवमिह गायति परिनृत्यति मुदितः ॥ ३१६.१ ॥

म्यौ न्सौ त्सौ क्रीडा चचैः ॥ ३१७ ॥

यमनसतसाः। चचैरिति षड्भिः षड्भिर्यतिः। यथा—

---

1) मलय[ज]रसेत्यत्र कर्णपूरेति—कर्णाभरणम्। कुरङ्गीदृशां स्त्रीणाम्। 2) इह किमु विलसतीत्यत्र हेमन्ते शीतेन जाड्यं भवति। ग्रीष्मे जनालस्यम्। शिशिरे कुन्दाः पुष्पन्ति। वसन्ते पल्लवाः निष्पद्यन्ते। ग्रीष्मे तृष्णा भवति पक्षेऽभिलाषः। प्रावृषि पयोधरा मेघाः पक्षे स्तनौ। शरदि कमलानि विकसन्ति पक्षे वदनसरोरुहाणि भाः। 3) स्फुटदुज्ज्वलेत्यत्र मदने कामे। 4) सुरभिर्वसन्तः।

---

१ चेत्यन्ये ब; मालिकोत्तरमन्ये ब. २ किं नु ब. ३ कुन्दरदा ब. ४ सिं. ब्र. ५ त्रिर्डैरिति ब.

[1]यदि प्राप्तो बन्धं यदि विरहितो विन्ध्याचलभुवा,
वियुक्तः कान्ताभिर्यदि च तदपि स्तम्बेरमपते ।
नरेन्द्रस्ते पूजां रचयति सदा किं चैष भवता,
रणक्रीडामैत्रीं घटयति ततो मा गाः शुंचमिमाम् ॥ ३१७.१ ॥

[2]न्सौ म्तौ भ्रौ हरिणीपदं चयैः ॥ ३१८ ॥

नसमतभराः । चयैरिति षड्भिश्चतुर्भिश्च यतिः । यथा—

[3]अधिगुणधनुर्दण्डं पश्यंल्लुब्धकं गहने वने,
सरभसमपक्रामन्यङ्कुश्चिन्तयन्निति [4]ताम्यति ।
सरसमधुरोद्गारैर्गीतैर्वागुरामिरिव प्रिया-,
ऽहह निगडिता दत्ते नैषा सांप्रतं हरिणी पदम् ॥ ३१८.१ ॥

भीन्या भङ्गिः ॥ ३१९ ॥

भगणचतुष्टयं नयौ च । यथा—

मा कुरु संपदि संमदमापदि विसृज विषादं,
दीनजनेषु कृपां कुरु संस्मर चिपुरुषाणाम् ।
संत्यज पापचरित्रमुदञ्चय[5] सुचरितमालाम्,
अद्भुतभङ्गिरियं पुरुषोत्तमसरणिरनिन्द्या ॥ ३१९.१ ॥

विच्छित्तिरिति कश्चित् ॥ ३१९.१ ॥

स्जौ स्जौ यौ वुद्बुदम् ॥ ३२० ॥

सजसजतराः । यथा—

[5]असमं दधन्नयपयो गभीरमध्यः सनातनो,
विमलो जयत्यविरतं जिनेन्द्रसिद्धान्तवारिधिः ।
अतिपेशलैर्गम[6]गणैस्तरंगिते यत्र सर्वदा,
क्षणदृष्टनष्टतनुभिः कुदृष्टिभिर्बुद्बुदायितम् ॥ ३२०.१ ॥

अतिधृत्यां म्सौ ज्सौ तौ गः शार्दूलविक्रीडितं ठैः[1] ॥ ३२१ ॥

मसजसततगाः । [2]ठैरिति द्वादशभिर्यतिः । यथा—

[3]क्ष्माभृत्सुंगव कोशकन्दरसुखान्निर्गत्य ते संगर-,
क्रीडासून्मदवैरिवारणघटाकुम्भस्थलीः पाटयन् ।

---

1) यदि प्राप्त इत्यत्र स्तम्बेरमेति—हे हस्तिपते । भवता कृत्वा संपादयति । एतेन उक्तिद्वयेन गजस्य महत्त्वमारोप्यते । 2) अधिगुणेत्यत्र गुणमधिरुह्य धनुर्दण्डो यस्येति तं व्याधं न्यङ्कुर्हरिणः । 3) खेदं करोति । 4) उदञ्चयेति—पुष्टिं नय । सरणिर्मार्गः । संपदि आनन्दो न त्रियते विपदि विषादो नेत्यादिलक्षणा अद्भुता । 5) असममित्यत्र असाधारणत्वम् । नया नैगमाद्यास्तद्रूपं पयस्तेन गभीरं गम्भीरं मध्यं मध्यप्रदेशो यस्येति । नित्यस्थितिभागर्थापेक्षया । 6) सदशपाठममूर्हः । पूर्वं दृष्टाः पश्चाच्च दृष्टनष्टास्तैरिति क्षणक्षयवादिभिः स्यासकायितम् । 7) क्ष्माभृत् इत्यत्र राजानः पक्षे पर्वताः तेषु शृंगवो मुख्यः ।

---

१ शुचिमिमां D; शुभमिमां N. २ sūtras 318-323 dropped in H. ३ ठैरिति N.

दंष्ट्रालो नवलग्नमौक्तिकमणिस्तोमैरसृग्लेखया,
जिह्वालः करवाल एष तनुते शार्दूलविक्रीडितम् ॥ ३२१.१ ॥

म्सौ ज्सौ न्जौ गो वायुवेगा ॥ ३२२ ॥

मसजसनजगाः । [1]ठैरिति वर्तते । यथा—

"[2]त्यक्त्वा पुत्रैकलत्रबन्धुसुहृदां व्यतिकरमञ्जसा,
नित्यं संस्मर वीतरागचरणाम्बुरुहयुगं "[3]रहः ।
हंहो चित्त चिरं प्रसीद किमिदं न हि हृतजीवितं,
जानीषे घनवायुवेगनिहताभ्रपटलगत्वरम्" ॥ ३२२.१ ॥

य्मौ न्सौ रौ गो मेघविस्फूर्जिता चचैः ॥ ३२३ ॥

यमनसररगाः । चचैरिति षड्भिः षड्भिश्च यतिः । यथा—

"[4]निरुन्धानस्तापं जगति कलयंश्चण्डकोदण्डदण्डं,
पदं व्यातन्वानः सततमखिलक्ष्माभृतां चोपरिष्टात् ।
निकामं दुर्धर्षां दिशि दिशि समुल्लासयन् वाहिनीश्च,
त्वमुच्चैश्चौलुक्येश्वर घटयसे मेघविस्फूर्जितानि ॥ ३२३.१ ॥

रम्भेति स्वयंभूः ॥ ३२३.१ ॥

य्मौ न्सौ जौ गो मकरन्दिका ॥ ३२४ ॥

यमनसजजगाः । चचैरिति वर्तते । यथा—

इमां बालां त्रासाकुलमृगवधूविलोलविलोचनां,
किमु त्वं निःशङ्को व्यथयसि मुहुर्विघातविचेष्टितैः[5] ।
"[6]परिक्षोदं चण्डैर्मुसलपरिघैः सहेत न मालती,
मृदुभ्राम्यद्भृङ्गीपदपरिचयाद्बलन्मकरन्दिका ॥ ३२४.१ ॥

य्मौ न्सौ तौ गश्छाया ॥ ३२५ ॥

यमनसततगाः । चचैरिति वर्तते । यथा—

"[7]फलं कालाक्रान्तं कुसुममरसं पत्रं न भोगास्पदं,
बहिस्तत्कार्कश्यं किमपि सहजं निःसारमन्तर्वपुः ।

---

1) त्यक्त्वा पुत्रेत्यत्र मित्राणां संबन्धम् । 2) रहः एकान्ते वनमध्ये इत्यर्थः । 3) मेघसमूहवत् गत्वरं विनाशि । 4) निरुन्धानस्तापमित्यत्र जलदविचेष्टितानि । यथा मेघो हि तापं निरुणद्धि अयमपि अन्येषां राज्ञाम् । खण्डं पक्षे इन्द्रधनुः । क्ष्माभृत् राजा पर्वतश्च । वाहिनी कटकं नदी वा । 5) इमां बालामित्यत्र धृष्टविचेष्टितैः । 6) चूर्णभावम् । 7) फलं कालाक्रान्तमित्यत्र हे ताल तव फलं कालदोषदूषितं धिक् । नीरसं कुसुमं धिक् । न भोगयुक्तं पत्रं धिक् । बहिस्तात् प्रसिद्धं कार्कश्यगुणं प्रकृतिभवं धिक् । अन्तर्मध्ये निःसारगुणं धिग् विदूरं ।

---

१ ठैरिति N. २ बन्धुकलत्रपुत्र A. ३ कार्कश्यं N.
१० छन्दो०

विवृद्धिं गृध्राणां विगुपकरणं शाखाप्रपञ्चो न ते,
किमन्यत्ताल स्याद्विरलविरला छायापि नो शीतला ॥ ३२५.१ ॥

त्रिर् ज्सौ गो रतिलीला ॥ ३२६ ॥

त्रीन् वारान् जगणसगणौ गुरुश्च। जसजसजसगाः। चचैरित्यनुवर्तते। यथा—

दुनोति वत तां कराम्बुजतले निवेशितकपोलां,
किमप्यहरहस्तथा कथमपि त्वदीयविरहाग्निः।
यथा परतनुर्न पङ्कजदलैर्न मौक्तिककलापैः,
न चन्दनरसैर्न चन्द्रकिरणैः करोति [1]रतिलीलाम् ॥ ३२६.१ ॥

म्तौ न्सौ रौ गः पुष्पदाम ङ्छैः ॥ ३२७ ॥

मतनसररगाः। ङ्छैरिति पञ्चभिः सप्तभिश्च यतिः। यथा—

सेयं साकाङ्क्षा त्वयि मृगनयना [2]संगताङ्गी विलासैः,
लीलालोलभ्रूर्दिवि कमलवनं कुर्वती नेत्रपातैः।
हंहो पश्यैतद्विरहविधुरया ते यया [3]सावहित्थं,
प्रक्षिप्तं कण्ठे विकसितबकुलासूत्रितं पुष्पदाम ॥ ३२७.१ ॥

म्तौ न्सौ तौ गो वञ्चितम् ॥ ३२८ ॥

मतनसततगाः। ङ्छैरिति वर्तते। यथा—

[4]"कैश्चिद्भावैः कैरविदितसुकृतैः शुष्कविमुक्तात्मभिः,
कौलीभूयान्यैर्विहितपशुगणाघातैः परैर्यज्वभिः।
जैने धर्मेऽस्मिन् सति सततकृपापीयूषपात्रेऽप्यहो,
स्वच्छन्दं धूर्तैरहह कुटिलया बुद्ध्या जगद् वञ्चितम् ॥ ३२८.१ ॥

[1]विम्बितमित्यन्यः ॥ ३२८.१ ॥

म्नौ न्नौ रौ गो मुग्धकं च्छैः ॥ ३२९ ॥

यमननररगाः। च्छैरिति षड्भिः सप्तभिश्च यतिः। यथा—

परिभ्राम्यद्भृङ्गं [5]श्वसितपरिमलैर्जपापाटलोष्ठं",
गिरा लीलालापप्रणयमधुरया सदानन्ददायि।
स्फुरत्यन्तश्चित्तं [6]" लिखितमिव सखे ममाद्यापि तस्याः,
[7]"प्ररूढप्रेमाद्याश्चकितमृगदृशो मुखं मुग्धकं तत् ॥ ३२९.१ ॥

---

1) रतिलीलां स्वास्थ्यम्। 2) सेयं सा इत्यत्र शोभिताङ्गी। 3) भ्रूभङ्गादिभिः आकारगोपनसहितम्। 4) कैश्चिदित्यत्र नास्तिकैरज्ञानपुष्पैः दयाहीनात्मभिः। कौलीभूयेति—तापसीभूय। अन्यैर्योगिभिः। 5) परिभ्राम्यदित्यत्र जपापाटलवद् रक्तोष्ठम्। 6) चित्तस्यान्तः अन्तश्चित्तम्। 7) उत्पन्नरागायाः। मुग्धकं मनोहरम्।

---

१ पदैर्यं० N. २ विम्बितं A, चित्तं N. ३ भ्राम्यद्भृङ्गं N.

रः सौ तो जौ ग ऊर्जितं जैः ॥ ३३० ॥

रससतजजगाः । जैरिति दशभिर्यतिः । यथा—

नेक्षसे किमहो [1]"जलरिक्तां स्वामपि तावदिमां तनूं,
नो निषेधसि चण्डमरीचेर्दुःसहमातपजृम्भितम्[2]" ।
शारदे समयेऽपि तदस्मिन् पूरितपर्वतकन्दरा-,
प्यूर्जितस्तनितानि दधानस्तोयद किं न हि लज्जसे ॥ ३३०.१ ॥

नभ्रसा जौ गस्तरलम् ॥ ३३१ ॥

नभरसजजगाः । यथा—

श्रय विशुद्धधिया जिनेश्वरपादपङ्कजभृङ्गतां[3],
प्रकटय [4]"प्रशमं भजस्व गुरूनधीष्व सदागमम् ।
विरचयार्थिजनं कृतार्थमिमं कुरुष्व तपः परं,
तरलमायुरिदं गृहाण तदीयमेतदहो फलम् ॥ ३३१.१ ॥

भौ भः सौ ज्गौ माधवीलता छैः ॥ ३३२ ॥

मरभससजगाः । छैरिति सप्तभिर्यतिः । यथा—

निःसामान्यं तवैतत् किमपि विराजति दक्षिणानिल,
[5]"प्रावीण्यं यत्प्रगल्भामिह सहकारलतामनुव्रजन् ।
अश्रान्तं साभिलाषः स्पृशसि समुन्नयसे विधूनय-,
स्यालिङ्गस्याशु चुम्बस्यभिनवकोमलमाधवीलताम् ॥ ३३२.१ ॥

सूगौ तरुणीवदनेन्दुः ॥ ३३३ ॥

सगणाः षट् गुरुश्च । यथा—

मृगनाभिविनिर्मितपत्रलतावलिलाञ्छनधारी,
जननेत्रचकोरमहोत्सवकृत्कमलद्युतिहारी ।
जगतां विजयाय निबद्धमतौ [6]"क्षपलक्ष्मणि सद्यो,
जयति प्रतिपन्नसहायपदस्तरुणीवदनेन्दुः ॥ ३३३.१ ॥ १९।१३ ॥

कृतौ भौ भौ व्भौ ल्गौ सुवदना छछैः ॥ ३३४ ॥

मरभनयभलगाः । छछैरिति सप्तभिः सप्तभिर्यतिः । यथा—

---

1) नेक्षसे इत्यत्र जलशून्याम् । 2) आतपविलसितम् । 3) श्रय विशुद्धेत्यत्र भ्रमरत्वम् । 4) उपशमभावम् । 5) निःसामान्यमित्यत्र प्रवीणस्य भावः प्रावीण्यम् । 6) क्षपलक्ष्मणि कन्दर्पे ।

---

१ विनिर्मित पत्र० ३. २ साथा ४.

"आकल्पं कल्पयित्वाभिनवमृगमदैरामुच्य"[1] च क्षिति-,
क्षौमे कृत्वा विभूषां मरकतमणिभिर्गन्तुं प्रियगृहम्।
औत्सुक्याद्यावदस्थात् पथि "मुखशशिना तावद्धतध्वान्तमेषी,
ज्योत्स्नी जातेति मूर्च्छामभजत सहसा कष्टं सुवदना॥ ३३४.१॥

दशाग्लौ वृत्तम्॥ ३३५॥

गुरुलघू दशवारानावृत्तौ वृत्तं नाम वृत्तम्। यथा—

"प्रीणिताखिलार्थिदानमूर्जितारिजिष्णुपौरुषं महर्षि-,
चित्रकृच्चितेन्द्रियत्वमेवमद्भुतान् गुणान् दधन्नरेन्द्र।
रामपार्थधुन्धुमारमुख्यपूर्वभूमिपालवृत्तमत्र,
सत्यतां चिराय नीतवानसि त्वमुच्चकैश्चुलुक्यचन्द्र॥ ३३५.१॥

स्भौ नौ म्यौ ल्गौ मत्तेभविक्रीडितं दैः॥ ३३६॥

सभरनमयलगाः। दैरिति त्रयोदशभिर्यतिः। यथा—

उदयाद्रेः प्रसरन्नयं दिनपतिः प्रत्यग्रसन्ध्यातप-,
स्फुटसिन्दूररुचिविसूत्रित[5]-तमःसंदोहवल्लीवनः।
तनुते "वाजिजयोल्लसत्कटपुरःकामत्सुपर्णध्वज-,
प्रतिकारोपरिवेल्लदायतकरो मत्तेभविक्रीडितम्॥ ३३६.१॥

नो भौ मः सौ ल्गौ मुद्रा दैः॥ ३३७॥

नभभमससलगाः। दैरिति एकादशभिर्यतिः। यथा—

अयमरण्यमहीष्वपि चूतास्वादकषायितकोकिला-,
कलकलच्छलतश्चिरमाज्ञामस्खलितामिह [6]वर्तयन्।
कुपितमानवतीकलहानामन्तकरः पुरतः सखे,
"मकरकेतुमहीपतिमुद्राव्यापरणं तनुते मधुः॥ ३३७.१॥

उज्ज्वलमित्यन्ये॥ ३३७.१॥

यमौ नौ तौ गौ शोभा चछैः॥ ३३८॥

यमनततगगाः। चछैरिति षड्भिः सप्तभिश्च यतिः। यथा—

---

1) आकल्पं वेषं रचयित्वा। 2) आमुच्येति—परिधाय। 3) स्वमुखप्रभाभिः भूदेशे उद्द्योतिते परलोकनाशातलज्जया गन्तुमशक्तेति भावः। 4) विसूत्रितेति—विनाशिता। 5) वाजिजयेति—वाजिजवाय वेगाय उल्लसन्ती कक्षा तर्जको यस्य स चासौ कामदक्षणसारथिरपरिष्टाद् वल्गदायतभुजः। 6) अयमरण्येत्यत्र वर्तयन् प्रवर्तयन्। 7) काममहीशमधानपदं आज्ञाज्ञापनमिति यावत्।

---

१ वशिति क्षौमे N. २ तावद्धततमी ADEN. ३ दशल्गा F. दसलगा G; ४ प्राणिता N. ५ तपः स्फुट० A. ६ कसपुरः B. ७ बलादायत० N. ८ मुद्रयापरणं N.

[1]गता लाक्षारागद्युतिरधरदलात्पत्रवल्ली विलुप्ता,
कपोले पर्यस्तं तिलकमलिकतो लम्बितः केशपाशः ।
च्युतः कर्णोत्तंसः करमणिवलयं स्रस्तमस्यास्तथापि,
प्रियेण [2]प्रत्यग्रः प्रथयति महतीं संगमो हन्त शोभाम् ॥ ३३८.१ ॥

म्नौ भ्नौ तौ गौ चित्रमाला छचैः ॥ ३३९ ॥

[3]मरभनततगगाः । छचैरिति सप्तभिः षड्भिश्च यतिः । यथा—

[3]सा काङ्क्षत्यन्यमेवायमपि वत तां सारसौन्दर्यलक्ष्मीर्-,
एषा चैतं वराकी तरुणनिवहोऽमूं च लावण्यपुण्याम् ।
एवं प्रत्यग्रकेलीकुशललालितैर्वद्धहासं वसन्ते,
देवः पुष्पायुधोऽसौ रमयति रतिं दर्शयंश्चित्रमालाम्[4] ॥ ३३९.१ ॥
सुप्रभेत्यन्यः ॥ ३३९.१ ॥

म्नौ स्नौ म्यौ ल्गौ सद्रत्नमाला ङजैः ॥ ३४० ॥

मनसनमयलगाः । ङजैरिति पञ्चभिरष्टभिश्च यतिः । यथा—

सन्ध्यान्ते प्रतिदिशमियं समुदिता तारावलिः शोभते,
[5]श्यामाया अभिसरणकेलिरभसाद्भ्रष्टेव मुक्तावलिः ।
यद्वा व्योमनि मनसिजेन लिखिता जैत्रप्रशस्तिर्निजा,
विस्फूर्जद्धनतमतमिस्रफणिनां सद्रत्नमालाथवा ॥ ३४०.१ ॥

भीरसल्गा नन्दकम् ॥ ३४१ ॥

भगणचतुष्टयं रसलगाश्च । यथा—

[6]अद्भुतसंगरसागरमन्थनसंभवां कलयन् श्रियं,
दोष्णि दधद्सुधावलयं च कुमारपालमहीपते ।
त्वं बलिराजनियत्रणविश्रुतविक्रमः पुरुषोत्तमः,
केवलमेष जगद्विजयी त्वदसिर्द्विषां न तु [7]नन्दकः ॥ ३४१.१ ॥

---

1) गता लाक्षेति—चुम्बनेनेति शेषः । विलुप्तेति—भङ्गमर्दनेनेति । 2) प्रत्यग्रो नवीनः कथयति । 3) सा काङ्क्षत्यन्यमेवेत्यत्र सा नारी अन्यं पुरुषं काम्यति । स तु पुमान् तां दयिताम् । पुनः एषा सारसौन्दर्यलक्ष्मीर्वराकी सती एनं प्रत्यक्षदृष्टं पुमांसम् । तरुणपुरुषनिवहः अमुं लावण्यपुण्यां एवंविधां अभिलषति । एवं नूतनकेलिनिपुणविलासैः वद्धहासं यथा भवति तथा कामः रतिं दयितां रमयति । 4) श्चाश्चर्यमालां अनया रीत्या वसन्ते दर्शयन्नित्यर्थः । 5) सन्ध्यान्ते प्रतिदिशमित्यत्र श्यामाया षोडशवर्षदेशीया कामिनी तस्याः । 6) अद्भुतेत्यत्र संग्रामसमुद्रमथनोद्भवाम् । 7) नन्दको हर्षकरः । पक्षे विष्णोः खड्गस्य नन्दक इति नाम । यदाहुः—खड्गोऽस्य पाञ्चजन्योऽङ्गः शीर्णसोऽसिसु नन्दक इति ।

---

१ छचैः C. २ चैतं वराक्य A; चैवं वराकी E. ३ रत्नमाला PGH. ४ तमतमिस्र DJP.

भौ न्भौ भौ ल्गौ कामलता ॥ ३४२ ॥

भरनभभरलगाः। यथा–

कौतुकमात्रमेव भवतो यदि शस्त्रपरिग्रहे तदा,
चापशिलीमुखान् घटयितुं कुरु चूतदलावमोटनम्।
कस्य मनः करोति न हि वश्यमसौ पुरतो यतः स्फुरन्,
काम लतावलीतरलनो मलयानिल एष ते सखा ॥ ३४२.१ ॥

उत्पलमालिकेत्यन्ये ॥ ३४२.१ ॥

भौ न्भौ भौ ल्गौ दीपिकाशिखा गचैः ॥ ३४३ ॥

भनयननरलगाः। गचैरिति त्रिभिः षड्भिश्च यतिः। यथा–

प्राक्तनसुकृतसमूहे [1]"बलवदिह समुल्लसत्यपि,
"दुर्नयकरणमनीषा श्रियमपहरति क्षणान्नृणाम्।
पश्यत यदनुपभुक्तेऽपि हि विनिहिततैलपूरणे,
निर्भरचलितसमीरो [2]"दलयति खलु दीपिकाशिखाम् ॥ ३४३.१ ॥

त्भौ ज्भौ ज्भौ ल्गौ शशाङ्करचितम् ॥ ३४४ ॥

तभजमजभलगाः। यथा–

त्वं निर्जितोऽसि निरवद्यया [3]"वरतनोर्मुखाम्बुजरुचा,
विस्तीर्णनेत्रललितैः कुरङ्गहतकोऽयमप्यवजितः।
युक्तं शशाङ्क रचितं त्वया [4]"यदमुना सहैक्यमधुना,
संगः समानगुणयोगिभि[6]"र्भवति देहिनां [7]"समुचितः ॥ ३४४.१ ॥ २०।११

प्रकृतौ म्रौ भौ यिः स्रग्धरा छछैः ॥ ३४५ ॥

मरभना यगणत्रयं च। छछैरिति सप्तभिः सप्तभिर्यतिः। यथा–

आवासः पर्णशाला वपुषि च वसनं नूतना त्वक्तरूणां,
पाणावापाढयष्टि:[8]" शिरसि च चिकुरैर्नव्यगुम्फो जटानाम्।
कर्णेऽक्षस्रग्[9]" धरायाः परिवृढ[10]" विपिने त्वद्भयात् संप्रतीर्थं,
वृत्तिर्द्वित्रैरहोभिस्त्वदरिनृपजनैः शिक्षिता तापसानाम् ॥ ३४५.१ ॥

---

1) प्राक्तनेत्यत्र बलवन्सुपुरित्यर्थेऽव्ययम्। 2) दुःखं नयति इति दुर्नयानि तानि करणानि कार्याणि तेषामिच्छा। 3) स्फोटयति। 4) त्वं निर्जितो[सि] निरेत्यत्र कामिन्याः। 5) अमुना मृगेण। ऐक्यं मैत्र्यम्। 6) पुरुषैः। 7) समुचितो योग्यः। 8) आवास इत्यत्र आषाढो मतिनां दण्डः। 9) अक्षस्रग् अक्षमाला। 10) पृथ्व्याः स्वामिन्।

---

१ प्राक्तने N. २ बलित० N.

त्रौ भौ ज्भौ रः कथागतिः[1] ॥ ३४६ ॥

तरभनजभराः। छठैरिति वर्तते। यथा—

[1]"केष्वप्यखर्वगर्वाद्विधुरितभुवनेष्वनर्गलगर्जितैर्,
अम्भोधरेष्विवाशु श्रवणपथगतेष्वभूद्विनिमीलितम्।
[2]"आखण्डलस्य कामप्यभजत नयनासितोत्पलकाननं,
प्रीतिं चुलुक्यचन्द्र प्रकृतनृपकथागते त्वयि तु क्षणात् ॥ ३४६.१ ॥

भ्रौ भ्रौ त्रौ रो ललितविक्रमो जैः ॥ ३४७ ॥

भरनरनरराः। वैरिति दशभिर्यतिः। यथा—

सद्गुणरत्नरोहणगिरे यशोधवलिताखिलाशामुख,
द्वेषिवधूमुखाम्बुजविधो वयं किमिव वर्णयामस्तव।
यस्य वशंवदत्रिभुवनश्रिरं विबुधसुन्दरीमण्डलैर्,
जम्भरिपोश्चमत्कृतिरसं दधल्ललितविक्रमो गीयते ॥ ३४७.१ ॥

मौ तनिसा मत्तक्रीडा जडैः ॥ ३४८ ॥

मद्वयं तगणो नव्रयं सश्च। जडैरिति अष्टभिः पञ्चभिश्च यतिः। यथा—

नो जानीते कृत्याकृत्यं विलुठति च [3]"धरणितलशयने,
भूयो भूयो मूर्च्छां धत्ते द्रढयति न शिथिलमपि वसनम्।
[4]"अर्थापेतं निःसंबन्धं वचनमपि वदति नदतितरां,
मत्तक्रीडामाप्ता[5]" बाला सुभग तव [6]"नवविरहविधुरा ॥ ३४८.१ ॥

रजतनिसाश्चन्दनप्रकृतिः ॥ ३४९ ॥

रजता नव्रयं सश्च। यथा—

दर्शनादपदीह संतापमपहरति तदपि वत [7]"तया,
नार्जितं धनं प्रभूतं जरसि सुखदमतिसरलतया।
किं तु चन्दनप्रकृत्या सखि सततमपि फलरहितया,
[8]"दुर्भुजंगघृष्टया यौवनमिदमफलमहह गमितम् ॥ ३४९.१ ॥

---

1) केष्वप्यखर्व [ति]—केष्वपि भूपालेषु। 2) इन्द्रस्य सहस्रनेत्रकमलवनं त्वत्कथाश्रवणेन प्रीतिं प्राप यत्पूर्वमन्येषां दुर्दान्तराज्ञां कथाश्रवणेन मीलितं समभूत्। मेघगर्जारवत्। 3) नो जानीते इत्यत्र धरणीतलमेव शयनं यस्येति। 4) अर्थरहितमाकाङ्क्षाहीनम्। 5) बाला प्राप्ता। 6) नवीनविरहपीडिता। 7) दर्शनादपदीत्यत्र तयेति—प्रकृत्या। 8) दुष्टभुजंगघृष्टतया यथा दुष्टभुजंगः पक्षनेन फलं नाशयति।

---

१ छठैः added in GH. २ ललिता० G; sūtras 347-362 dropped in H. ३ द्रढयति N. ४ घृष्टया P.

न्जभजिराः सिद्धिः ॥ ३५० ॥

नजभा जत्रयं रथ। यथा—

सततनमत्सुरेंदरशिरःशुचिरत्नकिरीटमालिका,
विमलमयूखशेखरितपादनखद्युतिजालशालिनम्।
विपुलदयानिधिं [1]प्रणयिकल्पतरुं भजत जिनेश्वरं,
यदि [2]भवकातरस्त्वमिह वाञ्छसि सिद्धिमनुत्तमां सखे ॥ ३५०.१ ॥

चित्रलता, रुचिरा, शशिवदना चेत्यन्ये ॥ ३५०.१ ॥

नजीभ्रा वनमञ्जरी ॥ ३५१ ॥

नगणो जगणचतुष्टयं भरौ च। यथा—

सह धनुषा समदो मदनः किल [3]शीतदीधितिमौलिना,
सुहृदिह भस्म कृतस्तव [4]दीप्तहुताशपिङ्गलया दृशा।
इति हि मधो कुमते स्मर मा विचरान्तिके तरलध्रुवां,
विरहजुषां सकलज्वलिताङ्गभृतां दधद् वनमञ्जरीः ॥ ३५१.१ ॥

त्री रूनौ रस्तरंगः ॥ ३५२ ॥

रनरनरनराः। यथा—

निर्ममो भव विधेहि पञ्चपरमेष्ठिसंस्मरणमन्वहं,
संयमं कुरु भज क्षमां यदि समीहसे [5]सुखमनश्वरम्।
यौवनं किल तडिल्लताचपलमभ्रचञ्चलमिदं धनं,
जीवितव्यमपि मारुताहतसरित्तरंगतरलं सखे ॥ ३५२.१ ॥ २१८ ॥

आकृतौ भ्रौ त्रौ त्रौ न्गौ भद्रकं जैः ॥ ३५३ ॥

भरनरनरनगाः। जैरिति दशभिर्यतिः। यथा—

देव जगत्त्रयैकतिलक प्रभो [6]प्रणयिलोककल्पविटपिन्,
पुण्यवतां [7]शिरोमणिपदव्यभाजि जिननाथ तैरिह जनैः।
ये विकचैश्चिराय चरणारविन्दयुगमर्चयन्ति कुसुमैः,
भद्रकमन्दगीतिभिरभिष्टुवन्ति च चरित्रमत्रभवतः ॥ ३५३.१ ॥

---

1) सततनमदित्यत्र प्रणयिनो भक्ताः। 2) भवात्संसारात् कातरो भीतः। 3) सह धनुषेत्यत्र शीतदीधितीति-ईश्वरेण। 4) दीप्तेति-तृतीयलोचनेन। को भावः? कन्दर्पो हि धनुषा बलवान् तद्धनुः शकलीकृतं स च विनाशितश्च। त्वं च तस्य मित्रम्। यदि ईश्वरेणैतेन लोचनेन प्रज्वालितः। किं चासां क्षीणां विरहयोगात् [अङ्गं] दाहानुपकरणं यत् त्वामपि मित्रबलाभावात् भस्मीकरिष्यतीति भावः। 5) सुखमनश्वरं अविनाशि। 6) देव जगत्त्रयैकेत्यत्र भक्तभवि[क]कल्पपादप। 7) शिरोमणि० मुकुटभावं त्वमाजि पदम्।

---

१ जगणत्रयं GNP. २ वनमंजरीः N. ३ अनधिरं A. ४ पदं त्वमाजि NEP. ५ सुमन० A.

स्तौ त्रौ स्त्रौ गौं महास्रग्धरा जछैः ॥ ३५४ ॥

सततनसररगाः । जछैरिति अष्टभिः सप्तभिश्च यतिः । यथा—

"अभि नागान्याति योऽयं स मम मम पुनर्यच्छिरो" हुकरोति,
प्रचलोऽयं "यत्कबन्धः प्रहरति स तु मे प्राणनाथोऽस्तु सख्यः ।
दलयन् यो दुष्टभूपानहमहमिकया स्वर्गसीमन्तिनीना,
परिशुश्रावेति वाचो वरवरणमहास्रग्धराणां रणेषु ॥ ३५४.१ ॥

भृगौ मदिरा ॥ ३५५ ॥

भृगाविति भगणसप्तकं गुरुश्च । यथा—

ह्रीविनियन्त्रणविघ्नमपाकुरुतेऽभिनयावतरद्वयसां,
प्रौढपुरन्ध्रिजनस्य वथा तिरयत्यपराधपदं सहसा ।
कोपपदेन च गोत्रपरिस्खलितं न च कारयते तदसौ,
कामसखी मदिरेह "सतर्षमभाजि चिरं किल कामिजनैः ॥ ३५५.१ ॥

लताकुसुममित्यन्ये ॥ ३५५.१ ॥

मत्यनीगा वरतनुः ॥ ३५६ ॥

मतया नगणचतुष्टयं गुरुश्च । यथा—

"चक्षुः सौन्दर्यं मृगाध्वां परभृतयुवतिषु मधुरगिरं,
यातं हंसीषु स्मितमुद्बुद्धनवविचकिलकुसुमतंतिषु ।
रोलम्बश्रेण्यां कचलक्ष्मीं वदनरुचिमपि विकचकमले,
न्यास कृत्वा सा खलु याता क्वचिदपि मम वरतनुरधुना ॥ ३५६.१ ॥

म्सौ ज्सौ ज्सौ ज्गौ दीपार्चिर्दैः ॥ ३५७ ॥

मसजसजसजगाः । दैरिति द्वादशभिर्यतिः । यथा—

प्रायो दुष्कृतकर्मसु स्वयममी प्रयान्ति पिशुनाः सहायतां,
यद्वत्तद्वदनिन्दनीयसुकृतक्रियासु भृशमन्तरायताम् ।
वह्नौ सततजन्तुसङ्कुलमहावनद्युति सरघा समीरणो,
दीपार्चिष्यखिलोपकारिणि भवत्यकाण्डकुपितान्तकः खलु ॥ ३५७.१ ॥

२२।५ ॥

विकृतौ न्जौ भ्जौ भ्जौ भ्लौ गोऽश्वललितं दैः ॥ ३५८ ॥

नजभजभजभलगाः । दैरित्येकादशभिर्यतिः । यथा—

---

1) अभिनागानिलत्र नागान् हस्तिनोऽभि । समराङ्गणे युध्यमानेषु भटेषु सुराङ्गनानां परस्परं वचनप्रपञ्च । 2) यस्य शिरः पश्चिम । 3) मस्तकहीन वपुः कबन्धः । 4) सतर्षमिति—सतृष्णम् । 5) चक्षुः सौन्दर्यमित्यत्र भूतवर्णक पुमान् कश्चित् प्रति वक्ति मम कान्ता एतानि वस्तूनि पशु मुक्त्वा गता ।

---

१ one म dropped in ५, २ प्रचलोय ABP; प्रभोयं D. ३ हसीषु N. ४ कुसुमजतिषु M. ५ जगौ N. ६ दीपार्चि दै ५. ७ गथ ललित N.

११ छन्दो०

निरेमारभ्यहसमनमान्यारभदुर्विलोमयुजं,
निरस्तिनद्धो पदन्यञ्जन्तुविरिथदलानुमुलम्।
प्रवर्धनचधुरेक्षण इवं चिरय यनुभूतयापि पदवत्-,
पदद्वारेन्द्रियाधैललितैविरिष्ट" इद यज्ञगतिरिति ॥ ३५८.१ ॥

अत्र केचित्समभगणन्यासे जगणमिच्छन्ति ॥ ३५८.१ ॥

मौ तौ नौल्गा मत्ताक्रीडा जर्टः ॥ ३५९ ॥

ममता नगणचतुष्टयं लघुगुरू च। जर्टैरित्यष्टाभिः पञ्चभिश्च यतिः। यथा—

"हस्ताक्षेपैर्वारंवारं विदलयति किल निकरमानिरहां,
पादानुषैः क्षोणीन्द्राणां विघटयति दशनकुलिशविकटैः।
वेगावेगात्लादन्यर्मेलयति च फणिपटलमुरगपतेर्,
इत्थं मत्ता क्रीडाभावे विरचयति नृपवर तव करिपोता ॥ ३५९.१ ॥

ताज्जूल्गाः शङ्खः ॥ ३६० ॥

तगणात्परं जगणपङ्क्तं लघुगुरू च। यथा—

चौलुक्यनरेश्वर यैभवयासव वीरं गभीरिमवारिनिधे,
सौन्दर्यमनोभव कान्तिनिशाकर सेवकल्पतरो भवतः।
को नाम गुणानिह संकलयेत् किल वच्मि तु किंचन ते यशसां,
"संपर्कमवाप्य स "शङ्खधरोऽभवदद्रिसुताकमितुः" सदृशः ॥ ३६०.१॥

नाद्धंसगतिः ॥ ३६१ ॥

नगणात्परं जगणपङ्क्तं लघुगुरू च। यथा—

मदनगजेन्द्रमहोदयमादधती सहसा विमलप्रसरल्-,
लवणिमसिन्धुरनिद्रितनीलसरोरुहचारुलसन्नयना।
विशदतराम्बरसंपदियं रजनीकरबिम्बमुखं दधती,
शरदिव संश्रितहंसगतिर्युवतिर्विदधाति न कस्य मुदम् ॥ ३६१.१ ॥

महातरुणीदयितमित्यन्ये ॥ ३६१.१ ॥

श्री स्नौ स्त्रग्धिव्रकम् ॥ ३६२ ॥

स्नरनरनरलगाः। यथा—

---

1) निरेमेत्यत्र विरुष्ट आकर्षणं। 2) हस्ताक्षेपैरित्यत्र प्रसारणैः भनक्ति वृक्षाणां समूहम्। पादाः पर्यन्तपर्यंताः। विघटयति चूर्णयति दन्तवज्रसदृशैः। 3) चौलुक्येत्यत्र संबन्धं प्राप्य। 4 नारायणः। 5 अद्रिसुता पार्वती तस्याः कमिता भर्ता शिव. तस्य समानः श्वेतवर्ण इत्यर्थः।

---

१ ध ललितैः N. २ फणिप० N. ३ करिपटा A. ४ धीर CDAP. ५ वंशगति GH.

श्रूयतां नृपकुमारपाल तव दर्शनत्वरितया व्यधायि यत्,
पादतामरसयोः सुवर्णकटके कराम्बुरुह्योश्च नूपुरे।
हारदाम च नितम्बबिम्बफलके भृशं हृदि च रत्नमेखला,
निर्ममे जतुरसोऽलिकेऽधरदले च [1]चित्रकमधीरचक्षुषा ॥ ३६२.१ ॥

भौ स्भौ नित्यगाश्वपलगतिः ॥ ३६३ ॥

भसभा नत्रयं लघुर्गुरू च। यथा—

भूमिभृतामङ्केषु विलासं स्वरुचिसदृशमति[2] हि विदधती,
सत्वरमानीता स्फुटमुच्चैः पटह इव नदति यशसि निजे।
[3]दुर्ललिता स्तम्बेरमकान्तेव नृपवर [4]दृढतरगुणैर्गगैः,
साधु भुजस्तम्भे भवता श्रीरतिचपलगतिरिह निगडिता ॥ ३६३.१ ॥

उसौ उसौ यित्रया वृन्दारकम् ॥ ३६४ ॥

जसजसा यत्रयं लघुर्गुरू च। यथा—

तदंह्रिपरिताडनं सरभसं कचाकर्षणं स्वेच्छया चोर्जितं,
मुखाम्बुरुहचुम्बनं प्रति मुहुर्नखैर्दारणं निर्विशङ्कं जवात्।
नरेन्द्रतिलक [5]त्वदीयपरिपन्थिनां तुल्यकालं तदेतत्कृतं,
[6]शिवाभिरिह [7]संगरे [8]गगनसीन्नि [9]वृन्दारकप्रेयसीभिस्तथा ॥ ३६४.१ ॥
२३।७ ॥

संकृतौ भ्तौ न्सौ भौ न्यौ तन्वी ठैः ॥ ३६५ ॥

भतनसभभनयाः। ठैरिति द्वादशभिर्यतिः। यथा—

दन्तमयूखाः शशधररुचयो वाग्मृतं [10]रतिरमणधनुर्भ्रूर्,
लोचनलक्ष्मीस्तुलयति कमलं नूतनविद्रुमसुहृदधरश्च।
चम्पकगर्भप्रतिकृति च वपुर्हसगतेरनुहरति च [11]यातं,
वच्मि विशेषं कमपरमथवा रम्यमहो किमिव हि न हि तन्व्याः ॥ ३६५.१ ॥

नौ भौ त्रौ न्यौ ललितलता छछैः ३६६ ॥

ननभनजननयाः। छछैरिति सप्तभिः सप्तभिर्यतिः। यथा—

---

1) श्रूयतां नृपेत्यत्र चित्रकं तिलकं चपलनेत्रया। 2) भूमिभृतामित्यत्र अति हि भृशार्थेऽखण्डमव्ययम्। 3) दुर्ललिता उत्कटहस्तिनीव। 4) दृढतरेति—गुणा औदार्यादयः, पक्षे रज्जवः। नियन्त्रिता। 5) तदंह्रिपरीत्यत्र स्वद्वैरिणां समकालम्। 6) शिवाभिः क्रोष्ट्रीभिः। 7) संगरे संग्रामे। 8) गगनसीन्नि आकाशमदेहे। 9) वृन्दारकेति—देवीभिः। 10) दन्तमयूखा इत्यत्र रतिरमणेति—कामधनुर्वद् भ्रूः। 11) यातं गमनम्।

---

१ जतुरसोल्के P. २ लगौ च A. ३ दृढतरगुणै. साधु० N. ४ लगौ च A. ५ दारुणं ABCDN. ६ नदेव कृतं N; ७ ५ added in N. ८ मयूखाः G. ९ धनुर्भ्रूलो० N. १० रम्यमहो N.

परिमलविलुठन्मधुकरकवरी-[1]विरचितनिरयधिशोभाम्,
[2]अभिनवकुसुमस्मितसुभगरुचिं मृदुतरकिसलयपाणिम्।
इह मधुसमये विलसति नियतं मनसिजशरपरिविद्धम्,
तनुललितलतायुवतिमयमहो कलयति मलयसमीरः ॥ ३६६.१ ॥

नौ रूमेघमाला ॥ ३६७ ॥

नगणद्वयं रगणपट्कं च। यथा—

त्रिभुवनविजयाय वद्धाभिमानस्य [3]शृङ्गारयोनेः प्रयाणक्षणे,
कनकघटितदण्डमेतत्किमाभाति नीलातपत्रं लसत्सर्वतः।
[4]नवतपविगमश्रिया दीप्रदीपेऽथ किं कज्जलार्थं धृतं [5]कर्परं,
[6]भ्रममिति विदधाति वीक्ष्योन्नतां मेघमालां जनो विद्युतालंकृताम् ॥ ३६७.१ ॥

भृङ्गाञ्जनीलालकेत्येके ॥ ३६७.१ ॥

भैः सुभद्रम् ॥ ३६८ ॥

भ्रिति भगणाष्टकम्। यथा—

शौर्यमृगेन्द्र चुलुक्यनरेन्द्र महत्त्वगिरीन्द्र गभीरिमसागर,
दोष्णि चिरं निखिलाचलसिन्धुयुतं वसुधावलयं तव बिभ्रति।
अद्भुतभारपरिश्रमसुक्ति-[7]समुच्छ्वसितो[8] भुजगाधिपतिस्त्वयि,
[9]शंसति संततमेष सुभद्रमखण्डमहोदयमस्विति संप्रति ॥ ३६८.१ ॥

भिलनिसा द्रुतलघुपदगतिः ॥ ३६९ ॥

भत्रयं तगणो नत्रयं सश्च। यथा—

[10]मुञ्चत नूपुरकङ्कणकाञ्चीः कणितभरविरचितकलकलाः,
स्वीकुरुताशुगतिं समयोऽयं न खलु समदगजललितगतेः।
संभ्रमवान् स्वधूरनुशासद्विरिसरिदभिमुखमतिकृपणः",
संप्रति सिद्धपते तव याति [11]द्रुतलघुपदगतिं रिपुनिवहः ॥ ३६९.१ ॥

न्यौ भ्तौ निसौ संभ्रान्ता ॥ ३७० ॥

नयभता नगणत्रयं सश्च। यथा—

---

1) परिमलेत्यत्र कवरी केशपाशः। 2) त्रिभुवनविजयेत्यत्र शृङ्गारेति-कामस्य। 3) नवतपेति-नवीनप्रावृट्लक्ष्म्या। 4) कर्परं कोसिउं इति प्रसिद्धम्। 5) भ्रमं भ्रान्तिम्। 6) शौर्यमृगेन्द्रेत्यत्र समुच्छ्वसितः उच्छ्वासं प्राप्तः। 7) शंसति प्रशंसति। 8) मुञ्चत नूपुरेत्यत्र पलायनसमये कलकलेति-शब्दानुकरणम्। 9) अतिकृपण इति-अतिदीनः। 10 द्रुतेति-क्रियाविशेषणम्।

---

१ अभिनय N. २ किशलय B. ३ कलयसमीर· A. ४ दण्डमेतत् repeated in A. ५ भृ AN. ६ सुभद्रकं G. ७ समुच्छ्वसितो N. ८ कृपणान् N.

[1]रचयतु जन्मस्नानविधौ वस्त्रिजगदधिपचरमजिनपतेः,
सुरपतितुङ्गोत्सङ्गनिषण्णस्य किमपि बलविलसितमतुलम् ।
मृदुचरणाङ्गुष्ठाग्रसमाक्रान्तिविधुरचलितकनकशिखरि-,
स्फुटभयसंभ्रान्तामरयक्षोरगपति[4] निखिलदुरितदलनम् ॥ ३७० १ ॥

मसौ जसौ तौ भ्रौ विभ्रमगतिः ॥ ३७१ ॥

मसजसततभराः । यथा –

दृष्ट्वा त्वत्पृतनातुरगमखुरोद्धूत धरित्रीरजो गगनाङ्गणे,
[2]तत्तद्भूतिमती विहाय सपदि स्वा राजधानीमपि [1]प्रियजीविताः ।
गच्छन्तोऽनुगिरीन् पलायनविधिप्रत्यूहहेतु मुहुः सहचारिणा,
दाराणा [4]कलहसविभ्रमगतिं निन्दन्ति चौलुक्यचन्द्र तवारयः ॥ ३७१ १ ॥
२४।७ ॥

अभिकृतौ भ्मस्भनीगाः क्रौञ्चपदा डड्डजैः ॥ ३७२ ॥

भमसभा नगणचतुष्टयं गुरुश्च । डड्डजैरिति पञ्चभिः पञ्चभिरष्टभिश्च यतिः ।

यथा –

[5]प्रोज्झ्य पुराणि त्वद्भययोगान्नृपवर भवदरिरतिशयविधुरो[6],
दूरमरण्य प्राप्य [7]कलत्रैः सह समजनि [8]गतिरयवशतृपितः ।
सारसनादात् स स्वयमादौ [9]प्रसरति कियदपि भुवमथ सहसा,
प्रेक्ष्य चकोरक्रौञ्चपदाङ्का ध्रुवमिह सरिदिति निगदति दयिताः ॥ ३७२.१ ॥

नीसभिगा हंसलयो जछैः ॥ ३७३ ॥

नगणचतुष्टयं सगणो भगणत्रयं गुरुश्च । जछैरिति अष्टभिः सप्तभिश्च यतिः ।

यथा –

[10]भवशतविरचितनिरवधिसुकृतैस्त्वत्कृतधर्मपथोऽधिगत.,
[11]प्रणयिनि मयि कुरु तदसमकरुणा पश्य सुधारसपूर्णदृशा ।
अभिमततरमिति वितर जिनपते [12]शक्रफणीन्द्रनरेन्द्रनुत,
प्रतिदिनमपि तव पदकमलयुगे देव भवेयमहं सलयः ॥ ३७३.१ ॥

---

1) रचयतु जन्मेत्यत्र व युष्माक दुरितदलन वीरजिनस्य बलविलसित रचयतु निष्पादयतु इति क्रियासबन्ध । 2) दृष्ट्वा त्वत्पृतनेत्यत्र तत्तत्सपत्सपूर्णाम् । 3) प्रिय जीवित येषां ते प्रियजीविता । 4) कलहसवदाजहस इव विभ्रमेण युक्ता गतिस्ताम् । 5) प्रोज्झ्य पुराणीत्यत्र त्यक्त्वा भवद्भयसबन्धाद् । 6) विधुरो दीन । 7) कलत्रैर्दारै । 8) गमनवेगवशतृपातुर । 9) प्रसरात त्वत्कटकागमनबुद्धया स्त्रीणा (स्त्रिय) पश्चान्मुक्त्वा स्वय अग्रे आगच्छति । 10) भवशतत्यत्र भवानां शतम् । 11) प्रणयिनीति–स्नेहभाजि । 12) शक्रेत्यादि इन्द्रधरणेन्द्रचक्रवर्तिनुत ।

---

१ पति A २ पृथना N, ३ धरणीरजो B, ४ नु गिरि P ५ अष्टभि dropped in P ६ वि dropped in N

त्यौ भौ नीगौ हंसपदा जैः ॥ ३७४ ॥

तयभभा नगणचतुष्टयं गुरुश्च। जैरिति दशभिर्यतिः। यथा—

अम्भोजवनं व्याकोशमिदं सलिलमतिविमलमिति[1] घनसरसि,
भ्रान्तोऽपि हि मा कार्षीर्गमनं यदिह विचरति हरिणशिशुनयना।
तस्या अतिरम्यां वीक्ष्य गतिं [2]निरुपमितिमतिशयमधिगतवतीं,
ह्रीतः सपदि त्वं हंस पदात् पदमपि चलसि न खलु नियतमदः ॥ ३७४.१ ॥

नजज्या नीगौ चपलम् ॥ ३७५ ॥

नजजया नगणचतुष्टयं गुरुश्च। यथा—

क्वचिदपि चूतलतामुपभुङ्क्ते क्वचिदपि पिबति विचकिललतां,
क्वचिदपि चुम्बति माधविकां च क्वचिदपि परिसरति च लवलीम्।
बहुविधपुष्पसमृद्धिनिधाने विलसति नवतरमधुसमये,
[3]चपलभुजंगविलासमजस्रं कलयति [4]मधुकर इह मुदितः ॥ ३७५.१ ॥

२५.४ ॥

उत्कृतौ मौ तो निरस्[5]ल्गा भुजंगविजृम्भितं जटैः ॥ ३७६ ॥

ममता नगणत्रयं रसलगाः। जटैरिति अष्टाभिरेकादशभिश्च यतिः। यथा—

क्वापि स्वैरं क्रूरक्रीडन्महिषश[6]तमचकित[7]-चरत्कुरंगकुलं क्वचित्,
क्वापि क्रीडाव्यग्रक्रोड[8]ं कचिदपि मदजटविहरन्मतंगजसंकुलम्।
सिंहक्ष्वेडारौद्रं क्वापि क्वचिदपि विषं[9]विषममहाभुजंगविजृम्भितं[10],
श्रीचौलुक्यक्षोणीनाथ स्फुटमजनि भवदरिमहीभुजामधुना पुरम् ॥ ३७६.१ ॥

मनूसगगा अपवाहो झचचैः ॥ ३७७ ॥

मो नगणपङ्क्तं सगगाश्च। झचचै[11]रिति नवभिः षड्भिः षड्भिश्च यतिः। यथा—

[12]यः श्लाघ्यः प्रतिदिनमपि मदनदहनगरुडगमनचतुरास्यैर्[13],
गेयो यः सुरपतिपरिषदि च किंपि मुदितविबुधरमणीवृन्दैः।
चौलुक्यान्वयजलनिधिहिमकर कियदिह तव नृपवर तस्यैतद्,
यत्सर्वं कृतमरिबलमपरथमपभटमपगजमपवाहं च ॥ ३७७.१ ॥

---

1) अम्भोजवनमित्यत्र इतिरत्र हेत्वर्थे। 2) निरुपमेति—निर्गता रूपेण(उप)मितिर्मानो(ने)यस्मात्स तम्। 3) क्वचिदपीत्यत्र भुजंगो गणिकापतिस्तस्य चेष्टाम्। 4) भ्रमरः मुदितो हर्षं प्राप्तः सन् करोति। 5) क्वापीत्यत्र अचकितेति—शून्यत्वादिति शेषः। 6) क्रोडो वराहः। 7) विषविषेति—क्रीडितम्। 8) यः श्लाघ्य इत्यत्र मदनेति—ईश्वरकृष्णब्रह्मादिभिः।

---

१ शुभ्र A; २ निरुपमितिमति AC. ३ निरस्गा G. ४ महिषशश्रमचकितचरकुरगकुल N. ५ विषमतर I; विष dropped in D; ६ झचचैरिति N. ७ चतुरास्यैर् N. ८ मिमुपि A.

भो नौ [1]स्नौ निल्गा आर्पीडो डैः[2] ॥ ३७८ ॥

भननसमा नगणत्रयं लघुगुरू च । डैरिति[3] त्रयोदशभिर्यतिः । यथा –

[1]पश्य विविधवरविटपिनिकुञ्जदयामीकृतविपुलतरकटकभूः,
[2]आश्रमशतलसदिभहरिगैत्रीप्रेक्षारसवदमरयुवतिजनः ।
[3]रैवतकगिरिरयमिह पुरस्ताद्यस्मिन् जिनचरणनमनमिलिता-,
शेषसुरपतिपतदमलपुष्पापीडैर्भवति सुरभिरयमनिलः ॥ ३७८.१ ॥

न्जौ न्सौ भनिल्गा वेगवती ॥ ३७९ ॥

नजननसभा नगणत्रयं लघुगुरू च । यथा –

[4]नभसि भृशं स्तनति भरितदिक्कन्दरमभिनवजलधरपटले,
धृतमुदि नृत्यति चैं मधुरकेकाकलकलज्जुषि समदशिखिकुले ।
स्फुटितकदम्बकुटज-[5]सुमनःसर्जपरिमलमिलदलिनि च वने,
[6]मनसिशये च [7]भुवनजयसंवेगवति वत भवसि पथिक कथम् ॥ ३७९.१ ॥

नजभजिभ्जल्गाः सुधाकलशो डैः ॥ ३८० ॥

नजभा जत्रयभजलगाः । डैरिति चतुर्दशभिर्यतिः । यथा –

[8]अयमनुनीय सर्वसुरकार्यकृते मम वल्लभेन [9]दिविषत्पतिना,
ननु विनियोजितः [10]कवलितश्च ततस्त्रिपुरान्तकृन्नयनहव्यभुजा ।
इति हृदये विचिन्त्य परिजीर्षयितुं [11]मकरध्वजं सपदि पूर्वदिशा,
नियतमुदासि[12] संप्रति [13]सुधाकलशः परिपूर्णशीतरुचिबिम्बमिपात् ॥ ३८०.१ ॥

२६५ ॥

उक्तादिजातिप्रकरणम् ।

---

1) पश्य विविधेति – समीपपृथ्वी । 2) आश्रमेति – तीर्थवासे तन्महिम्ना उपशान्तवैरः । 3) रैवतेति – राजते इति क्रियाध्याहारः । 4) नभसि भृशमित्यत्र आकाशे गर्जिते । 5) सुमनः अनेकार्थे मालतीवाचकः । 6) मनसिशये कामे । 7) भुवनेति – सरभवति । 8) अयमनुनीयेत्यत्र पूर्वं हि तारकदैत्ये पीडितजगत्त्रये इन्द्रेण ईश्वरं ध्यानाच्चालयितुं कामः प्रेषितः स च ईश्वरेण दग्ध इति श्रुतिः । आमद्य हृत्वा । 9) दिविषत्पतीति – इन्द्रेण । 10) कवलितः कवलत्वं प्रापितः शंभुनयनाग्निना । 11) मकरेति – कामम् । 12) उदासीति – उत्पादितः । 13) अमृतकुम्भ. पूर्णचन्द्रच्छलात् ।

---

१ स्नौ N. २ डैः G; डैः N. ३ लगौ च A. ४ डैरिति चतुर्दशभिर्यतिः N. ५ सुरपतिपदपतदमल A. ६ लगौ च A. ७ च dropped in N. ८ परिजीवितुं N. ९ P. adds समर्थयाचके.

शेषजातौ मतिनायि मालाचित्रं दैः ॥ ३८१ ॥

मस्तगणत्रयं नगणद्वयं यगणत्रयं च एषां समाहारद्वन्द्वः। दैरिति एकादशभिर्यतिः। यथा—

पान्थाः शीघ्रं यात नातः परं वः
क्षणमपि यदिह शुभं तत्र गत्वाश्रयध्वं,
कान्तां नो चेदत्र तां देवतां स्वां
स्मरत सपदि भवतो हन्त संहर्तुकामः।
[1]कालोऽयं जीमूतनामाभ्युपैति
स्तनितवधिरितमहीमण्डलश्चण्डविद्युन्-,
मालाचित्राख्यप्रहारीति दूरात्
कथयति शिखिनिवहस्तारकेकारवेण ॥ ३८१.१ ॥ २७१ ॥

म्तौ य्तौ निर्[2]सल्गाः प्रमोदमहोदयो घछटैः ॥ ३८२ ॥

मतयता नगणत्रयं रसलगाश्च। घछटैरिति चतुर्भिः सप्तभिरेकादशभिश्च यतिः। यथा—

काप्युद्ग्रीवा [3]भ्राम्यित वद्धोत्कण्ठं
करकलितशिथिलवसना दधाव च काचन,
[4]स्तम्भं दध्रे कापि च काचिद्वासी-
दतिशयितबहलपुलकाङ्कुरोल्लसिताङ्गिका।
काचिच्चक्रे भूषणमङ्गे काचित्
तिलकमकृत नवमलिके[5] चुलुक्यमहीपतौ,
यात्रां कृत्वोपेयुषि[6] पौरस्त्रीणां
समजनि निरवधिर्मुधा प्रमोदमहोदयः ॥ ३८२.१ ॥

यथा वा—

[7]वन्द्या देवी पर्वतपुत्री नित्यं मधुमधुरकमलवदना पुरन्ध्र्यैधिदेवता,
देवैः स्तुत्या किंनरगेया भक्त्यावरचरितमहिषमर्थिनी जगत्त्रयनायिका।
सिद्धैर्ध्येया केसरियाना कामं रणचतुररसिकहृदया त्रिलोचनवल्लभा,
वीरैः पूज्या दर्पणपाणिर्नूनं गुणनिलयलटभललिता सतीषु धुरंधरा ॥ ३८२.२ ॥ २९१ ॥

---

1) पान्थाः शीघ्रमित्यत्र कालः कृतान्तः श्यामवर्णश्च। जीमूतनामा। इदं विशेष्यं न तु कालस्य विशेषणं इदं हि क्रियते। 2) काप्युद्ग्रीवेत्यत्र भ्राम्यितेति—चचाल। 3) स्तम्भं जाड्यम्। 4) तिलके माले। 5) उपेयुषि आगते। 6) वन्द्या देवीत्यत्र पर्वतेति—गौरी। पुरन्ध्र्यधीति—पुरन्ध्रीणामधिदेवता सर्वोत्तमरूपेत्यर्थः। अवरचि (r.चारि for चि)तेति—दुश्चरितम्। गुणेति—गुणनिलया चासौ लटभललिता चेति विशेषणकर्मधारयः। लटभं प्रधानम्।

---

१ वक्ष्यणमपि A. २ नि.र्सल्गाः F; निरसल्गा GHP. ३ पुरन्ध्रमपि देवता N. ४ मधिनी O.

द्विर्भजसना भ्यौ नृत्तललितम् ॥ ३८३ ॥

द्वौ वारौ भजसन इत्येते गणाः । भयौ च केवलौ । भजसनभजसनभया इति ।

यथा—

"अद्य कलहंसललने ललितमन्थरगतौ
सपदि मानेय सपत्नरहितं स्वं,
कोकिलविलासिनि विधेहि कलगीतिरचना-
चतुरतामदममन्दमतिमत्ता ।
दुर्ललितनृत्तललितं "युवमयूर रचय
त्वमपि संप्रति चिराय गतशङ्कः,
सर्वगुणकेलिसदनं चकितबालमृगलो-
लनयनां प्रियतमामिह विना ताम् ॥ ३८३.१ ॥ ३०।१ ॥

द्वादश ना ल्गौ ललितलता त्रिर्यैः ॥ ३८४ ॥

द्वादश नगणा लघुर्गुरू च । त्रिर्यैरिति त्रीन् वारान् दशभिर्यतिः । यथा—

[3]"जिनचरणसरसिरुहपरिचरणरतमनसि
परमशममुपदधति कलितपरमलये,
विषयबलदलनजुषि बत तरुणि विफलमति-
चतुरतरनयनगतिमिह यतिनि तनुषे ।
व्रज मदन निजसदनमपसरणमुपरचय
पिकतरुण रणरणकमुपजनयसि न हि,
प्रकटयसि मधुसमय किमिति नवमदमुदित-
मधुपकुलकलरणितमुखरललितलताम् ॥ ३८४.१ ॥ ३८।१ ॥

भौ तनीजभ्राः पिपीलिका जगैः ॥ ३८५ ॥

भद्वयं तगणो नगणचतुष्टयं जभराः । जगैरिति अष्टभिः पञ्चदशभिश्च यतिः ।

यथा—

[4]"निष्प्रत्यूहं पुण्यां लक्ष्मीमविरतमभिलषसि यदि रमयितुं
सुखं च यदीच्छसि,

---

1) अद्य कलेति—दुर्ललितशब्दे लक्षणया सविलासम् । 2) युवा चासौ मयूरश्च । 3) जिनचरणेत्यत्र रतेति—रक्तम् । लये ध्याने । अपसरेति—प्रत्यागमनम् । हे पिकतरुण त्वमप्यपसरणं कुरु यतोऽस्य मुनेः औत्सुक्यं नहि जनयसि । नवदर्पहर्षितभ्रमरवृन्दमनोज्ञशब्दितसाचालललितवल्लीम् । 4) निष्प्रत्यूहमित्यत्र निरन्तरायम् । अभिलषतीति—आत्मनेपदमनित्यमिति न्यायात् परस्मैपदं वाञ्छसि ।

---

१ ललिने A. २ मानयि A. ३ लगौ च A. ४ उपसरणमुपरमय A. ५ तव मद० N. ६ मातनी० KHN. ७ नि.प्रत्यूहं AB.

स्यातुं [1]न्यायोन्मीलद्बुद्धे लघुभिरपि सह बहुभिरिह कुरु मा
विरोधपदं तदा।
विस्फूर्जत्फूत्कारं क्रीडाकवलितसकलमृगकुलमजगरं
[2]भुजंगम[3]मुन्मदं,
[4]संघातं कृत्वा पश्यैता म्लपितवपुपमनवधिरचितरुजा
अदन्ति पिपीलिकाः ॥ ३८५.१ ॥ ३०।१ ॥

एषैव नीपरतः पञ्चदशपञ्चदशलघू[5]द्धा क्रमेण
करभ ३५-पणव ४०-मा[6]लाः ४२ ॥ ३८६ ॥

एषैव पिपीलिका चतुर्भ्यो नगणेभ्यः परतः पञ्चभिर्दशभिः पञ्चदशभिश्च लघुभिर्वृद्धा शेषगणेषु तथैव स्थितेषु क्रमेण करभादयो भवन्ति। तत्र पञ्चभिर्वृद्धा पिपीलिकाकरभः। यथा—

[7]नित्यं लक्ष्मच्छायाच्छन्नः
कलयतु कथमिव नव वदनरुचिममृतरुचिश्चिरं क्षयसंयुतः,
तुल्यं नाञ्जं [8]स्फूर्जद्धूली-
विधुरितजननयनयुगमतिमृदुकरचरणस्य निर्मलचारुणः।
कण्ठस्येयं [9]दासी श्यामा
परभृतयुवतिरपि मधुपरिचयकलविरुतिर्निसर्गकलध्वनेः[10],
भ्रूवल्लीभङ्गे छेकाया हरिणनयनमचतुरमतिललिततनु
करभोरु नो[11] सदृशं दृशः ॥ ३८६.१ ॥ ३५।१ ॥

दशभिर्वृद्धा पिपीलिकापणवः। यथा—

[12]रुन्दोऽमन्दः कुन्दच्छायः
शरदमलघनतुहिनविकचकुमुदवनहरहसितसितः[13] शशाङ्ककरोज्ज्वलः,
उदारः [14]पारावारापारः
स्थलजलगगनतलसकलभुवनपथधवलनपरिचितः [15]प्रसाधितदिङ्मुखः।

---

1) न्यायेन उन्मीलन्ती विकसन्ती बुद्धिर्यस्येति तत्संबोधनम्। 2) भुजैर्यै गच्छन्ति ते सर्वेऽपि गोधासर्पाजगरादयो भुजंगमा भुजपरिसर्पा उच्यन्ते। 3 मयेति - एकीभूय। क्लेदितं वपुर्यस्य स कीटिकाः। 4) नित्यं लक्ष्मेत्यत्र करङ्कच्छायाव्याप्तः। 5) रजः परागश्च। 6) स्वभावसम्यग्ध्वनेः। 7) रुन्दोऽमन्देत्यत्र रुन्दो विपुलः। 8) तुहिन-विकचकुमुदवन-शंकराट्टहासवत् शुभ्रः। 9) पारावारवत् समुद्रवदपारः। 10) मण्डितं दिङ्मुखं येन।

---

१ पूत्कारं N. २ उन्मुदं B. ३ मृद्धा BFH ४ माला A. ५ मृद्धाः ACDEN. ६ क्षेपेषु गणेषु B. ७ करभादयोऽपि B. ८ तेऽत्र N. ९ मृद्धाः C. १० दासी B ११ ते N.

[1]लोकालोकच्छेदं गत्वा
[2]दृढकठिनविकटदिगवधितटघटनविवलनवलयितो[3] विशुद्धयशश्चयः,
प्रोत्तुङ्गः श्वेतप्राकारो
[4]ध्वनितगुणषण्ढ तव जयति नृपवर नवलवलितवसतेर्जगत्त्रितयश्रियः ॥३८६.२॥४०।१
पञ्चदशभिर्वृद्धा पिपीलिकामाला। यथा—
उत्फुल्लाम्भोजाक्ष्यास्तस्याः
कुसुमशरसुभग तव विरहदव इह हि जयिनि समुपचरणविषये व्यधायि सखीजनैः,
[5]अङ्गे वासः कर्पूराम्भ-
स्तिमितशुचि तुहिनकिरणकरपरिभवचतुरधवलिम कुचतटयुगे सुमौक्तिकदाम च।
[6]रम्भागुल्मं लीलागारं
मलयजरसकलितवसुधमभिनवविकचकुमुदवनदलसमुदयेश्च [7]तल्पककल्पना,
नव्या मौलौ मल्लीमाला
तदिदमखिलमपि दवहुतवहरुचि[8]परिचितमहिम विरचयति मुहुः
प्रदाहमहाज्वरम् ॥३८६.३॥४५।१॥[9]

शेषजातिप्रकरणम्।

अथ दण्डकाः।

यत् किञ्चिद् दृश्यते छन्दः पञ्चविंशत्यक्षराधिकम्।
[10]शेषजात्यादिकं मुक्त्वा तत् सर्वं दण्डकं विदुः ॥ ३८६.४ ॥

तत्र—

नारुक्ष चण्डवृष्टिः ॥ ३८७ ॥

ना इति नगणद्वयं रुक्ष इति रगणसप्तकं च। समाहारो द्वन्द्वः। यथा[1]—
[11]अभिनवतरुमेदोदामपायोदमालाप्रतिच्छादिते सर्वतो व्योमनि,
स्फुटितकुटजकेतकीपांसुपुञ्जच्छटाच्छोटिताशेषदिङ्नैन्द्रदिग्मारुते[12]।
मुदितनिखिलनीलकण्ठैः कृते क्रूरकेकारवव्याकुले [13]ताण्डवाडम्बरे,
कथमिव चलितोऽसि भोः पान्थ हित्वा प्रियां [14]चण्डवृष्टिप्रपातातुले वर्त्मनि ॥३८७.१॥
चण्डवृष्टिप्रपात इत्यन्ये ॥ ३८७.१ ॥

---

1) लोकालोकनाम्ने मानुषोत्तरस्य गिरेः पर्यन्तम्। 2) सबलः कठिनः कर्कशः विपुलः। 3) अवधेः सटानि अवधितयानि दिशां, वलयाकार प्रासः। 4) ध्वनितो गुण एव षण्ढो(षण्डो) यस्येति। 5) अङ्गे, वास इत्यत्र वस्त्रम्। तिमितेति—क्लिन्नम्। 6) कदलीगुल्मं वल्लीगृहम्। 7) शय्यारचनं संपादयन्ति। शेषजातिप्रकरणम्। 8) शेषजात्यादिकमिति—आदिशब्दाद् वक्ष्यमाणच्छन्दसां समदीर्घादीनां ग्रहणम्। 9) अभिनवतरेत्यत्र पाठो दृश्यते—मेघमाला। 10) इन्द्रो देवता अस्या ऐन्द्री दिक् कर्मधारयः तस्या वायौ। 11) नृत्याडम्बरे। 12) चण्डा प्रचण्डा या वृष्टिः तस्याः पतनेन व्याकुले।

---

१ विचलनचल॰ B, विवलनचल॰ N. २ समुपचरण॰ N, स॰ च॰ विषये P. ३ वसुधामभि॰ N. ४ दृष्टे N. ५ पांशु ABC. ६ पुनष्टा A, ७ प्रपात॰ BPP.

"यथोत्तरमेकैकवृद्धा अर्णार्णवव्यालजीमूतलीला-
करोद्दामशङ्खादयः ॥ ३८८ ॥

चण्डवृष्टेरूर्ध्वमेकैकरगणवृद्धाः क्रमेणार्णादयो दण्डकाः। तत्र नगणाभ्यां परैरष्टभी रगणैरर्णः। यथा—

"अविरलगुरुशाखिनोऽरण्यभागान् समुत्तुङ्गशृङ्गावलीशालिनः
"सर्वभूमीभृतो,
विपुलतरतरंगसंसंगिनीः कूलिनीरुच्छ्रितानेकसौधान् पुर-
ग्रामदेशानपि।
"स्थगयति तमसि प्रपन्ने सपत्नत्वमुन्मुक्तधैर्यस्य पाथो
निधेर्मद्रु रज्यद्वपुः,
कुपित इव तदर्णसः प्रोद्ययौ तस्य संहारकारी समुद्यत्करो-
ऽयं निशावल्लभः ॥ ३८८.१ ॥

नवभिर्णवः। यथा—

"प्रसृतनिबिडमारुतान्दोलिताश्वत्थसंशीर्णपर्णौघविस्फार-
वातोलिकापूर्यमाणाम्बरे,
घनवनदवदह्यमानाखिलक्रूरशार्दूलपोतोद्भटोन्नाद-
संत्रस्तमातङ्गयूथाकुले।
दिनकरकरतप्तकोलावलीश्रीयमाणार्द्रतले लसल्लोल-
कल्लोलवाचालमाद्यन्महा-,
र्णवपयसि ननु प्रिय ग्रीष्मकालेऽधुना मा स्म गा मानय त्वं हि
पीनस्तनाश्लेषसौख्यानि मे ॥ ३८८.२ ॥

दशभिर्व्यालः। यथा—

"चिरबहुदरघट्टैसपूर्यमाणोच्छलत्सारिणीतोयधारभिरामं सदैकान्त-
कान्तप्रसर्पल्लता-,

---

1) यथोत्तरमित्यत्र एकैक'शाजिरा'गणवृद्धा इति। 2) अविरलेत्यत्र वृद्धवृक्षान्। 3) विधपर्वतान्। 4) स्थगयतीति—आच्छादनं कुर्वति तमोगणे वैरभावं प्रपन्नेऽङ्गीकृते। उन्मुक्तेति—तावन्मया सर्वं व्याप्तं किं च अनेनापि सर्वं व्याप्यते तन्मामपि कदाचिद् व्याप्स्यतीति धैर्यहीनस्य। रज्यद्वपुर्यस्येति—उदयसमये चन्द्रो रक्तो वर्ण्यते इति कविसमयः। तदर्णस इति समुद्रजलात् निर्ययौ तमसो विनाशकारी। हस्ताः किरणाश्च करा उच्यन्ते। 5) प्रसृतनिबिडेत्यत्र अश्वत्थः पिप्पलः। पोतो बालः। कोलः शूकरः। अखातं सरस्तडागः। आक्षेपः सम्बन्धः। 6) चिरबहुदरघट्टेत्यत्र भरहट इति प्रसिद्धः। गुल्मः वृक्षान्तरितम्।

---

१ सशीर्ण A. २ वातोलिकी A ३ घनकलदव C; ४ सत्रस्तानातं यूथा० A. ५ घट्टपूर्यमाणोच्छल-च्छारणी B; घट्टसपूर्यमापोच्छ० N;

वहलिततरुगुल्मकेलीगृहं ये पुरोद्यानमुद्दामलीलाजुषः स्त्रीसखाश्चारु
चेरुश्चुलुक्येश्वर ।
[1]"तृषितकरटियूथभल्लूकसंदोहकोलव्रजव्याकुलाश्यान"[2]कल्लोलिनीवारि
दुर्वारसूर्यद्युति,
[3]"व्यतिकरविधुरीकृतव्यालसंरुध्यमानद्रुमच्छायमुद्दण्डकान्तारमीयुस्त्व-
दीयद्विपस्तेऽधुना ॥ ३८८.३ ॥

एकादशभिर्जीमूतः । यथा—

[4]"जिनपतिपदपङ्कजस्पर्शपुण्यीकृताशेषशृङ्गः पुरस्तादयं तत्तदाश्चर्यसंपन्नि-
दानं भुवो भूषणं,
प्रतिविपिननिकुञ्जकूजत्पिकीपञ्चमोच्चारसंवर्गितस्वर्गसीमन्तिनीवर्गगीतिप्र-
पञ्चाभिरामोऽन्वहम् ।
कुरुवकसहकारकारस्करांशोकजम्बूकदम्बेङ्गुदीवेणुकान्तारमाला[5]प्रतिच्छन्न-
मार्तण्डचण्डातपः,
प्रतितटविनिविष्टजीमूतसंदोहनिर्मुच्यमानामृतासारपूर्णोद्वहन्निर्झरः पश्य
दिष्ट्योज्जयन्तो गिरिः ॥ ३८८.४ ॥

द्वादशभिर्लीलाकरः । यथा—

[6]"घनपरिमलसारकर्पूरपानीयतिम्यद्दुकूलं कुकूलश्रियं पद्मिनी-
पल्लवस्रस्तरैः खादिराङ्गारविस्फूर्जितं,
[7]"तुहिनकिरणचन्द्रिका ह्रःत हालाहलत्वं नवं चन्दनं तप्तलोहोपमां
वेणुवीणानिनादोऽपि कर्णज्वरत्वं दधत् ।
अयि तव विरहे यदस्या मृगाक्ष्या भवन्नामधेयाक्षरोच्चारमत्रैकर-
क्षाजुषः सांप्रतं सर्वमेवाभजद् व्यत्ययं[8]",
तदेतिसुभग सान्द्रपीयूषलीलाकरैस्तैर्वचोभिः समाश्वासयैनां[9] चिरा-
यान्यथा तु त्वमेवात्र [10]"निःशूकचूडामणिः ॥ ३८८.५ ॥

---

1) तृषितकरटि(टी)[ति]-भल्लूक ऋक्षः । 2) आश्यानाः ईषत् शुष्का नदी । 3) व्यतिकरः संबन्धः । व्याकुलीकृतम् । 4) जिनपतिपदेत्यत्र पवित्रीकृतानिलशिखरः । संवर्गितस्वर्गकामिनी । अन्वहं निरन्तरम् । कारस्करो वृक्षः । इङ्गुदी गुडी । वेणुर्वंशः । 5) प्रतीति—आच्छादितः । जीमूत० मेघसमूह-निर्मुच्यमानजलवेगबद्धपः । 6) घनपरिमलेत्यत्र घनो बहलः प्रधानकर्पूरमलसिक्तपट[दु]ल्लम् । कुकूलेति—तुषानलशोभां दाहाधिक्यम् । विस्फूर्जितं अनुकारम् । 7) चन्द्रमोत्वा । विषत्वम् । 8) व्यत्ययं विपरीतत्वम् । 9) निर्दयशिरोमणिः ।

---

१ पुरोद्यानमुलीला० A. २ चेलुमु० A. ३ सदाह A. ४ पति dropped in N. ५ पुष्प-इता N. ६ कुप्र A. ७ सवर्गीति प्रप० C. ८ चन्द्रातपः A. ९ पूर्णोद्वहन्निर्झरः A. १० अलरः P. ११ रणाजुषः B; १२ तदस्ति N. १३ एतां P.

त्रयोदशभिरुद्दामः। यथा—

"वलयितवरकन्धरं वल्गदुत्तुङ्गतेजस्विगन्धर्वराजीखुरक्षुण्णविश्वं-
भराक्षोदसंदोहविक्षेपणादुर्दिनाडम्बरं",
प्रथममपि निरीक्ष्य सप्रेमकान्तामुखाम्भोरुहालोकने स क्षणं कौतुकी
नष्टुकामोऽपि यावद्भवत्युन्मनास्त्वद्विपक्षव्रजः।
नृप तव सहसा जयश्रीविलासैकधामाभ्रमातङ्ग"-संस्पर्धिनोऽभ्रंकषैर्विमर्दै-
र्भीषणाः क्षोभयन्तो जगद्गर्जितैरूर्जितैः,
खुंतमदजलनिर्झरैर्ध्वस्तधूलीवितानाः कृतान्ता इवोद्दामगन्धद्विपास्-
तावदाविर्भवन्तश्चिरान्मूर्च्छयामासुरेनं विभो ॥ ३८८.६ ॥

चतुर्दशभिः शङ्खः। यथा—

"अमरपतिकरिभ्रमं विभ्रतीभाः सममाः कलङ्कः कलाविभ्रमं धारय-
त्यत्रिनेत्रप्रसूतस्य कृष्णो वहत्यन्धकध्वंसकर्तुस्तुलां,
कुवलयवनमातनोति श्रियं पौण्डरीकीं कलिन्दात्मजा जह्नुकन्योज्ज्वलं
वारि धत्ते विधत्तेऽञ्जनाद्रिर्विलासं च कैलासपृथ्वीभृतेः।
कलयति लवणोदधिः क्षीरपाथोधिलीलायितं शेषशोभामशेषाह्वयः" प्राप्नु-
वन्तीन्द्रनीलाश्च" मुक्तामणीनां समासादयन्ति त्विषं,
विचकिलहरहासनीहारहारेन्दुशङ्खावदातैरमीभिः स्फुरद्भिर्महीपालचूडामणे
"शासनैश्वर्यवज्रायुध त्वद्यशोराशिभिः ॥ ३८८.७ ॥

आदिशब्दात् पञ्चदशभिः समुद्रः षोडशभिर्भुजंग इत्येवमादयो यथेष्टकृतनामानो यावदेकोनसहस्राक्षरैः पादस्तावद्भवन्ति ॥ ३८८.७ ॥

नाभ्यां रवद्यादयः प्रचितः ॥ ३८९ ॥

नगणद्वयात् परे यादयः सर्वे वर्णगणा यदा भवन्ति तदा प्रचितः। "रवद् इत्य-

---

1) वलयितेत्यत्र वलयिता वलयाकारं प्रापिता कन्धरा यत्रेति क्रियाविशेषणम्। वल्गन्तो धावन्तस्तेजस्विनो गन्धर्वा अश्वास्तेषाम्। 2) दुर्दिनमिव दुर्दिनं मेघजं तमस्तस्याडम्बरस्तम्। 3) अभ्रमातङ्ग ऐरावणः। अभ्रं आकाशं कषन्तीति अभ्रंकषाः। उच्चैरुच्चा। विमहा(हे)ः शरीरा(रै)ः। ऊर्जितैर्दीप्तैः। कृतान्ताः यमा इव श्यामवर्णत्वात्। उद्दामेति—उत्कटमूर्च्छां प्रापयामासुः। 4) अमरपतीत्यत्र इन्द्रहस्तिभ्रान्तिम्। सर्वेऽपीभाः श्यामा अपि शुभ्रा जाताः। अत्रिनेत्रेति—चन्द्रो हि अत्रिऋषिनेत्रजात इति श्रुतिः। अन्धकेति—ईश्वरस्य। कलिन्देति—यमुना गङ्गोज्ज्वलम्। शेषेति—शुक्लः सः। 5) अलिलनागाः। 6) इन्द्रः मणिभेदः। 7) शासनं आज्ञा ऐश्वर्यं च ताभ्यां वज्रायुधस्तत्सबोधनम्। 8) रवदित्यादेशादिति—अत्र अन्यत्र विस्तारेण प्ररूपितस्य सक्षेपेण कथनमतिदेशः। कस्मिन्नपि दण्डके रवद् यगणानां न्यासः भवतु, कस्मिन्नपि भगणानां, कस्मिन्नपि तगणानां इति। पुनः सप्तसु यगणेषु प्रचितः सप्तसु भगणेषु प्रचितः। तथा तगणादिष्वपि ज्ञेयम्। ततः परं सर्वेषां गणानां न्यासः। सदृशान्येवार्णवर्णादीनि इति।

---

१ वलोत्तुङ्ग N. २ तेजधि B. ३ रुहावलोकने A. ४ धामोऽभ्रमा० D. ५ श्रुत० A. श्रुत० CDN. ६ करिविभ्रमं A. ७ विभ्रती भो० N. ८ अशेषाह्वयः N. ९ शुभनामानो P. १० क्षरपादः N.

तिदेशात्सप्तभिर्यैः प्रचितः । ततः परमेकैकयादिवृद्धा अर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयोऽत्रापि भवन्ति । यथा—

[1]विलसदुरुतरवारिप्रचण्डे महावाहिनीव्यूहविस्फारणव्यक्तशक्तौ,
प्रकटयति रुचिराखण्डकोदण्डदण्डं दिशत्युच्चकै [2]राजहंसप्रणाशम् ।
प्रशमयति निखिलं मेदिनीचक्रसंतापविस्फूर्जितं[3] न्यक्कृतार्कप्रतापे,
[4]प्रचितघनबलेयुक्ते नभस्यायमाने चुलुक्येश्वरे को न धत्ते प्रमोदम् ॥ ३८९.१ ॥

एवमादिषु शेषगणेषूदाहार्यम् । एकैकगणवृद्ध्या च अर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयोऽप्युदाहार्याः ।

नगभ्यामष्टादिराः पन्नग-दम्भोलि-हेलावली-मालती-
केलि-कङ्केल्लि-लीलाविलासादयः ॥ ३९० ॥

नगणाद्रोश्च परे अष्टादिसंख्या रगणा येषु ते यथासंख्यं पन्नगादयो दण्डका भवन्ति । तत्राष्टरगणः पन्नगः । यथा—

[5]अविकलध्यानसंतानधूमध्वजज्योतिराडम्बरध्वस्तनिःशेषकर्मेन्धनो,
[6]विदलितोद्दामभूयःकषायश्रियायेष पायादपायात् स वः पार्श्वनाथो जिनः ।
कमठदैत्ये च गाढोपसर्गक्रियाकर्कशे तत्प्रतीकारबद्धप्रयत्ने भृशं,
प्रकटितात्यन्तभक्तौ तदा पन्नगेन्द्रे च[7] यस्याभवन् दृष्टिपाताः कृपार्द्राः समाः ॥ ३९०.१ ॥

एवमेकैकरगणवृद्ध्यान्येऽपि पटुदाहार्याः ॥ ३९०.१ ॥

लोर्यथेष्टं राश्चण्डकालः ॥ ३९१ ॥

लघुपञ्चकात्परे यदृच्छया क्रियमाणा रगणाश्चण्डकालः । यथा—

[1]विविधमणिमेखलाश्रेणिविश्राणितश्रीणि हित्वा पुराण्याशु चान्तःपुराण्युच्चकैः,
करटितुरगादिसेनासहस्राणि च स्वीकृतच्छद्मकर्मन्दिवेपास्वदीयद्विपः ।
प्रतिदिशममी गिरीणां महाकन्दराः शाखिगुल्मानि कूलंकषाकूलरन्ध्राणि च,
स्फुरति तव चण्डकाले करालेऽपि कृपाणे सदा संश्रयन्ते महीपालचूडामणे ॥ ३९१.१ ॥

एवमेकैकरगणवृद्ध्याप्युदाहार्यम् ॥ ३९१.१ ॥

---

1) विलसदुरुतरवारीत्यत्र महावाहिनी सेना नदी च । कोदण्डं इन्द्रधनुः । 2) राज्ञां जीवाः पक्षे राजहंसाः तेषां गमनम् । 3) विस्फूर्जितं क्रीडितम् । 4) प्रचितेति—घनं प्रभूतं यद्बलं सैन्यं पक्षे मेघानां बलम् । नभस्येति—भाद्रपदमासलक्ष्माचरति । 5) अविकलध्यानेति—अविकलं असाधारणं ध्यानं तस्य संतानः परंपरा [तेन] एव अग्निज्वालाडम्बरेण दग्धः कर्मेन्धनिको येनेति सः । 6) विदलितेति—भूयो बहुः । 7) विविधमणीत्यत्र मेखला अद्रेर्मध्यभागाः विविधमणयश्च ता मेखलाश्च विविधमणिमेखलाः तासां श्रेणयः ताभ्यो विश्राणिता धौर्यैः । पक्षे मेखला रसना । यद्वा पुरपक्षे मेखला खातवन्तो यस्य असवलेति प्रसिद्धिः इति प्रत्यन्तरे ।

---

१ स्युः F. २ तरोवारि A. ३ व्यक्त dropped in N. ४ दिशत्यु० N. ५ बलयुक्तो N. ६ स्युः F. ७ वयस्या० N. ८ कर्मादिवे० ADN. ९ ABN. drop एवं; D adds अन्यद् before अप्यु०.

याः सिंहविक्रान्तः ॥ ३९२ ॥

लोः परे यथेष्टं यगणा यत्र स सिंहविक्रान्तः। यथा—

तरुणतरणितेजःप्रतप्ता वराहा इवारण्यभागेषु मुस्ताक्षतिं पल्वलान्ते,
विदधति किल केचित्तथान्ये महाभूभृतां कन्दराः कौशिकौघा[2] इवाभिश्रयन्ते।
विपिनगहनमध्ये पुनः केऽपि [2]शाखामृगक्रीडितं बिभ्रति [3]प्रत्यनीकक्षितीशाः,
प्रकटयति सदा सिंहविक्रान्तलीलामनूनां त्वयीमां धरित्रीश चौलुक्यचन्द्र ॥ ३९२.१

एवमेकैकयगणवृद्ध्याप्युदाहार्यम् ॥ ३९२.१ ॥

लूगिभ्यां मेघमाला ॥ ३९३ ॥

लघुपङ्क्तात् गुरुत्रयाच्च परे यथेष्टं यगणा यत्र प्रयुज्यन्ते सा मेघमाला नाम दण्डकः। यथा—

अविरलमदपाथोनिर्झरप्लावितक्षोणिपीठा महाशैलशृङ्गायमाणाः,
कपिशरुचिलसद्दन्ताशनिद्योतरौद्रा महागर्जितत्रासिताशेषलोकाः।
रिपुनरपतिमातंगाः क्षणादेव देव प्रणाशं ययुः [4]संयुगान्तर्युगान्ता-,
निल इव विपुलप्राणे महामेघमाला महीपालधुर्ये त्वयि [5]प्रोज्झिहाने ॥ ३९३.१ ॥

एवमेकैकयगणवृद्ध्यान्येऽप्युदाहार्याः ॥ ३९३.१ ॥

यथेष्टं रा मत्तमातंगः ॥ ३९४ ॥

स्वेच्छया यत्र रगणाः प्रयुज्यन्ते स मत्तमातंगः। पुनर्यथेष्टग्रहणं लूगिभ्यामित्येतस्य निवृत्त्यर्थम्। यथा—

[6]पुष्पचापस्य चापश्रियं बिभ्रती भङ्गुरभ्रूविलासैः स्मितस्मेरकस्तूरिका-,
केलिपत्रावलीभङ्गिविभ्राजिगण्डस्थलेनेन्दुबिम्बानुकारं सदा कुर्वती।
चारुवक्रोक्तिगर्भैर्वचोभिर्विदग्धैरमन्दं च पीयूषनिष्यन्दमातन्वती,
मत्तमातंगलीलागतिः काञ्चनच्छेदगौरी मुदं कस्य नाविष्करोति प्रिया ॥ ३९४.१ ॥

एवमेकैकरगणवृद्ध्यान्यदप्युदाहार्यम् ॥ ३९४.१ ॥

साः कुसुमास्तरणः ॥ ३९५ ॥

यथेष्टं सगणा यत्र प्रयुज्यन्ते स कुसुमास्तरणः। यथा—

---

1) तरुणतरणीत्यत्र कौशिकास्तत्समूहा इव घूकप्रेरणय इव। 2) शाखामृगेति—वानराः। 3) प्रत्यनीका वैरिणः। 4) अविरलेत्यत्र संयुगान्तरिति—सङ्गममध्ये। यथा युगान्तानिले प्रोद्यति सति विपुलप्राणे महापराक्रमे महामेघमालाः प्रणाशं यान्ति। 5) प्रोज्झीति—देदीप्यमाने। 6) पुष्पचापेत्यत्र कन्दर्पस्य धनुःश्रियम्। भङ्गुरेति भ्रूक्रम्। हास्यविकस्वरम्। कस्तूरीपत्रवल्लीलक्ष्मस्थाने भङ्गिः रचना। चारु इति—गर्भे मध्ये। आविरिति—प्रकटीकरोति।

---

१ सा ABCDN. २ निर्झराप्लावित P. ३ इलस्य P. ४ निष्यन्द N. ५ कुसुमास्तरः H.

[1]"सुभग त्वयि दूरमुपेयुषि सा न कदाचिदुपैति विलासगृहाभिमुखं,
विकचाब्जवने न ददाति दृशं शिशिरांशुरुचन्दनपङ्कमपाकुरुते ।
न च हृष्यति [2]"चाटुकरीषु सखीष्वपि पक्वपलाण्डुनिभं वहते वदनं,
कुसुमास्तरणानि पिनष्टितरां परिमुह्यति शीतलशीतमयूखकरैः ॥ ३९५.१ ॥

एवमेकैकसगणवृद्ध्यान्यदप्युदाहार्यम् ॥ ३९५.१ ॥

याः सिंहविक्रीडः ॥ ३९६ ॥

यत्र यथेष्टं यगणाः प्रयुज्यन्ते स सिंहविक्रीडः । यथा—

[3]"क्वचित्पङ्कशङ्काभ्रमत्कोलदंष्ट्रासमुल्लेखनिष्पिष्ट-
वेश्मान्तकाचावनीकं,
क्वचिन्नालिकेरीफलास्फालनव्यग्रशाखामृगश्रेणि-
पर्याकुलोद्यानभागम् ।
क्वचित्तप्तमज्जन्महासैरिभोद्दामशृङ्गाग्रघातोच्छलद्-
दीर्घिकावारिसान्द्रं,
क्वचित् सिंहविक्रीडचूत्कारघोरं चुलुक्येन्द्र जज्ञे पुरं
त्वद्रिपूणामिदानीम् ॥ ३९६.१ ॥

एवमेकैकयगणवृद्ध्यान्यदप्युदाहार्यम् ॥ ३९६.१ ॥

ल्गावनङ्गशेखरः ॥ ३९७ ॥

यत्र यथेष्टं निरन्तरौ लघुगुरू प्रयुज्येते सोऽनङ्गशेखरः । यथा—

[4]"विशालभाललोलघूर्णमानकज्जलोज्ज्वलालक-
द्विरेफमालिकोपशोभिते,
विबुद्धहावमुग्धचारुपक्ष्मलालसभ्रमत्सु-
तारदीर्घनेत्रपत्रसुन्दरे ।
अमन्दकुन्दकुड्मलाग्रकोमलोल्लसद्द्युतीद्ध-
शुद्धदन्तपङ्क्तिकेसरालये,

---

1) सुभग त्वयीत्यत्र उपेयुषीति—गतवति क्रीडागृहसंमुखम् । 2) चाटुकेति—प्रियवचनानि तानि । पलाण्डुर्लसनकन्दः । पिनष्टि चूर्णीकरोति । परीति—मूर्च्छां गच्छति चन्द्रकिरणैः । 3) क्वचिदित्यत्र कर्दम-भ्रमात् । शूकराः । अन्तः(न्त)शब्दः स्वरूपे प्रान्ते वन्ये च । शाखामृगेति—वानराः । महासैरिभो वनमहिषः । विक्रीडनेन क्रीडया चूत्काराः । 4) विशालभालेत्यत्र उज्ज्वलाः दीप्तिमन्तः वेऽलकास्त्र एव भ्रमराः । हावो मुखविकारः । अनङ्गशेखरोऽनङ्गपरवशः ।

---

१ वते N. २ शिशिरांशु N. शशिरांशु P; ३ प्रवालो० N; ४ विक्रीडि B. ५ लग (गौ) प्रयुज्येते A. ६ पूर्णमान० N.

प्रियामुखाम्बुजेऽधरं चिराय मध्विवापिबन्ननारतं
भवेदनङ्गशेखरः॥ ३९७.१॥
एवं लघुगुरुवृद्ध्यान्यदप्युदाहार्यम्॥ ३९७.१॥

ग्लावशोकपुष्पमञ्जरी॥ ३९८॥

यत्र यथेष्टं निरन्तरौ गुरुलघू प्रयुज्येते सोऽशोकपुष्पमञ्जरीनामा दण्डकः।

यथा—

अस्तमाश्रितस्तुषारभारपातदग्धसर्व-
पुष्पजातिसचयो हिमर्तुरद्य[1],
सर्वतो वसन्तनामधेय एष जृम्भते प्रियः
सखा तवेह देव पुष्पचाप।
विष्टपत्रयीपराजयेच्छया गृहाण नूतनान्
[2]शिलीमुखानसण्टितैकवीर,
चारुचूतकोरकानशोकपुष्पमञ्जरीर्नवाः
स्मितानि केसराणि पाटलाश्च॥ ३९८.१॥
एवं गुरुलघुवृद्ध्यान्यदप्युदाहार्यम्॥ ३९८.१॥

ना गौ कामबाणः॥ ३९९॥

यत्र यथेष्टं तगणा अन्ते गुरुद्वयं च प्रयुज्यते स कामबाणः। यथा—

[3]त्वद्विप्रयोगे नवे वालिकाया मनोभूशरक्लेशशान्त्यै प्र-
यत्नात्सखीभिः समन्वात्,
पायोजिनीपल्लवैः कल्पित चारु तल्प समासूत्रिता नूत-
नैर्हारयष्टिर्मृणालैः।
रम्भादलैः कोमलैर्निर्मिव तालवृन्त कृतश्चान्दनेन
द्रवेणाङ्गरागः किलास्याः,
तीव्रव्यथा प्रत्युतैतद्वितन्वत्समग्र कठोराशयाशिश्रियत्
कामबाणत्वमुग्रम्॥ ३९९.१॥
एवमेकैकतगणवृद्ध्यान्यदप्युदाहार्यम्॥ ३९९.१॥

भा गौ भुजङ्गविलासः॥ ४००॥

यत्र यथेष्टं भगणाः प्रयुज्यन्तेऽन्ते च गुरुद्वयं स भुजंगविलासः। यथा—

---

1) अस्तमाश्रित इत्यत्र शिलीमुखान् बाणान्। रम्या मञ्जरीः। स्मितानि विकसितानि। 2) त्वद्वि-[प्र]योग इत्यत्र तव विरहे नवे प्रथमोद्भवे। कल्पित रचितम्। प्रयुत समुचितम्। कठिनाशय।

---

१ अशोकमञ्जरी BO. २ रयां B ३ जृम्भति N. ४ याशिश्रियत् A, याशिश्रितात् N

[1]पीनघनोन्नतवृत्तविशालतरस्तनमण्डलगाढनिपीडन-
कण्टकिताङ्गः,
कोमलबाहुमृणाललताद्दढवेष्टितकण्ठतटः परिचुम्बन-
विभ्रमपात्रम्।
वासगृहे बहलोच्चसितागुरुधूमलतानिचिते शयने
मृदुनि [2]क्षणदायां,
यो दयितां रमयत्यतिसंभ्रममानजुषं स भुजंगविलास-
धुरामिह धत्ते ॥ ४००.१ ॥

एवमेकैकभगणवृद्ध्यान्यदप्युदाहार्यम् ॥ ४००.१ ॥

नाभ्यां पञ्चमात्रैरुत्कलिका ॥ ४०१ ॥

द्वाभ्यां नगणाभ्यां परैर्यथेष्टं पञ्चमात्रैर्गणैरुत्कलिका नाम। यथा—

[3]सितबकुलशिरीषकङ्केल्लिकोलनव्यप्रसूनावलीपरिमलविलोल-
रोलम्ब-[4]रोलाकुलीकृतासिलचारुलीलावनो,
मृदुमलयसमीर-[5]शैलूषशिक्षाक्षमानुगुणविविधाङ्गहारप्रयोग-
प्रपञ्चप्रवल्गल्लतानर्तकीरम्यरङ्गावनिः।
अभिनवसहकारकोरकास्वादमादयन्-[6]पिकयुवतिपञ्चमोच्चारमन्त्र-
साधितविषममानिनीमानदुर्गः समन्तादयं,
कमिव सपदि [7]संततोत्कलिकमिह नो[8] विधत्ते जनं [9]हेलया निर्जिता-
शेषलोकस्य देवस्य कामस्य निर्व्याजबन्धुर्मधुः ॥ ४०१.१ ॥

एवमेकैकपञ्चमात्रवृद्ध्यान्यदप्युदाहार्यम् ॥ ४०१.१ ॥

दण्डकप्रकरणम्।

*

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ
समवृत्तव्यावर्णनो नाम द्वितीयोऽध्यायः ॥ २ ॥

ग्रन्थाग्रं १०४३; उभयं ११६८।

---

1) पीनघनोन्नतेति—पीनाः पुष्टाः। घनाः कठिनाः। वृत्ता वर्तुलाः। 2) क्षणदायां रात्रौ। 3) सित-बकुलेत्यत्र प्रसूने पुष्पम्। 4) रोलाः शब्दाः। 5) शैलूषो भरतः। 6) पिकयुवतिः कोकिला। 7) संत-तोत्कलिकं भारहारिनवम्। 8) हेलया लीलया। इति श्रीमदुपाध्यायपदवीयाध्यायपदवीयाः समाप्ताः ॥

---

१ कोमलबाहु॰ A. २ Missing in C. ३ बहलेचसितागुरु A. ४ दयितां रमयत्यतिसंभ्रम॰ A. ५ Illegible in P. ६ सितबकुलशिरीष॰ वने A. ७ न AB.

अथ तृतीयोऽध्यायः ।

इदानीमर्धसमवृत्तव्यावर्णनार्थमुपक्रम्यते—

ओजयुजोः ॥ १ ॥

अधिकारोऽयमाविषमवृत्तेभ्य उपतिष्ठते । तत्रौजं विषमं; युक् समं लोकसिद्धम् ॥ १ ॥

तत्र—

सिल्गा नभभ्रा हरिणप्लुता ॥ २ ॥

पाद इति चानुवर्तते । ओजपादयोः सगणत्रयं लघुगुरू च । युक्पादयोः नभभरा यत्र वृत्ते सा हरिणप्लुता । यथा—

[1]नृप शैलशिलाशयनासनाः, विदितैकन्दफलाहरणाः सदा ।
निवसन्ति वने भवतो द्विषस्, तरुनिकुञ्जगता हरिणप्लुताः ॥ २.१ ॥

सिल्गा भिगगा उपचित्रम् ॥ ३ ॥

ओजपादयोः सगणत्रयं लघुगुरू च । युजोर्भगणत्रयं गुरुद्वयं च । यथा—

[2]अयमत्र नृपः सचिवस्त्वसा-, वेष कुमार इतः प्रतिहारः ।
उपचित्रमिति त्वदरेर्गृहे, वक्ति मिथः किल पान्थसमूहः ॥ ३.१ ॥

लोनं वेगवती ॥ ४ ॥

उर्पचित्रमेव लघुना रहितं वेगवती । ओजे सिगौ युजि भिगगा इत्यर्थः । यथा—

[3]नृपते तव कार्मुकवंशान्,-निष्पतिता शितसायकमाला ।
क्षितिभृच्छिरसि प्लवमाना, वेगवती वत नूतनरेवा ॥ ४.१ ॥

[4]आपातलिकेयम् ॥ ४.१ ॥

भिगगा नजज्या द्रुतमध्या ॥ ५ ॥

ओजे भगणत्रयं गुरुद्वयं च । युजि नजजयाः । यथा—

[5]वीरजिनेन्द्र भवत्पदपद्मं, भ्रमर इव द्रुतमध्यगमद् यः ।
मुक्तिर्वधूपरिरम्भणसौख्यं, करतलगामि कृतं खलु तेन ॥ ५.१ ॥

उपचित्रा । आपातलिकापरान्तिकेयम् ॥ ५.१ ॥

अथ तृतीयोऽध्यायः सपर्यायो लिख्यते ।

1) नृप शैलशिलेत्यत्र आहरणं आहारः । हरिणवत् द्रुतं गमनं येषां ते । अथवा सुभटागमशङ्क्या हरिणेऽपि दृष्टे नष्टाः प्लुष्टाः (ता.) । 2) अयमत्रेत्यत्र प्रती(ति)हारो दौवारिकः । उपचित्रमिति—स्वद्वैरिनगरे चित्रसमीपं परस्परं निदर्शयति । 3) नृपते तवेत्यत्र रेवापि वंशाद्गिरेर्च्छति इति श्रुतिः । रेवा तु गिरेरधोभागे प्लवते इयं तु क्षितिभृतां राज्ञां [शिरसि] प्लवते ततो नूतनरेवा । 4) आपातलिकेयमिति—ओजे पण्मात्रा युज्यष्टौ भगणद्वयान्ताश्चेदापातलिका । 5) वीरजिनेन्द्रेत्यत्र अध्यगमद् मध्ये (अधि?) गच्छति । मुक्तिरामोपगूहनसौख्यम् । हस्तगामि ।

---

१ लोकतः सिद्ध P. २ विदित dropped in N. ३ रिपोस् N. ४ N. adds प्राच्यवृत्तिरियम् । ५ ख्यौ च A. ६ ओजयोरन्त्यलघुना न्यूनम् । आपातलिकेयं P. ७ रेखा N. ८ मुक्तिविधं परि० A. ९ इयं dropped in A.

तज्रगा मस्जगगा भद्रविराट् ॥ ६ ॥

ओजे तजरगाः । युजि मसजगगाः । यथा—

[1]"पश्येद्भगवन् पदारविन्द-, द्वन्द्वं भक्तित एकदापि यस्ते ।
विभ्रद्भुवनाधिपत्यमेकं, भद्रं भद्रविराट् भजेत सोऽपि ॥ ६.१ ॥

औपच्छन्दसकमिदम् ॥ ६.१ ॥

सजसगा भर्नगगाः केतुमती ॥ ७ ॥

ओजे सजसगाः । युजि भरनगगाः । यथा—

"प्रसरद्रजःस्थगितसूर्यां, केतुमतीमुदीक्ष्य तव सेनाम् ।
वसुधापते दिवमिवात्म-, नाशमशङ्कत त्वदरिवर्गः ॥ ७.१ ॥



ताजगगा जतजगगा आख्यानकी ॥ ८ ॥

ओजे ततजगगाः । युजि जतजगगाः । यथा—

[3]"त्वद्वैरिभूपैरियमागतोर्वैर-, मरालनादैर्मुखरा शरच्छ्रीः ।
आख्यानकीव त्वदनीकयात्रो-, त्सवस्य सद्यश्चकितैरुदीक्षि ॥ ८.१ ॥

आख्यानकी वार्त्ताहारिका ॥ ८.१ ॥

व्यत्यये विपरीतादिः ॥ ९ ॥

व्यत्यये इति ओजे जतजगगाः । युजि ततजगगाः । विपरीतादिर्विपरीताख्यानकीत्यर्थः । यथा—

[4]"अमंस्त ते दुर्नयचेष्टितानाम्, आख्यानकीं या विपरीतवृत्तिम् ॥
पुरः सखीनां नुवता विपक्ष-, नाम त्वया संप्रति लज्जिता सा ॥ ९.१ ॥

[5]"एतयोश्च उपजात्यन्तर्गतत्वेऽपि विशेषसंज्ञार्थमत्र पाठः ॥ ९.१ ॥

रजजौ जत्रगा यवमंती ॥ १० ॥

ओजे रजरजा । युजि जरजरगाः । यथा—

---

1) पश्येद्भगवन्नित्यत्र भद्रं कल्याणं भजेत । भद्रं स्वर्गेऽपि विराजते भद्रविराट् । 2) प्रसरद्रज इत्यत्र भाच्छादितरविम् । केतवो ध्वजा महाश्च । आकाशमिव । यदा गत्र(ग)ते केतुरुदयति तदा जीवानां नाशो भवतीति लोकाः । [दिवशब्देन दिनं भासते । ततो यथा दिनस्यात्मनाशो जातः तथात्माऽपीति प्र. प्र.] । 3) त्वद्वैरीत्यत्र इंसध्वनिवैः । आख्याने करोति कारयति वा गौरादित्वात् ङीः । उदैक्षीति—दृष्टा । 4) अमंस्त ते इत्यत्र या कामिनी तव दुर्नयचेष्टितानां कथयित्री अमन्यत पराधुग्वृत्तिं सा संप्रति विपक्षायाः सपत्न्याः नाम सखीनां पुरो मुखता वीरां धत्ते इति । 5) एतयोरित्यत्र इन्द्रवज्रोपेन्द्रवज्र.(ज)-[वौरत्यजात]न्तर्गतापि विशेषावबोधार्थं उक्ता उदाहरणद्वयी ।

---

१ औपच्छन्दसिकमिदं ABN. २ आख्यानिकी H. ३ आख्यानक-इति: A. ४ मरवती H. ५ एतयोश्च उपजात्यन्तर्गतत्वेऽपि विशेषसंज्ञार्थमत्र पाठः ॥ ९.१ ॥ इति ABN.

[1]वन्यसैरिभा भवद्विपक्षधान्नि, निरन्तरेन्द्रनीलबद्धभूमिभागे।
न्यग्मुखं प्रकुर्वते मुधा वितर्क्य, विनीलविस्फुरद् यवान्वितां धरित्रीम् ॥ १०.१ ॥

यवान्वितां यवमतीमित्यर्थः। छन्दोवशाच्च यवान्वितामित्युक्तम् ॥ १०.१ ॥

व्यत्यये षट्पदावली ॥ ११ ॥

[2]व्यत्यये इत्योजे जरजगाः। युजि रजराजाः। यथा–

[3]नवोदयं चिराद्युपेयिवांसमर्कं, स्वागतानि पृच्छतीव संमदेन।
सरोजिनी विकस्वरा निशावसाने, षट्पदावलीकृतस्वनच्छलेन ॥ ११.१ ॥

नभभ्रा नभिरा मकरावली ॥ १२ ॥

ओजे नभभराः। युजि नो भत्रयं स्थ। यथा–

[4]मकरकेतुभटस्य विराजते, वरतनुर्ध्वजयष्टिरिव प्रगुणीकृता।
मृदुकपोलतले दधती नवां, मृगमदस्तवकैर्लिखितां मकरावलीम् ॥ १२.१ ॥

मसागाः सभासाः करिणी ॥ १३ ॥

ओजे मः सगणद्वयं गुरुश्च। युजि सो भगणद्वयं सश्च। यथा–

[5]चन्द्रो मत्तकरीन्द्र इवायं, दलितोद्दामतमस्स्तम्बहनः।
क्रीडत्यम्बरपल्वलमध्ये, स्फुटताराकरिणीभिरनुसृतः[6] ॥ १३.१ ॥

साज्गाः सभ्रंलगाः प्रबोधिता ॥ १४ ॥

ओजे सद्वयं जगौ च। युजि सभरलगाः। यथा–

[7]तरुमूलगृहाः क्षपाक्षये, नृप निद्रां जहति द्विपस्तव।
विटपान्तकुलायनिष्पतत्-, पतगश्रेणिरवैः प्रबोधिताः ॥ १४.१ ॥

नारल्गा नजज्रा अपरवक्त्रम् ॥ १५ ॥

ओजे नगणद्वयं रलगाश्च। युजि नजजराः। यथा–

[8]नृपवर भवदीयवर्णनं, निखिलमुखे रचयन् पुरातनैः।
अधिकमपरवक्त्रमीहते, श्रुतिपठनाय चतुर्मुखोऽधुना ॥ १५.१ ॥

एतौ वैतालीयभेदौ ॥ १५.१ ॥

---

1) वन्यसैरिभा इत्यत्र वनमहिषाः एव हस्तिगृहे। निर्यंग्। आसङ्गः। नूतनयवयुक्तां वसुधाम्। 2) नवोदयमित्यत्र उपेयिवांसं आगतम्। स्वागतानीति–शोभनान्यागतानि स्वागतानि कुशलागमनानि। निशेति–रात्रिप्रान्ते। छलेन कपटेन। 3) मकरेत्यत्र कन्दर्पसुभटस्य। कामिनी। ध्वजः पताका। मकरेति–मकरस्य रूपाकृतिपत्रलेखाम्। ध्वजेऽपि मकररूपाणि भवन्ति। 4) चन्द्रो मत्तेत्यत्र उद्दामो दीप्तः। अनुसृतः आश्रितः। 5) तरुमूलेत्यत्र शाखाप्रान्तमालकनिर्गच्छत्पक्षिराजिशब्दैः। 6) नृपवरेत्यत्र पुरातनैः जीर्णैः। पद्मं वाञ्छति ब्रह्मा।

---

१ यवत्तीं LNP. २ व्यत्यये इति dropped in P. ३ नभ्रावली G. ४ मद्वयं गुश्च A. ५ भद्वयं A. ६ अनुसृताः A. ७ सभरलगाः A; सभ्रलगा. A. ८ प्रबोधिता B. ९ नद्वयं A.

गान्तं पुष्पिताग्रा ॥ १६ ॥

अपरवक्त्रमेव ओजयुजोर्गान्तं पुष्पिताग्रा । यथा—

[1]स्मर इव शयितः कयाप्यशोके, पदहननेन जगज्जयाय सुप्तः ।
सपदि यदिषवोऽस्य पुष्पिताग्र-, प्रसवमिषात् प्रगुणाः परिस्फुरन्ति ॥ १६.१ ॥

स्याज्जगागाः सभर्या मालभारिणी ॥ १७ ॥

ओजे सस्जगागाः । समे सभरयाः । यथा—

[2]इह वासकसज्जिकाविलासं, वहते शारदशर्वरी वरेण्यम् ।
अवतंसितकैरवोज्ज्वलश्रीः, [3]विकसत्तारकमालभारिणीयम् ॥ १७.१ ॥

नितम्बिनीत्यन्यः । औपच्छन्दसकभेदावेतौ ॥ १७.१ ॥

भातल्गा न्जन्सगा विलसितलीला ॥ १८ ॥

ओजे भद्वयं तलगाश्च । युजि नजनसगाः । यथा—

[4]वक्त्रनिरीक्षणभङ्गिप्रणयी, भ्रमति धनुर्विलसदिषुरनङ्गः ।
भृत्य इवाशु यदाज्ञां विदधद्, रमयति सा नवविलसितलीला ॥ १८.१ ॥

भ्रन्जनल्गा जैर् न्जभज्नसाष्टैर्मानिनी ॥ १९ ॥

ओजे भरनजनलगाः । जैरिति दशभिर्यतिः । युजि नजभजनसाः । जैरित्येकादशभिर्यतिः । यथा—

[5]मानभृतामिदं तृणमिव जीवितमिति न किं,
कलयसि शंसि रोहिणि न यत्त्वमपि निजपतिम् ।
दक्षसुते कलङ्क्य पितृगोत्रमलमधुना,
चिरमथ मानिनीजनवधानुमतिघटनया ॥ १९.१ ॥

रो ज्रल्गाः कामिनी ॥ २० ॥

ओजे रगणः । युजि जरलगाः । यथा—

[6]निर्वृतिं,
विधेहि हस्तगामिनीम् ।

---

1) स्मर इवेत्यत्र सुप्तः प्रेरितो जागरितश्च । यस्मात् कामस्य सञ्जीकृताः । 2) इह वासकेत्यत्र या सङ्केतं सविलासं ददाति सा वासकसज्जिका । या स्त्री भर्तारं समागते स्वं मण्डयति सा वा इति प्रत्यन्तरे । 3) विकसदिति—माला श्रेणिः पुष्पादिमयी च । 'मालेरीकेष्टकस्थाने भारित्वुल्लचित्ते' (सि० है० २.४.१०२) इति ङीप्रत्ययः । 4) वक्त्रनिरीक्षणेत्यत्र कटाक्षभङ्गीषु कृताश्रयः स्फुरति । धनुषि विलसन्त इषवो बाणा यस्येति । सा स्त्री रमयति लोकं इति शेषः । 5) मानभृतामिदमित्यत्र कलयसि इति—किं न जानासि । शंसि शिक्षयसि न स्वभर्तारम् । मानिनीति—चन्द्रो हि विरहिणीमानिनीजनानां दाहकरणादिति त्वं निजपतिं मानिनीजनवधानुमतिं ददासीति भावः । 6) निर्वृतिं विधेहि इत्यत्र करगताम् । जहि त्यज ।

---

१ कयाथ शोके N. २ प्यपदहनेन N. ३ इयं dropped in A. ४ औपच्छन्दसिक० BN. ५ वक्त्रनि० ADEN. ६ भ्रनजनल्गाः B; ७ नजभ्जनसाः A; न्जभ्जनगाः CD; न्जभजनसाः N; नजभ्जन्साः P. ८ मानिनीः N. ९ शसि A; शसिस B; शसि D; शसित N. १० न त्वयमपि repeated in A.

सर्वथा,

जहीहि हन्त कामिनीम् ॥ २०.१ ॥

रो ज्रा: शिखी ॥ २१ ॥

ओजे रगणः। युजि जरजराः। यथा—

"योषितो,

वियोगदुःखखिद्यमानमानसाः।

दन्दहत्,

कटुस्वनैर्मयूर निश्चितं शिखी ॥ २१.१ ॥

रो ज्रा ज्गौ नितम्बिनी ॥ २२ ॥

ओजे रगणः। युजि जरजरजगाः। यथा—

"सर्वथा,

विरिञ्चिशंकरामराधिराजकेशवर्षयः।

भेजिरे,

यदुत्थं चिराय तत्र कारणं नितम्बिनी ॥ २२.१ ॥

रस्त्रिर्गौ लगौ वारुणी ॥ २३ ॥

ओजे रगणः। युजि त्रीन् वारान् ज्गौ। जरजरजरलगाः। यथा—

"उत्तमं,

धनाविनश्वरप्रमोदकारणं कृतिन् यदीहसे सुखम्।

निर्मलं,

तदा शमामृतं पिबानिशं सुदारुणं विमुञ्च "वारुणीम् ॥ २३.१ ॥

रश्चतुर्गौ वतंसिनी ॥ २४ ॥

ओजे रगणः। युजि चतुरो वारान् ज्गौ। जरजरजरजराः। यथा—

शोभते,

धनुर्लतेव पुष्पधन्वनः शिरीषकोमलाङ्गिका सरोजलोचना।

वालिका,

जपासहोदरधरा "मधूककान्तिमत्यशोकपल्लवावतंसिनी ॥ २४.१ ॥

---

1) योषित इत्यत्र हे मयूर त्वं शिखी असि निश्चयेन। शिखी मयूरो यदिश्च। 2) सर्वथेत्यत्र उन्मादी चिरकालम्। 3) उत्तममित्यत्र अविनाशिहर्षहेतुम् 4) मदिराम्। 5) शोभत इत्यत्र मधूक-कान्तिमतीति—गौराङ्गीत्यर्थः। कर्णेलिखितिलकयशोवती।

---

१ मान dropped in c. २ निहन्ति N. ३ रो ज्रज्गाः BP. ज्गौ dropped in. c. ४ विरिञ्च N; विरिंचि P. ५ रः A. ६ सने A. ७ रः A. ८ सने A.

कामिन्याद्या व्यत्यये वानरीशिखण्डिसारस्यपराहंस्यः ॥ २५ ॥

कामिनी-शिखि-नितम्बिनी-वारुणी-वतंसिन्यः ओजयुक्पादयोर्व्यत्यये यथासंख्यं वानरी-शिखण्डि-सारस्यपरा-हंसीसंज्ञाः । कामिनीव्यत्यये वानरी । यथा—

"नियन्य गाढसंततेः,
सद्गुणैः ।
सखे स्थिरां कुरु श्रियं,
वानरीम् ॥ २५.१ ॥

शिखिव्यत्यये शिखण्डी । यथा—

तपात्यये घनध्वनन्मृदङ्गके,
कुर्वते ।
अखण्डपर्वजगीतयः शिखण्डिनस्,
ताण्डवम् ॥ २५.२ ॥

नितम्बिनीव्यत्यये सारसी । यथा—

"त्वमब्जलोचने शरत् त्वदीयमेतदाननं,
चन्द्रमाः ।
झणज्झणायितस्वनाऽपि मेखला विभाति ते,
सारसी ॥ २५.३ ॥

वारुणीव्यत्यये अपरा । यथा—

"जिन त्वदीयशासनाद्ऋते विवेकदीपको भवत्ययं,
न क्वचित् ।
तमश्छिदाक्षमं हि तेज एकमूर्जितं प्रसूत इन्द्रदिक्,
नापरा ॥ २५.४ ॥

वतंसिनीव्यत्यये हंसी । यथा—

"त्वदारवे कृतस्पृहाद्यु विस्मृतस्वनिस्वना वकी जगाम साधुना,
मूकताम् ।
सरो विकस्वराम्बुजाकरं प्रियप्रणीतचाटुका वदेहि सोत्सवं,
हंसिके ॥ २५.५ ॥

---

1) नियम्येत्यत्र नियम्य । सद्गुणैरिति—गुणा रज्जवश्च । वानरीं वानरी तां चञ्चलां इत्यर्थः । 2) त्वमब्जेत्यत्र सारसीव सारसी वदूद् मनुस्वरसार् । 3) जिन त्वदीयेति अत्र ऋते विना । इन्द्रदिक् पूर्वा । 4) त्वदारवे इत्यत्र कृतवाञ्छा । मूकत्वम् ।

---

१ कमेण B. २ अखण्डपर्व D; अखण्डपर्व D. ३ त्वमब्जलोच repeated in A. ४ शरत् N. ५ स्वनाक्षणादि A; स्वनस्वनादि BN. ६ ते dropped in A. ७ सहाय्य ति repeated in A.

स्लगा सिल्गा इला ॥ २६ ॥

ओजे सलगाः। युजि सत्रयं लघुगुरू च। यथा—

"करटिस्तवन्-,
मदपङ्किलधूलिचितालिनाम्।
रणितच्छलात्,
तव गायति नूनमिला बलम् ॥ २६.१ ॥

स्लगाः सृर्मृगाङ्कमुखी ॥ २७ ॥

ओजे सलगाः। युजि सगणाष्टकम्। यथा—

"विरहे नवे,
भवतः सुभगोद्धतबाष्पतुषारकणप्रकरे ग्लपयत्यनिशम्।
कुमुदस्मिताम्,
अरविन्दकरां विकचोत्पलचारुदृशं परिपूर्णमृगाङ्कमुखीम् ॥ २७.१ ॥

न्लृलगा न्लृगौ शिखा ॥ २८ ॥

ओजे नगणनवकं लघुगुरू च। युजि नगणदशकं गुरुश्च। यथा—

"प्रसृमरमरिनरपतिबलतिमिरनिकरमतनुमपि गुरुगिरिगुहा-,
तरुगहनविकटकुहरशरणमिममखिलमिह समरसमयदिनमुखे।
परममहिमनिलयैशशधरकुलगगनदिनकरपरपटिमजुषः,
किरणततय इव विदधति चिरतरमवनिपतितिलक तव वरविशिखाः ॥ २८.१ ॥

व्यत्यये खज्ञा ॥ २९ ॥

ओजयुक्पादयोर्व्यत्यये शिखैव खज्ञा। तत्रौजयोस्त्रिंशद्लघवो गुरुश्च। युक्पादयोरष्टाविंशतिर्लघवो गुरुश्च। यथा—

"प्रमुदितसमदपरभृतकलरणितमविकलशशधरकिरणविततयो,
विकसितसरसिरुहविपिनमलिकुलविरुतमुखरितकुसुमितलताः।
कुरबकबकुलविचकिलविलसदविरलपरिमलसुरभिमलयपवनो,
विरहविधुरयुवतिहृदयतपनमिदमखिलमपि नवमधुसमये ॥ २९.१ ॥

---

1) करटीत्यत्र चित मिलित। इला वसुधा। 2) विरहे नवे इत्यत्र ग्लपयति म्लानिं करोति पूर्णचन्द्रमुखीम्। हिमकणप्रकरोऽपि कुमुदारविन्दोत्पलमृगाङ्कान् ग्लपयति। 3) प्रसृमरमित्यत्र प्रसृमरं प्रसरन् (न्तम्)। अरिनिमिरनिकरं गुहादिशरणं विदधति कुर्वन्तीत्यर्थः। के? तव बाणाः। क इव? किरणश्रेणय इव। क्व? संग्रामदिनप्रारम्भे। हे चन्द्रवंशगगनसहस्रकिरण। 4) प्रमुदितसमदेत्यत्र कोकिल(लः)। विततयः श्रेणयः। विपिनं वनम्। विरुतेति—शब्दवाचाल(ला)ः। विचकिलो मल्लिका। सुरभिः सुगन्धः। विरहो वियोगः। तपनमिति—तापकारि भवतीत्यर्थः। नूतनवसन्तसमये।

---

1 धवन् AP. 2 चितालितो N. 3 न्लृल्गा GH. 4 मेनिर A; 5 लव dropped in B. 6 वरशिखाः A. 7 नुजोः B. 8 विंशतिलघवो N. 9 कुरबक N. 10 विचकिल्लसद० B. 11 तव न० B.

खञ्जेति शब्दस्य छन्दसि प्रवेशयितुमशक्यत्वात्[1] नाम नोक्तम् ॥ २९. १ ॥

शिखा-खञ्जयोः प्रकारान्तरमाह—

अर्धयोर्वा ॥ ३० ॥

न्लृलगा न्लृगौ चेत्योजयुक्पादयोर्यच्छिखाया लक्षणमुक्तं तत् पूर्वापरार्धयोश्चेद् भवति तदापि शिखा । एवं पूर्वापरार्धयोर्व्यत्यये खञ्जापि । अर्धयोरित्यभिधानादोजयुजोरिति निवृत्तम् । तत्र शिखा यथा—

[2]सुभग तव नवविरह इह महति विलसति चकितहरिणशिशुदृशः ।
अमृतरुचिरुचिरजनि विषममलकमलदलततिरपि दवदहनशिखा ॥ ३०.१ ॥

खञ्जा यथा—

अभिनवविकसितकुरवकविचकिलबकुलपरिमलमधुरमधुसमये ।
त्वमिह कथमिव पथिक हतक गतकरुण परिहरसि निजमृगदृशम् ॥ ३०.२ ॥

अनयोर्विषमवृत्तत्वेऽप्यर्धसममध्ये लाघवार्थं पाठः ॥ ३०.२ ॥

न्लृगावतिरुचिरा ॥ ३१ ॥

द्वयोरर्धयोर्नगणनवकं गुरुश्च । यथा—

[3]घनपरिमलमिलदलिकुलमुखरितनिखिलकमलकुवलयवनः ।
जनयति मनसि निरवधि मुदमविरतमिह मम मधुरतिरुचिरे[4] ॥ ३१.१ ॥

न्लृलगाश्च ॥ ३२ ॥

द्वयोरर्धयोर्यथासंख्यं न्लृगौ न्लृलगाश्च यत्र भवन्ति साप्यतिरुचिरा । यथा—

[5]रतिकरमलयमरुति शुचिशशिभृति हतहिममहसि मधुसमये ।
परिहरसि पथिक हतक कथमतिरुचिरयुवतिमति हि चपलतया ॥ ३२.१ ॥

द्वे अप्येते चूलिके इत्यहीन्द्रः ॥ ३२.१ ॥

अर्धसमप्रकरणम् ।

अथ विषमवृत्तान्युच्यन्ते—

अनुष्टुभि नाद्यात् स्नौ तुर्याद्यो वक्त्रम् ॥ ३३ ॥

अनुष्टुभ्यष्टाक्षरायां जातौ पादस्याद्यात् प्रथमादक्षरात् परौ स्नौ सगणनगणौ न भव-

---

1) अशक्यत्वादिति—द्विगुरुत्वात् । अत्र न पादनियमः । किं तु शिखायाः द्वाभ्यां पादाभ्यां द्वयोरर्धयोर्निष्पन्नयोरत्र वृत्ते सपूर्णे जायते । 2) सुभग तवेत्यत्र अमृतेति—चन्द्र किरणः । अमलेति—पद्मश्रेणिः । दवदेति—अग्निज्वाला । पथेति—तयाग्रापि योज्यम् । 3) घनपरिमलेत्यत्र अत्रापि न पादसख्या । 4) (हे अतिरुचिरे B) । 5) रतिकरेति—सुखकारी । अति हि भृशार्थम् । चञ्चलतया ।

---

१ रुचि dropped in A. २ तुरुक NP. ३ मधुर dropped in N. ४ कल A. ५ न्लृलाश्च BGH. ६ स्नुः BP. ७ यतिनृति N.

तोऽन्ये तु पड् गणा यथेष्टं भवन्ति। चतुर्थादक्षरात् परतश्च यगणो भवति तद्वृत्तं वक्त्रं नाम। यथा—

"तस्याश्चस्तकुरङ्गाक्ष्या वक्त्रेण त्वं पराभूतः।
हिमांशो क्षीयसे युक्तं लज्जसे तु न किं वृद्धा॥ ३३.७॥

एवमन्यदप्युदाहार्यम्। अत्र प्रथमपादस्य प्रथमस्थाने ग्लाविति द्वौ विकल्पौ। द्वितीये स्रवर्जनात् शेषगणैः षट्। तृतीये य एक एव। चतुर्थे ग्लाविति द्वौ। "अन्योऽन्याभ्यासे चतुर्विंशतिः। प्रतिपादं चतुर्विंशतेर्भावादन्योऽन्याभ्यासे जातास्तिस्रो लक्षाः एकत्रिंशत्सहस्राः सप्त शतानि षट्सप्तत्यधिकानि (३३१७७६)। एवमियमेव संख्या प्रत्येकं विपुलाभेदेष्वपि ज्ञेया॥ ३३.१॥

तद्युजोर्जः पथ्या॥ ३४॥

तद्वक्त्रं युजोः पादयोस्तुर्यादक्षरात् परो जगणश्चेद् भवति तदा पथ्या। यथा—

"आलानितगजस्कन्धघृष्टाः पथ्यायतद्रुमाः।
अद्यापि कथयन्त्येते राजेन्द्र तव दिग्जयम्॥ ३४.१॥

ओजे विपरीतादिः॥ ३५॥

ओजयोः पादयोस्तुर्यादक्षरात् परो जगणश्चेद् विपरीतादिः पथ्या। युक्पादयोर्य एवावतिष्ठते। यथा—

"विपरीतानि रे शठ करिष्यसि कियन्त्यस्मात्।
दुकूलं प्रच्छदीकृतं "तस्या धत्से ममाग्रे यत्॥ ३५.१॥

नश्चपला॥ ३६॥

ओजयोः पादयोस्तुर्याक्षरात् परो नगणश्चेच्चपला"। यथा—

"वीक्षितोऽप्येष तिलकश्चपलाक्षि त्वया सद्यः।
दधाति नव्यमुकुले रोमाञ्चकञ्चुकं मन्ये॥ ३६.१॥

युजोः षड्भ्यो लौ विपुला॥ ३७॥

---

1) तस्याश्चस्तेत्यत्र त्रस्तो भयभ्रान्तः स चासौ कुरंगश्चद्वदक्षिणी यस्याः। पराभूत-निर्जितः। 2) अन्योऽन्याभ्यासे इत्यत्र द्वौ षड्गुणौ जातौ १२ एकेन गुणितौ तदेव तत्तो १२ द्विगुणा २४। एवं द्वितीयादिषु पादेषु भवन्ति भङ्गकाः। प्रथमपादभेदैः द्वितीयपादभेदाः ताड्यन्ते। एवं पादद्वयभेदैः तृतीयपादभेदाः। त्रिकपादभेदैः चतुर्थपादभेदा। तदा उत्कसंख्या। 3) आलानितेति—आलानस्तम्भत्वं प्रापिता ये सामयोनयः। घृष्टाः त्वग्निराकरणात्। पथि मार्गे। दिग्यात्राम्। 4) विपरीतेत्यत्र अस्मादृशीति—अन्यादृशीति शेषः। पट्टकूलं 'पछेडी'ति प्रसिद्धम्। 5) अपराध्नियः। 6) चपलेत्यत्र अत्रापि ३३१७७६ भेदा भवन्तीति। 7) वीक्षितोऽपीत्यत्र तिलको वृक्षविशेषः। मुकुलैः कोरकैः।

---

१ वक्त्रनाम S. २ अप P. ३ आयतादस्य BP. ४ तद्रुमो. A. ५ परे जगण० P. ६ रोमाञ्च० A.

युक्पादयोः पड्भ्यः परो लघुश्चेद् विपुला। [1]नचेयं पथ्यया गतार्था। विपुलावर्गस्येदानीमारभ्यमाणत्वात् तां विना तस्यानुपपत्तेः। युक्पादयोः सप्तमेन लघुना अवश्यमेव भवितव्यं विषमपादयोस्तु नादिभिर्यगणस्यापवादं वक्ष्यति। पथ्यायां तु यगण एवावतिष्ठते ॥ ३७ ॥

सैतवस्य चतुर्षु ॥ ३८ ॥

सैतवस्याचार्यस्य मते चतुर्षु पादेषु पड्भ्यः परो लो भवति। यथा—

विपुलेऽप्यम्बुधौ कृतं वर्त्म रामेण सैतवम्।
चित्रमेतद्विहायवा किमसाध्यं महात्मनाम् ॥ ३८.१ ॥

तुर्यान्नतभ्रमसास्तद्विपुला ॥ ३९ ॥

ओजे विपरीतादिरित्यत ओज इत्यनुवर्तते। ओजयोः पादयोस्तुर्यादक्षरात् परे[4] यगणं बाधित्वा नतभरमसाश्चेद् भवन्ति तदा तद्-विपुला। नविपुला तविपुला भविपुला रविपुला मविपुला सविपुला चेति। युजोः पड्भ्यो ल इति तु स्थितमेव। नविपुला यथा—

पश्यन्ति देव चरणद्वयं ये तव भक्तितः।
तेषां भवन्ति विपुलाः सद्यः कल्याणसंपदः ॥ ३९.१ ॥

ओजे इति जातिपक्षे द्वयोरपि पादयोर्ग्रहणम्। व्यक्तिपक्षे पुनरेकस्य प्रथमस्य तृतीयस्य वा। तथा च [2]महाकवीनां प्रयोगः—

[3]अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।
तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना ॥ ३९.२ ॥

तथा—

[4]तव मन्त्रकृतो मन्त्रैर्दूरात् संशमितारिभिः।
प्रत्यादिश्यन्त इव मे इष्टलक्ष्येभिदः शराः ॥ ३९.३ ॥

तविपुला जातिपक्षे यथा—

पादेन हता येन सा जातीलुब्धेन मल्लिका।
अलेस्तस्य दैवादहो वदर्यपि सुदुर्लभा ॥ ३९.४ ॥

व्यक्तिपक्षे—

[5]वन्दे कविं श्रीभारविं लोकसंतमसच्छिदम्।
दिवा दीपा इवाभान्ति यस्याग्रे कवयोऽपरे ॥ ३९.५ ॥

---

1) पथ्यया गतार्था न भविष्यति यतस्तत्र जगणो भवति। नगणादिभिस्त्विषम्। न पथ्यालक्षणं एवं प्रायेण भवति। 2) महाकवीनामिति—कालिदासादीनाम्। 3) अनाकृष्टेत्यत्र पारं पश्यति पारदृश्वा। रघुवंशे। 4) तव मन्त्रेत्यत्र शान्तिं प्रापिता अरयो यैस्ते तैः। 5) वन्दे कविमित्यत्र पक्षे भाभिः कान्तिभिः उपलक्षितो रविः।

---

१ युजोः F. २ ओजयोस्तु EF. ३ तुर्याक्षरात् C. ४ पारयगणं A; परे यगणं M. ५ पादयोः dropped in B. ६ आयस्य F. ७ लक्ष० A.

तथा—

लोकवत्प्रतिपत्तव्यो लौकिकोऽर्थः परीक्षकैः।
लोकव्यवहारं प्रति सदृशो बालपण्डितौ ॥ ३९.६ ॥

जातिपक्षे भविपुला यथा—

इयं सखे चन्द्रमुखी सितज्योत्स्नावभासिनी।
इन्दीवराक्षी हृदयं दन्दहीति तथापि मे ॥ ३९.७ ॥

व्यक्तिपक्षे यथा—

यस्य प्रभावाद् भुवनं शाश्वते पथि तिष्ठति।
देवः स जयति श्रीमान् दण्डधारो महीपतिः ॥ ३९.८ ॥

तथा—

[1]मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥ ३९.९ ॥

जातिपक्षे रविपुला यथा—

[2]वधूभिः पीनस्तनीभिस्तूलीभिः कुङ्कुमेन च।
कालागुरुधूपधूमैर्हेमन्ते जयति स्मरः ॥ ३९.१० ॥

व्यक्तिपक्षे यथा—

महाकविं कालिदासं वन्दे वाग्देवतागुरुम्।
यज्ज्ञाने विश्वमाभाति दर्पणेप्रतिविम्बवत् ॥ ३९.११ ॥

तथा—

कामिनीभिः सुखं संगः क्रियते पण्डितैरपि।
यदि न स्याद् वारिवीचीचञ्चलं हतजीवितम् ॥ ३९.१२ ॥

जातिपक्षे भविपुला यथा—

[3]सर्वातिरिक्तं लावण्यं बिभ्रती चारुविभ्रमा।
स्त्रीलोकसृष्टिः सा नूनं निःसामान्यस्य वेधसः ॥ ३९.१३ ॥

व्यक्तिपक्षे यथा—

[4]मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः।
पद्मजसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ॥ ३९.१४ ॥

तथा—

[5]अदूरवर्तिनीं सिद्धिं राजन् विगणयात्मनः।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥ ३९.१५ ॥

---

1) मुक्तशेषेत्यत्र उपस्थित उपासितम्। प्राञ्जलिनेति—योजितहस्तेन। कुमारकाव्ये काव्यमिदम्। 2) वधूभिरित्यत्र जयतीति—लोकमिति शेषः। 3) सर्वातिरिक्तमित्यत्र सृज्यतेऽसाविति लोकानां मध्ये सृष्टिः। कर्मणि क्तिच्। 4) मनोभिरित्यत्र ख(प)ञ्जसवादिनीरिति—स्वरविशेषं अनुवदन्ति। मयूर(रं) मन्द्रं रौति मयूरी तारम्। 5) अदूरवर्तिनीमित्यत्र विगणयेति—जानीहि। प्रकृष्टेयम्। का धेनुः। कीर्तिते [नाम्नि]।

---

१ ववामिनी A. २ कालागरु N. ३ दर्पणे प्र० B. ४ खञ्ज N.

जातिपक्षे सविपुला यथा—

[1]क्षणविध्वंसिनि काये का चिन्ता मरणे रणे।
को हि मन्दः सहस्रैव स्वल्पेन बहु हारयेत् ॥ ३९.१६ ॥

एवं व्यक्तिपक्षेऽप्यन्वेष्यम्। [2]संकीर्णाश्च विपुलाप्रकारा दृश्यन्ते।

यथा—

क्वचित्काले प्रसरता [3]क्वचिदापत्य निम्नता।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां बलम् ॥ ३९.१७ ॥
तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत्।
हिमांशुमाशु ग्रसते तन् [4]मदिम्नः स्फुटं फलम् ॥ ३९.१८ ॥

इत्यादि। ते स्वबुद्ध्याऽभ्यूह्याः। सर्वासां च विपुलानां चतुर्थो वर्णः प्रायेण गुरुर्भवतीत्याम्नायः।

वक्त्रप्रकरणम्।

*

एकोऽष्टाक्षरः पादश्चतुर्वृद्धाः क्रमात् परे पदचतुरूर्ध्वं चतुर्विंशतिधा ॥४०॥

एकः कश्चिदष्टाक्षरः पादस्ततोऽन्ये पादाः क्रमाच्चतुर्भिश्चतुर्भिर्वर्णैर्वृद्धाः कार्या इति पदचतुरूर्ध्वम्। तच्च न्यासभेदाच्चतुर्विंशतिधा। स्थापना यथा[5]—

८	८	८	८	८	८	१२	१२	१२	१२	१२	१२	१६	१६	१६	१६	१६	१६	२०	२०	२०	२०	२०	२०
१२	१६	२०	१२	१६	२०	८	१६	२०	८	१६	२०	१२	८	२०	१२	८	२०	१२	१६	८	१२	१६	८
१६	१२	१६	२०	२०	१२	१६	८	१६	२०	२०	८	८	१२	८	२०	२०	१२	१६	१२	१६	८	८	१२
२०	२०	१२	१६	१२	१६	२०	२०	८	१६	८	१६	२०	२०	१२	८	१२	८	८	८	१२	१६	१२	१६

प्राप्ते वसन्तमासेऽस्मिन्-,
अनन्तरेणोपधिं[6] वल्लभां गेहिनीम्।
पदचतुरूर्ध्वं कथमिव पथिक यास्यसि,
विपलतिकानामिवोत्फुल्लकङ्केल्लिलतानां गन्धं जिघ्रन् ॥ ४०.१ ॥

एवमन्येऽपि भेदा उदाहार्याः ॥ ४०.१ ॥

तदादौ द्विगं सर्वलं प्रत्यापीडः ॥ ४१ ॥

तदेव पदचतुरूर्ध्वमादौ द्विगुरुकं ततः परं सर्वलघुवर्णं प्रत्यापीडः। यथा—

---

1) क्षणविध्वंसिनीति [अत्र] रणे संग्रामान्तर्भरणे का चिन्तास्ति। 2) संकीर्णाश्चेति—एकः पादो नगणस्य द्वितीयो मगणस्य। एवं एको मगणस्यान्यः सगणस्येत्यादिना नगणादीनां सङ्करे। 3) क्वचिदापत्येत्यत्र स्वर्भानुः राहुः। माघकाव्ये वृत्तमिदम्।

---

१ विन्नता A. २ भानुमतः P. ३ मदिम्नः B महिम्नः C. ४ क्रमाच्चतुर्भिर्वर्णैर्वृद्धियोग्याः क्रमाच्चतुर्भिरिति पद० A. ५ कार्या dropped in B. ६ B adds.-पोऽन्ये द्विर्द्विरन्येऽधस्तदन्ये तु क्रमोत्क्रमात्। चतुर्विंशतिभेदं स्याच्चतुरूर्ध्वंक्रमोत्क्रमौ। ७ ओपधौ A.

स्वामिन् जिनवर तव,
[1]योऽङ्घ्रिद्वितयमुपैति विनमति।
नम्रामरमणिमयमुकुटशुचिकिरण,-
[2]मालाकिसलयितचरणकमल इह दिवि भवति ॥ ४१ १ ॥

अन्ते च ॥ ४२ ॥

तत्पदचतुरूर्ध्वमन्ते चकारादादौ च द्विगं शेषसर्वलघुवर्णं पुनः प्रत्यापीडसंज्ञम्। यथा-

नित्य प्रणमत भक्त्या,
पादद्वयमिह चरमजिनस्य।
सद्यो यदमरनरभुजगपरिवृढाना,
मौलौ सपदि भवति नवविकसितकमलवतस ॥ ४२ १ ॥

द्विगमापीडः ॥ ४३ ॥

चानुकृष्टत्वादादाविति नानुवर्तते। अन्ते द्विर्गुरुकं शेषसर्वलघुकं पदचतुरूर्ध्वमापीडसंज्ञम्। यथा-

[1]मदमुखरमयूरे,
स्फुटविविधसरिदधिकपूरे।
नवघनसमय इह कलय वत कान्ता,
शरणमयि पथिक हतक झगिति जहिहि वनान्तम् ॥ ४३ १ ॥

अत्र प्रतिपादं चतुर्भिर्यतिरिति कश्चित् ॥ ४३.१ ॥

पदचतुरूर्ध्वमदापीडोऽपि चतुर्विंशतिधेति तन्मध्यात् [2]पूर्वाचार्यानुरोधेन भेदत्रयस्य नामान्युच्यन्ते-

स आद्यस्य द्वितीयादिना व्यत्यये कलिकालवल्यमृतधाराः ॥ ४४ ॥

स आपीड आद्यस्य पादस्य द्वितीयतृतीयतुर्यपादैर्विपर्यासे यथासङ्ख्यं कलिकालादयो भवन्ति। तत्राद्यस्य द्वितीयेन व्यत्यये कलिका। यथा-

[3]करकलितनिशितकरवाल,
सुचिरमवनिपाल।

---

1) मदमुखरेत्यत्र नवीनमेघार्ता शीघ्र त्यज काननसमीपम्। 2) पूर्वाचार्यानुरोधेनेत्यत्र यद्यपि चतुर्विंशतिधा स्यापिते आपीडे सर्वेऽपि विरूपा अन्तभवन्ति तथापि पूर्वसूरिकृतप्रकारेण उदाहरणानां नामत्रय पृथगुदाहार्यमिति। 3) करकलितेत्यत्र ताक्ष्णखड्ग। भवति-राजा। काले यम।

---

१ योऽङ्घ्रिद्वितीय V २ किसलयित B ३ द्विग BF ४ जहहि A ५ चतुर्थेवेति E ६ द्वितीयादिपादे F ७ तुर्ये पादे E ८ कलिकाया यथाक्रम स्यु F

पृथुमदरिपुनृपतिबलदलनकालस्,
त्वमिह जय निर्जितविलसितपरिदलितकलिकालः ॥ ४४.१ ॥
मञ्जरीति पिङ्गलः ॥ ४४.१ ॥

आद्यस्य तृतीयेन व्यत्यये लवली । यथा—

"त्वयि जलधिमनु चलति नृप,
मुखवासः समजनि निखिलदिगवलानाम् ।
सुरभिबहुरजोभिस्,
तरलतुरगनिकरखुरमृदितमृदुलवलीनाम् ॥ ४४.२ ॥

आद्यस्य तुर्येण व्यत्यये अमृतधारा । यथा—

"प्रणयवति सखि समुपहसितमनसिशयरूपे,
प्रणयमनुसर क इव मानः ।
स्रवति वचनमपि मधुरमिह यदस्य,
सततममृतधाराम् ॥ ४४ ३ ॥

"पिङ्गलस्तु पदचतुरूर्ध्वभेदानेतानाह । यथा—

"जनयति महती प्रीतिं हृदये,
कामिना चूतमञ्जरी ।
मिलदलिचक्रचञ्चुपरिचुम्बितकेसरा,
कोमलमलयवातपरिनर्तिततरुशिखरस्थिता ॥ ४४.४ ॥
"विरहविधुरहूणकान्ताकपोलावदातं,
परिणतिदरपीतपाण्डुच्छवि लवलीफल निदाघे ।
जयति हिमशीतल,
"पाण्डवस्वादु तृष्णाहर सुन्दरम् ॥ ४४.५ ॥
यदि वाञ्छसि कर्णरसायनं सततममृतधाराभिः,
यदि हृदि वा परमानन्दरसम् ।

---

1) त्वयि जलधीत्यत्र भनु लक्ष्मीकृत्य । मुखवास पटवास । दिग्वधूकामिनीनाम् । 2) प्रणयति—स्नेहयति यह कुरु । 3) पिङ्गलस्त्विति—पिङ्गलेत्युदाहृति यदनया रीत्या स्थापितानि त्रीणि उदाहरणानि अस्माक मते पदचतुरूर्ध्वसज्ञां प्रापुवन्ति । पर तस्य लघुगुरुव्यक्तिं । 4) जनयति महेत्यत्र चमु इति—निपुण अथवा अलिचिकरस्य चञ्चवस्ताभिः । 5) विरहविधुरितेत्यत्र हूणो देशविशेषमत्रत्यश्चिपः । परिणतीति—पाकेन ईषत्पाण्डुच्छवि । 6) पाण्डवमानमीति—पाण्डव पानविशेषः तस्येव तद्वद्वा स्वादु । [पाण्डव पानकभेदः । तद्वत् स्वादु P] । पाण्डवपाटपक्षे पण्डवननजातम् ।

---

१ अनुवद V २ मित्र dropped in A ३ वलति ५. ४ ५ adds मनसिज after इति ५ वदनमपि A ६ भेदानेतान्प्रतिपाद्याह P ७ स्वादु ८ पाण्डव ABCD५३ ९ हृदि dropped in B.

भ्रातः शृणु [1]धरणीधरवाणीममृतमयीं,
तत्काव्यगुणभूषणम् ॥ ४४.६ ॥
पदचतुरूर्ध्वप्रकरणं [2]सप्तभिः ॥ ४४.६ ॥

*

स्रजस्ला न्सज्गा भ्रजल्गाः स्रजसज्गाः पादेपूद्गता ॥ ४५ ॥

यस्य प्रथमे पादे सजसलाः, द्वितीये पादे नसजगाः, तृतीये पादे भनजलगाः, चतुर्थे पादे सजसजगाः – तद्वृत्तमुद्गता। यथा –

[3]वत चन्द्रिकाजलमशेषम,
उपरमयितुं चकोरकाः।
शक्यमिह न खलु तत्परितः,
पिबतोद्गतां सपदि चन्द्रलेखिकाम् ॥ ४५.१ ॥

रनभगास्तृतीये सौरभकम् ॥ ४६ ॥

उद्गतैव तृतीये पादे रनभगाश्चेत् सौरभकम्। तृतीय इति वचनादुद्गताया एवान्ये त्रयः पादा गृह्यन्ते। यथा –

[4]अतिरेकवान् किल गुणोऽपि,
कलयति कदापि दोषताम्।
सप्तपर्णविटपी विलसन्,
मदसौरभाद् [5]वनगजैर्विदल्यते ॥ ४६.१ ॥

नौ सौ ललितम् ॥ ४७ ॥

उद्गतैव तृतीये पादे ननससाश्चेल्ललितम्। पादत्रयं पूर्ववत् तदेव। यथा –

[6]सदलंकृतैर्गुणगणेन,
विविधरसभावभङ्गिभिः।
सुललितपदरचनाभिरहो,
ललनेव का न कविता मनोरमा ॥ ४७.१ ॥
उद्गताप्रकरणं त्रिभिः ॥ ४७.१ ॥

*

1) धरणीधरः कविविशेषः। 2) सप्तभिरिति – पदचतुरूर्ध्वं १ प्रत्यापीडभेदद्वयं ३ आपीड ४ कलिका ५ लवली ६ अमृतधारा ७। 3) वत चन्द्रिकेत्यत्र काचिद्विरहिणी चकोरपक्षिणः प्राह – हे चकोराः भवद्भिरिति गम्यम्। उद्गतां इमां चन्द्रिकां यूयं पिबत पानं कुरुध्वम्। 4) अतिरेकवानित्यत्र अतिरेकः आधिक्यम्। 5) वनगजैरिति – वनगजा हि तद्गन्धं न सहन्ते इत्युपादत्तम्। 6) सदलंकृतेत्यत्र प्रधानोपमाद्यलंकारैर्भूषणैश्च। गुणा माधुर्यादयः १० शीलरूपादयः। विविधेति – शृङ्गारादयः गभीरार्थाः। पदे हावभावादयः। कान्तेव। कवेः कर्म कविता।

१ वि dropped in N.

म्सज्भगगाः स्लजरंगाः नासौ निज्याः पादेपूपस्थितप्रचुपितम् ॥ ४८ ॥

प्रथमे पादे मसजभगगाः, द्वितीये पादे सनजरगाः, तृतीये ननसाः, चतुर्थे नगणत्रयं जयौ च यत्र भवन्ति तदुपस्थितप्रचुपितं वृत्तम् । यथा—

"राजन् यैः समरे मदादुपस्थितपूर्वं,
द्विरदप्रचुपितयायिभिर्विपक्षैः ।
तव धनुरुरुनिनदाद्,
द्रुतगति मृगवदपसरंन्ति त एते ॥ ४८.१ ॥

नौ स्लौ न्सौ तृतीये वर्धमानम् ॥ ४९ ॥

उपस्थितप्रचुपितमेव तृतीये पादे ननसननसाश्चेद् वर्धमानम् । तृतीये इति वचनादन्यत्पादत्रयं तदवस्थमेव । यथा—

"दिग्यात्रासमयेऽद्य जैत्रतूर्यनिनादैर्,
वियति प्रतिरसितेन वर्द्धमानैः ।
भयतरलितगमनान् दिनकरस्थतुरगान्,
कथमपि नृवर नियमयत्यरुणोऽयम् ॥ ४९.१ ॥

तजाः शुद्धविराड्रूपभम् ॥ ५० ॥

उपस्थितप्रचुपितमेव तृतीये पादे तजराश्चेत् तदा शुद्धविराड्रूपभम् । अन्यत्पादत्रयं तदवस्थमेव । यथा—

"लावण्यामृतपूरधारिणीह विशाल—,
रमणोन्नतपुलिनस्थलीमनोज्ञा ।
सा शुद्धविराण्मुखाम्बुजा,
सरिदिव रमयति हृदयानि नराणाम् ॥ ५०.१ ॥

उपस्थितप्रचुपितप्रकरणं त्रिभिः ॥ ५०.१ ॥

*

पूर्वेऽर्धे मुनौ परे न्लल्लगाः सौम्या ॥ ५१ ॥

पूर्वार्धे पञ्च मगणा गुरुश्च । षोडश गुरव इत्यर्थः । उत्तरार्धे दश नगणा लघ्वन्तं च द्वात्रिंशल्लघव इत्यर्थः यत्र तच्छन्दः सौम्या । यथा—

---

1) राजन् यैरित्यत्र राजा समूहैः पूर्वमागतं गजवरम् प्रचुपित मन्दं याति इति । सलीलगतय इत्यर्थः । द्रुतगतीति—क्रियाविशेषणम् । 2) दिग्यात्रेत्यत्र तूर्यं वादित्रम् । वियत्याकाशे । प्रतिरसितेन । नियमयति सूर्यसारथिः । 3) लावण्यामृतपूरेत्यत्र शुद्धो धवलो वीतो पक्षिणां राजा राद् अर्थात् हंसः मुखे येषा एवंविधानि अम्बुजानि यस्यां सा । पक्षे शुद्धं निर्मलं विराजति इति विराट् । पूर्णेन्दु वदनाम्बुजं यस्याः सा नदीव ।

---

१ स्लजगाः ADDE. २ परे dropped in ADDE. ३ अगस्ती N. ४ तदाम्भोमेव A. ५ निवमयत्य A. ६ प्रचुपित dropped in N. ७ पूर्वो ॥ः पूर्वे अर्धे ADDE. ८ गुरु. A.

[1]सौम्यैतस्याः किं बालाया नो जानीषे कष्टावस्थाम्।
धरणितलविलुठनमलिनितकुचकलशमनुभवति तवैं विरहमिह किल ॥ ५१.१ ॥

व्यत्यये ज्योतिः ॥ ५२ ॥

यत्र पूर्वार्धे द्वात्रिंशल्लघव उत्तरार्धे षोडश गुरवस्तच्छन्दो ज्योतिः। यथा—

[2]परिहर वत परिचयमेयि युवतिषु किमिति[3] नहि विसृजसि विषयसुखमिह।
ज्योतीरूप निष्कर्माणं कृत्वात्मान मुक्तिं यायाः ॥ ५२ १ ॥

एते द्वे अप्यनङ्गक्रीडे इति जयदेवः। शिखेत्यहीन्द्रः ॥ ५२.१ ॥

विषमवृत्तप्रकरणम् ॥

*

अथ मात्राच्छन्दांसि।

ओजे षण्मात्रा रलगन्ता युज्यष्टौ न युजि षट् संततं ला न समः परेण गो वैतालीयम् ॥ ५३ ॥

ओजपादयोः षण्मात्रा रलगन्ताः रगणलघुगुर्ववसानाः। युक्पादयोरष्टौ मात्राः रलगन्ता एव यत्र तद्वैतालीयं नाम च्छन्दः। अपवादमाह—न युजोः पादयोः षट् लघवो निरन्तरा भवन्ति। [4]न च समो लः सर्वपादेषु परेण सह गुरुर्भवति। यथा—

[4]अधुना भवदीयवैरिणाम्, अटवीकोटरचारिणा नृप।
प्रतिभाति कृपान्यचेतसा, वै तालीयरसः सुधोपमः ॥ ५३.१ ॥

[5]अत्रौजपादेऽष्टौ विकल्पाः। युक्पादे त्रयोदश। अष्टभिस्त्रयोदश गुणिताश्चतुरुत्तर शतं वैतालीयपूर्वार्धे भेदा भवन्ति। उत्तरार्धेऽपि तावन्त एव। अन्योऽन्यताडनायां जातानि दश सहस्राणि अष्टौ शतानि षोडशाधिकानि ॥ ५३.१ ॥

रयान्ता औपच्छन्दसकम् ॥ ५४ ॥

ओजे षण्मात्रा युज्यष्टौ रयान्ता रगणयगणान्ताश्चेद् भवन्ति शेषं तु सर्वं वैतालीयसमं तदा औपच्छन्दसकं नाम च्छन्दः। यथा—

1) सौम्यैतस्या बालाया मुग्धाया तु खल्वस्थाम्। 2) परिहरेत्यत्र परिचय ससर्गं यायाः गच्छेः। 3) न च समो ल इति—द्वितीयचतुर्थषष्ठादिषण सम स लघु सम्प्रयतनेन अक्षरभारेण गुरुर्न कार्य इत्यर्थः। 4) अधुनेति—वै निश्चयेन। तालया अयं तालीयः। 5) अत्रौजपादेऽ[ष्टौ] विकल्पा इति—अत्र वैतालीयस्य विषमपादे त्रयोदशधा गणाः प्रस्तार्यते तत्र या सममात्रा पराश्रिता भवति तान् विकल्पान् परित्यज्य शेषा अष्टौ गृह्यन्ते। युक्पादयोरार्यायां गणद्वय प्रथम प्रस्तार्यते ततो त्रिंशतिर्विकल्पा भवन्ति। ततो येषु रूपेषु समा मात्रा पराश्रिता भवति तत्प्रस्तारान् परित्यज्य अपरे ग्राह्याः।

---

१ तव dropped in A २ अपि CDFNP ३ किमिति N ४ नि कर्माणं P ५ र्लगन्ता GH ६ स्यु P

कीर्तिस्तव वल्लभा त्रिलोकीम्, अखिलां पर्येटतीति यत् प्रबुद्धाः ।
कवयः कथयन्ति सत्यमेतन्-, "नौपच्छन्दसकौ भवन्ति सन्तः ॥ ५४.१ ॥

भगगान्ता आपातलिका ॥ ५५ ॥

ओजे पण् मात्राः युज्यष्टौ भगणगुरुद्वयान्ताश्चेद् भवन्ति शेषं वैतालीयसमं तदा आपातलिका नाम च्छन्दः । यथा –

"आपातलिका वत संपत्, क्षणिकं प्राणितमप्यसुभाजाम् ।
इति मत्वा निश्चयपूर्वं, शाश्वतिकार्थे यत्नमुपाद्धुम् ॥ ५५.१ ॥

आपातलिका अस्थिरा ॥ ५५.१ ॥

युजि तिसृभ्यो गः प्राच्यवृत्तिः ॥ ५६ ॥

युक्पादयोस्तिसृभ्यो मात्राभ्यः परो गुरुश्चेत् तदा प्राच्यवृत्तिच्छन्दः । ओजयोस्तु "पूर्ववत् । सा च वैतालीय-औपच्छन्दसक-आपातलिकोपाधिभेदात् त्रेधा । तत्र वैतालीय-प्राच्यवृत्तिर्यथा –

"भुवने दधदेकवीरतां, त्यागधर्मकरुणापराक्रमैः ।
नृपसिंह पटच्चरीं निज-, प्राच्यवृत्तिमकरोः पुनर्नवाम् ॥ ५६.१ ॥

औपच्छन्दसकप्राच्यवृत्तिर्यथा –

"उदयाचलवप्रभागवल्गत्-, सप्तसप्तितुरगांह्रितॉडनोत्था ।
नवपल्लवपाटला पुरस्ताद्, धातुधूलिपटलीव भाति सन्ध्या ॥ ५६.२ ॥

आपातलिकाप्राच्यवृत्तिर्यथा –

"अलिमलिने व्योम्नि पतन्तो, रश्मयोऽभिनवशीतमरीचेः ।
दधति तुलामन्तरुदन्वत्-, सान्द्रविद्रुमलताविपिनानाम् ॥ ५६.३ ॥

अत्र चत्वारो विकल्पाः । यथा ऽ।ऽ।ऽ; ।।।ऽ।ऽ; ऽ।ऽ।।।; ।।।ऽ।।।; ते च ओजपाद-विकल्पैरष्टभिराहता द्वात्रिंशत्पूर्वार्धविकल्पाः । उत्तरार्धेऽपि तावन्तः । अन्योऽन्यताडनायां दश शतानि चतुर्विंशत्यधिकानि । इयमुपपातलिकेत्येके" ॥ ५६.३ ॥

अयुज्यार्द्यलाद् ग उदीच्यवृत्तिः ॥ ५७ ॥

अयुक्पादयोरार्द्याल्लघोः परो गुरुश्चेत् तदा उदीच्यवृत्तिः । युजोस्तु पूर्ववत् । एषापि पूर्ववत् त्रिधा । तत्र वैतालीयोदीच्यवृत्तिर्यथा –

1) नौपच्छन्दसका इति – छन्द उपपन्न च्छन्दोऽनुवर्तनम् । तत्र भवेऽण्। स्वार्थे क च । 2) आपातलिकेत्यत्र आपातं समन्तात्पतनं लातीति आपातला । ततः स्वार्थे क । प्राणितं जीवितम् । उपार्ध्वं उद्यमं कुरुध्वम् । 3) पूर्ववदिति – वैतालीयादिवत् । 4) भुवने दधेत्यत्र पटच्चरीं जीर्णाम् । स त्वं इत्यध्याहार्यम् । 5) उदयाचलेत्यत्र सप्तसप्तिः सूर्यः । 6) अलिमलिने इत्यत्र अन्तरु[द]न्वेति – समुद्रमध्ये । घनप्रवालवल्लिवनानाम् ।

१ कवयन्ति N २ नौपच्छन्दसिका h ३ प्राग्वत् F ४ त्रिधा F ५ तुरगाद्रि N. ६ तावद्विरेवोत्तरार्धसत्कैस्ताडिता. १०२४ F ७ इत्यन्ये P ८ आद्याल्लाद् GH ९ आद्याल्लाघो A. १० प्राग्वत् F. ११ त्रेधा P

[1]विवस्वतोदीच्यवृत्तिना, मरुता दक्षिणवृत्तिना[2] तथा।
जनोऽयमिह जायते [3]मधौ, युगपत्तापतुषारभाजनम् ॥ ५७.१ ॥

औपच्छन्दसकोदीच्यवृत्तिर्यथा—

[4]भवद्व्रणकथाश्रुतेरमर्षाद्, दशनैरोष्ठमखण्ड्यनृपा ये।
महीश युधि [5]चेटचिह्नमेते, विदधत्यङ्गुलिखण्डनं त्वदग्रे ॥ ५७.२ ॥

आपातलिकोदीच्यवृत्तिर्यथा—

विनम्रसुररत्नकिरीट-, रश्मिविमिश्रितपादनखांशुः।
अगाधकरुणारससिन्धु, पातु स वश्चरमो जिननाथः ॥ ५७.३ ॥

अस्या अपि विकल्पौ द्वौ ।ऽ।ऽ; ।ऽ।।; युक्पादविकल्पैस्त्रयोदशभिराहतौ षड्विंशतिः पूर्वार्धभेदाः। अपरार्धेऽपि तावन्तः। अन्योऽन्यताडनायां जातानि षट् शतानि षट्सप्तत्यधिकानि ॥ ५७.३ ॥

ते मिश्रे प्रवृत्तकम् ॥ ५८ ॥

ते प्राच्यवृत्त्युदीच्यवृत्ती मिश्रे संकीर्णे प्रवृत्तकम्। युक्पादे मात्रात्रयाद् गुरुः, अयुक्पादे आद्यलाद् गुरुरित्यर्थः। इदमपि वैतालीयादिभेदात् त्रेधा। तत्र वैतालीयप्रवृत्तकं यथा—

[6]प्रवृत्तकरिविद्रवं रथ-, भ्रष्टनष्टसुभटं [7]विवाजि च।
द्विषां बलमजायत त्वयि, क्ष्मापते [8]क्षणमधिज्यधन्वनि ॥ ५८.१ ॥

औपच्छन्दसकप्रवृत्तकं यथा—

[9]पुरो दिनपतेरमुष्य सद्यः, पदय संप्रति कठोरपादपातैः।
स्फुटन्ति कमलाकराः समन्ताच्-, छीर्यते च सहसा तमिस्रराशिः ॥ ५८.२ ॥

आपातलिकाप्रवृत्तकं यथा—

[10]भवच्चरणयोः प्रणयित्वं, यान्ययुः क्षितिभृतां न शिरांसि।
क्षणाद् ददृशिरे युधि तानि, क्षुद्रगृध्रचरणप्रणयीनि ॥ ५८.३ ॥

अत्र प्रथमपादविकल्पाभ्यां द्वितीयपादविकल्पाश्चत्वारः आहताः अष्टौ पूर्वार्धे विकल्पाः। एवमुत्तरार्धेऽपि। अन्योऽन्यताडनायां चतुःषष्टिविकल्पाः ॥ ५८.३ ॥

---

1) विवस्वतोदीच्येत्यत्र उत्तरदिग्वर्तिना सूर्येण दक्षिणदिग्वर्तिना वायुना। 2) वसन्ते समकालं तापशीतपदम्। सूर्येण तापो मरुता तुषारश्च शीतलतया। 3) भवद्व्रणेत्यत्र श्रवणात्। अमर्षात् क्रोधात्। दन्तैरधरं राजानः। 4) दासलक्षणम्। 5) प्रवृत्तकरीत्यत्र पूर्वं भ्रष्टाः पश्चाद्दष्टा रथेभ्यः भ्रष्टनष्टाः सुभटा यत्र। 6) विगताश्वम्। 7) ज्यामधिरूढं तस्मिन्। 8) पुरो दिनपतेरित्यत्र कठिनकिरणपतनैः विध्वस्ता पद्माकरा लक्ष्मीवन्तश्च। स्फुटन्ति ध्वान्तराशिः। 9) भवच्चरणेत्यत्र अयुरिति-इदं गतौ।

---

१ दक्षिणावृत्तिना A; दक्षिणावर्तिना B २ कथा dropped in N. ३ तमि॰ CP.

वैतालीयादेर्युक्पादजा अपरान्तिका ॥ ५९ ॥

वैतालीय-औपच्छन्दसक-आपातलिका-तत्प्राच्यवृत्तीनां समपादैर्जनिता अपरान्तिका । तत्र वैतालीयापरान्तिका यथा—

[1]दिशतीं दुग्धपयोधिविभ्रमं, लवणाब्धेरिह रोधसि स्थिताः ।
श्रीसिद्धाधिप कीर्तिमुच्चकैस्, तव गायन्त्यपरान्तिकाः स्त्रियः ॥ ५९.१ ॥

इयं वैतालीयदक्षिणान्तिकेत्येके ॥ ५९.१ ॥

औपच्छन्दसकापरान्तिका यथा—

श्रीचौलुक्य किमद्भुतं पपात, व्योम्नो यत्त्वयि दिव्यपुष्पवृष्टिः ।
प्राक् तस्मिन्नरिकुम्भिकुम्भभेदात्, कीर्णा मौक्तिकपङ्क्तयस्त्वया हि ॥ ५९.२ ॥

इयमौपच्छन्दसकदक्षिणान्तिकेत्येके ॥ ५९.२ ॥

आपातलिकापरान्तिका यथा—

[1]तरुणीवेषा दीपितकामा, विकसज्जातीपुष्पसुगन्धिः ।
उन्नतपीनपयोधरभारा, प्रावृट् तनुते कस्य न हर्षम् ॥ ५९.३ ॥

इदं नलिनमित्येके ।

अत्र भेदत्रये प्रत्येकं प्रथमपादविकल्पैस्त्रयोदशभिर्द्वितीयपादविकल्पास्त्रयोदश आहताः एकोनसप्तत्यधिकं शतं पूर्वार्धे विकल्पाः । उत्तरार्धेऽपि तावन्तः । अन्योऽन्यताडनायां जातान्यष्टाविंशतिसहस्राणि पञ्च शतान्येकषष्ट्यधिकानि ॥ ५९.३ ॥

वैतालीयप्राच्यवृत्त्यपरान्तिका यथा—

[1]आगतोऽसि धूर्तापरान्तिकान्-, न ह्यलीकवाचामिहास्पदम् ।
जतुरसोऽयमक्ष्णोस्तथाधरे, कज्जलं च यत्ते विलोक्यते ॥ ५९.४ ॥

औपच्छन्दसकप्राच्यवृत्त्यपरान्तिका यथा—

केवलस्य न गिरेर्यदंहिपैः[2]-, ह्रुष्टपीडनयशाच्छिरः सुमेरोः ।
कम्पितं दिविषदा च विस्मितानां, पातु पश्चिमजिनः स वोऽद्भुतश्रीः ॥ ५९.५ ॥

आपातलिकाप्राच्यवृत्त्यपरान्तिका यथा—

[1]सुभग हे सरभसं सविलासैः, प्रतिमुहुस्तरललोचनपातैः ।
सगमोत्सवविधौ तव सत्यं-, कारमर्पयति पङ्कजनेत्रा ॥ ५९.६ ॥

---

1) दिशतीं दुग्धेत्यत्र अपरान्ते पश्चिमदिग्भागे भवाः अथवाऽपरस्यान्तिकाः पश्चिमदिग्वर्तिन्यः इत्यर्थः । 2) तरुणीवेषेति—अत्र कान्तेन उभयोरपि दीपितेति समानं विशेषणम् । जातिकुसुमैः सुगन्धिः । स्त्रीपक्षे तद्वत् सुगन्धिः । पयोधरा मेघाः स्तनाश्च । 3) आगतोऽसीत्यत्र कस्या अपि स्त्रियः पुरः प्राणेशो वक्ति नाहं कस्या अपि समीपादागतोऽस्मि अपरायाः कामिन्या इत्यर्थः । परस्पर नेत्राधरचुम्बनेन अधरे कज्जलं लोचने लाक्षारसः । 4) सुभगेत्यत्र सत्यंकार 'सचकार' इति प्रसिद्धम् ।

---

१ वचसां B. २ अद्रिपदाद्भुत C, अद्रिपमाद्भुत N.

इयमुत्पातलिकेत्येके। अत्रापि भेदत्रये प्रत्येकं प्रथमपादविकल्पैश्चतुर्भिर्द्वितीयपादविकल्पाश्चत्वारः आहताः षोडश पूर्वार्धे। उत्तरार्धेऽपि तावन्तः। अन्योऽन्यताडनायां द्वे शते षट्पञ्चाशदधिके ॥ ५९.६ ॥

ओजजा चारुहासिनी ॥ ६० ॥

वैतालीयादेर्विषमपादजाता चारुहासिनी। तत्र वैतालीयचारुहासिनी यथा—

यदि सा वत चारुहासिनी, किमु "चन्द्रिकयानया ततः।
यदि सा च विलोललोचना, किमु नीलसरोजिनीदलैः ॥ ६०.१ ॥

वैतालीयोत्तरान्तिकेत्येके ॥ ६०.१ ॥

औपच्छन्दसकचारुहासिनी यथा—

"तति(र)ह गगने न तारकाणां, प्रतिदिशमुदिता विभाति किं तु।
सरभसमुपसर्पतः सुधांशोः, कीर्णः कुसुमाञ्जली रजन्या ॥ ६०.२ ॥

औपच्छन्दसकोत्तरान्तिकेत्येके ॥ ६०.२ ॥

आपातलिकाचारुहासिनी यथा—

"भाति सुवदने तव भाले, नवमलयजचित्रकलेखा।
पद्मं जित्वा नयनाभ्याम्, उल्क्षिप्तेवेह पताका ॥ ६०.३ ॥

अपपातलिकेत्यन्ये।

अत्र भेदत्रये प्रत्येकं प्रथमपादविकल्पैरष्टभिर्द्वितीयपादविकल्पाः अष्टावाहताः चतुःषष्टिः पूर्वार्धे। अपरार्धेऽपि तावन्तः। अन्योऽन्यताडनायां चत्वारिंशच्छतानि षण्णवत्यधिकानि ॥ ६०.३ ॥

वैतालीयोदीच्यवृत्तिचारुहासिनी यथा—

"हृदि प्रविष्टा मृगेक्षणा, तथा यथैव तस्थुषी।
मनोभुवो निष्पतच्छरैर्, निरन्तरैः कीलितेव सा ॥ ६०.४ ॥

औपच्छन्दसकोदीच्यवृत्तिचारुहासिनी यथा—

"विदग्धयूनां पतद्भिरेभिः, स्खलद्गतिरियायतैः कटाक्षैः।
इयं सुजघनातिमन्दमन्द, सखे वितनुते पदप्रपञ्चम् ॥ ६०.५ ॥

---

1) चन्द्रिकया अनयेति-चन्द्रज्योत्स्नया। श्यामकमलदलैः। 2) तति(र)ह इत्यत्र तति' श्रेणि'। सरभसं सादरम्। कुसुमैरिति प्रसिद्धा। 3) भाति सुवदने इत्यत्र नवेति-तिलकरेखा। उत्क्षिप्तेवेति-ऊर्ध्वीकृतेव पताका। 4) हृदि प्रविष्टेत्यत्र मम इत्य हृदये तथा प्रविष्टा यथा इत्येतेऽन्ते मम हृदये किं कीलिता। हृदयान्न नि सरतीति भावः। 5) विदग्धेत्यत्र आयतैर्विस्तीर्णैः। सुजघनेति—कान्ता।

---

१ इमां उत्पातलिकां केचिदाहु P २ लोल dropped in B ३ चित्रक लेखा A ४ नयनाभ्यां A. ५ इत्येके P ६ अष्टाहता P ७ नि पतत् C

आपातलिकोदीच्यवृत्तिचारुहासिनी यथा—

"विशालवंशादपि जातः, सदा प्रकटयन्नतिमेकाम् ।
धनुःसदृशतां कलय त्वं, गुणाधिरोहोऽभिमतश्चेत् ॥ ६०.६ ॥

अत्रापि भेदत्रये प्रथमपादविकल्पाभ्यां द्वितीयपादविकल्पाबाहतौ चत्वारः पूर्वार्धे । अपरार्धेऽपि तावन्तः । अन्योऽन्यताडनायां षोडश ॥ ६०.६ ॥

सर्वेष्वाद्यलाद् गो दक्षिणान्तिका ॥ ६१ ॥

वैतालीयादेः "यथासंभवं सर्वेषु पादेषु आद्याल्लघोः परो गुरुश्चेद् भवति तदा दक्षिणान्तिका । यथा—

"तुषारसंभारवेदना-, भियेव हैमवतीं त्यजन् दिशम् ।
मयूखवानेष संप्रति, प्रयाति सरणिं दक्षिणान्तिकाम् ॥ ६१.१ ॥

एवमौपच्छन्दसकापातलिकयोरुदाहार्यम् । अत्र भेदत्रयेऽपि प्रत्येकं प्रथमपादविकल्पद्वयेन द्वितीयपादविकल्पाश्चत्वारो हताः अष्टौ पूर्वार्धे । अपरार्धेऽपि तावन्तः । अन्योऽन्यताडनायां चतुःषष्टिः ॥ ६१.१ ॥

ओजे चौ युजि पचौ लदलदान्तौ मागधी ॥ ६२ ॥

विषमे चौ चतुर्मात्रौ द्वौ गणौ लदलदान्तौ । समे पचौ पण्मात्र-चतुर्मात्रौ च लदलदान्तौ । ते यत्र भवतः सा मागधी । लदलदान्ताविति—ल इति लघुः, द इति मात्राद्वयम् । पुनर्लघुर्मात्राद्वयं चान्ते ययोस्तौ तथा । यथा—

"मधुसहचरीह पिकरमणी, नवसहकारविहारलालसा ।
त्रिजगज्जयिनो मनोभुवो, मङ्गलगीतौ भवति मागधी ॥ ६२.१ ॥

अत्र प्रथमपादे चौ पञ्च-पञ्चभेदौ । ल एकभेदः, दो द्विभेदः पुनर्ल एकभेदः, दो द्विभेदः । एषामन्योऽन्यताडने जातं शतम् । द्वितीयपादे पञ्चयोदशभेदः । चः पञ्चभेदः । ल एकभेदः । दो द्विभेदः । पुनर्ल एकभेदः । दो द्विभेदः । अन्योऽन्यताडने षट्यधिकशतद्वयम् । अस्य प्रथमपादविकल्पैस्ताडने जातानि षड्विंशतिः सहस्राणि पूर्वार्धे विकल्पाः । अपरार्धेऽप्येवम् । अन्योऽन्यताडने जाताः सप्तषष्टिः कोट्यः षष्टिलक्षाधिकाः ॥ ६२.१ ॥

---

1) विशालवंशादपि जातः सदा प्रकटयन्नतिमेकाम् । पदे मौगौ । 2) यथासंभवमित्यत्र आद्यवृत्ति-उदीच्यवृत्तिरुक्तयो यत्रेति । यतः आद्यवृत्तेर्भेदत्रयेषु प्रकाराणां सप्तदशलक्षिलक्ष्याभावाद् गो न भवति । उदीच्यवृत्तिलक्षणमेव पुनरभूत् । तस्या एवंविधमेव लक्षणस्य प्रतिपादित्वात् । 3) तुषारसंभारेत्यत्र हिमाचलसंबन्धिनीं दिशं प्रयोदुषाम् । मयूखवान् रविः । दक्षिणस्यां सरणिवर्तिनीं सरणिं मार्गम् । 4) मधुसहचरीत्यत्र पिकस्य मधौ कोकिला । नवसहकारविहारलालसा । मागधी मङ्गलगीतकर्त्री ।

---

1 मधूखवान् A. 2-2 एषामन्योन्य- to दो द्विभेदः (2nd) is dropped in N. 3 एवान्योन्य- C, अन्योन्यान्ते A. 4 चः dropped in A. 5 तावन्तश्चेत्य ACD.

ओजजा पश्चिमान्तिका ॥ ६३ ॥

मागधिकाया[1] ओजपादेन जनिता पश्चिमान्तिका। यथा—

"उदयं लब्ध्वा महीतले, सन्तापकरः कथं भवान्।
दिवसापगमेऽस्तकारिणी, तरणे तव पश्चिमान्तिका ॥ ६३.१ ॥

अत्र प्रथमपादविकल्पशतेन द्वितीयपादविकल्पशतं ताडितं जातानि दश सहस्राणि पूर्वार्धे। अपरार्धेऽप्येवम्। अन्योऽन्यताडनायां जाता दश कोट्यः ॥ ६३.१ ॥

युग्जोपहासिनी ॥ ६४ ॥

मागधिकायाः समपादैर्जनितोपहासिनी। यथा—

"वपुषेयं द्रुतहेमभासिनी, लोचनलक्ष्म्याम्बुजविलासिनी।
भ्रुवा मनसिजधनुःप्रकाशिनी, वदनरुचा चन्द्रोपहासिनी ॥ ६४.१ ॥

अत्र प्रथमपादविकल्पानां षट्यधिकशतद्वयेन द्वितीयपादविकल्पास्तावन्त एवाहताः। जातानि सप्तषष्टिः सहस्राणि षट्शताधिकानि पूर्वार्धे। अपरार्धेऽप्येवम्। अन्योऽन्यताडनायां "चत्वार्यब्जानि षट्पञ्चाशत्कोट्यः सप्तनवतिर्लक्षाः षष्टिः [2]सहस्राणि ॥६४.१॥

वैतालीयप्रकरणं त्रिंशत्॥

अजमुखश्चीर्गन्तो नवमे ले मात्रासमकम् ॥ ६५ ॥

न विद्यते जगणो मुखे यस्यासावजमुखः। चीरिति चत्वारश्चगणाः। गुर्वन्ताः। नवमे लघौ सति मात्रासमकम्। "तत्राद्ये चगणे चत्वारो विकल्पाः ऽऽ; ।।ऽ; ऽ।; ।।।; द्वितीये त्रयः ऽऽ; ।।ऽ; ऽ।; मध्यगुरुसर्वलघुविकल्पौ तु "विश्लोकेनापोदितत्वान्न भवतः। तृतीये एकः ।।ऽ; नवमे ले इति वचनादादिगुरुसर्वगुरू न भवतः। मध्यगुरुसर्वलघू तु "वानवासिकालक्षणेनापोदितौ। चतुर्थे द्वौ ऽऽ; ।।ऽ; गन्तत्वाभिधानादन्यविकल्पानामप्राप्तिः। अन्योऽन्यताडनायां प्रतिपादं चतुर्विंशतिर्भेदाः। चतसृणां चतुर्विंशतीनामन्योऽन्यताडनायां जातं तिस्रो लक्षाः एकत्रिंशत्सहस्राः सप्त शतानि षट्सप्तत्यधिकानि। यथा—

---

1) उदयं लब्ध्वेत्यत्र अन्योक्तिः। उदयं प्रतिष्ठां प्राप्य कथं भवान् संतापकृत्। किं तु इदं न जानासि तव विनाशकारिणी पश्चिमान्तिका अन्तिकप्रान्तावस्था। ततो भव्यं किमपि कुरु। अथवा पश्चिमा दिक् अन्तिका समीपस्था। 2) वपुषेत्यत्र द्रुत गलितम्। 3) चत्वार्यब्जानीति—कोटिशतसख्यमब्जम्। 4) तत्राद्ये गणे चत्वारो विकल्पा इति—जगणस्यचगणस्य वर्जितत्वात्। 5) विश्लोकेनेति—लौ पञ्चमाष्टमौ विश्लोकः। 6) वनवासिकालक्षणेनेति—द्वादशश्च वानवासिका। अयमर्थः—द्वादशश्चकारात्नवमश्च यत्र लघुर्भवति सा वानवासिका।

---

१ मागधिकायाः placed after जनिता in A. २ षष्टिसहस्राणि P. ३ आदिगुरुसर्वलघू N. ४ अपोदितत्वात् ACDN.

[1]"अद्यापि मधुः शिशुरेवायं, नो सज्जशरः कुसुमास्त्रोऽपि।
मा त्रासमुपाश्रय धीरास्त्वं, भावी क्षणतः प्रणतः सोऽपि ॥ ६५.१ ॥

ग्युपचित्रा ॥ ६६ ॥

अजमुखश्चीर्गन्तो नवमे गुरावुपचित्रा। अस्यां तृतीये चे[4] द्वौ विकल्पौ ऽऽ; ऽ॥; अन्ये चगणविकल्पाः प्राग्वत्। अन्योऽन्यताडनायां प्रतिपादमष्टाचत्वारिंशद्भेदाः। प्राग्वदन्योऽन्यताडनायां त्रिपञ्चाशल्लक्षाः चतुरशीतिः शतानि षोडशोत्तराणि। यथा—

[2]"शङ्खक्षोदरुचा तव कीर्त्या, लोकानां च त्वय्यनुरागैः।
कृष्णैश्चापयशोभिर्द्विषतां, दिशि दिशि जाता भूरुपचित्रा ॥ ६६.१ ॥

लौ पञ्चमाष्टमौ विश्लोकः ॥ ६७ ॥

यस्य पादे पञ्चमाष्टमौ लघू भवतः स विश्लोकः। अत्राद्ये चे चत्वारो विकल्पाः ऽऽ; ॥ऽ; ऽ॥; ॥॥; द्वितीये द्वौ ।ऽ।; ।॥।; तृतीये द्वौ ऽऽ; ऽ॥; गुरुमध्य-गुर्वन्त-सर्वलघु-गणत्रयं तु [3]"चित्रयापोदितम्। चतुर्थे गुर्वन्तं गणद्वयमेव ऽऽ; ॥ऽ; अन्योऽन्यताडनायां प्रतिपादं द्वात्रिंशद्भेदाः। प्राग्वदन्योऽन्यताडनायां दश लक्षा अष्टाचत्वारिंशत्सहस्राः पञ्च शतानि षट्सप्तत्यधिकानि। यथा—

[4]"यस्य न कुलमपि यो विश्लोकः, स्फुरति च मनसि न यस्य विवेकः।
येन न गुणविषये निहिता धीर्, जीवन्नपि स पुमानवसन्नः ॥ ६७.१ ॥

नवमश्च चित्रा ॥ ६८ ॥

नवमो लघुश्चकारात् पञ्चमाष्टमौ च यत्र भवतः सा चित्रा। आद्ये चे विकल्पाश्चत्वारः ऽऽ; ॥ऽ; ऽ॥; ॥॥; द्वितीये द्वौ ।ऽ।; ।॥।; तृतीये त्रयः ॥ऽ; ।ऽ।; ।॥।; चतुर्थे द्वौ ऽऽ; ॥ऽ; अन्योऽन्यताडनायां प्रतिपादमष्टाचत्वारिंशद्भेदाः। प्राग्वदन्योऽन्यताडनायामुपचित्रातुल्या संख्या। यथा—

[5]"नित्यं प्रतिगृहमपि विस्फूर्जेद्-, विद्रुममरकतकनकमयूखैः।
चित्रा नृप तव पुरि भवति द्यौः, प्रकटितबहुविधसुरधन्वेव ॥ ६८.१ ॥

द्वादशश्च वानवासिका ॥ ६९ ॥

द्वादशश्चकारान्नवमश्च यत्र लघुर्भवति सा वानवासिका। अत्राद्ये चे चत्वारः ऽऽ;

---

1) अद्यापि मधुरित्यत्र सत्र इति—पुष्पाभावात्। ऋतोस्त्रिस्रोऽवस्था वर्ण्यन्ते। शैशवं प्रौढिरनुवृत्तिरिति। भाग्यभावी भर्ता रष्टः। 2) शङ्खक्षोदरुचेत्यत्र उपचित्रेति—परस्परमुभयोः संयोगे उपचित्रता। चित्रमपि एकत्र कृष्णं श्वेतं च स्यात्। 3) चित्रयापोदितमित्यत्र चित्रायां हि नवमेन लघुनैव भवितव्यम्। 4) यस्य नेति—पुरुषस्येत्यध्याहारः। विश्लोकः कीर्तिरहितः। अवसन्नो मृतः। 5) नित्यं प्रतिगृहेत्यत्र चित्रा द्यौः पुनः। पक्षे आकाशं प्रकटितबहुविधेन्द्रधनुः।

---

१ उपाश्रय B; अपाश्रय CDR; २ धीरास्त्वं C. ३ प्रयतः N. ४ चे dropped in A. ५ ताडने P. ६ नुर्वे गान्तं P. ७ प्रतिगृहविस्फूर्जमपि जें० A.

।।ऽ; ऽ।; ।।।।; द्वितीये त्रयः ऽऽ; ।।ऽ; ऽ।; तृतीये द्वौ ।ऽ।; ।।।।; चतुर्थे द्वौ ऽऽ; ।।ऽ; अन्योऽन्यताडनायां प्रतिपादमष्टाचत्वारिंशत्। अन्योऽन्यताडनायां [1]"सैव संख्या। यथा—

[2]"सौरभपाण्डिममहिमविशेषान्-, नागरखण्डाधिकप्रमोदम्।
दधदधुना भूप गीयते ते, चारु यशो वानवासिकाभिः ॥ ६९.१ ॥

एभिः पादाकुलकम् ॥ ७० ॥

एभिः मात्रासमकादिपादैः रचितं पादाकुलकम्। तच्च द्विक-त्रिक-चतुष्कसंयोग-भेदात् पञ्चषष्टिभेदम्। तत्र द्विकसंयोगे मात्रासमकस्य त्रयः पादाः, उपचित्रादिचतुष्टय-स्यैकैकः इति चत्वारः। उपचित्रायास्त्रयः पादाः, मात्रासमकादिचतुष्टयस्यैकैकः इति चत्वारः। [3]विश्लोकस्य त्रयः पादाः, मात्रासमकादिचतुष्टयस्यैकैकः इति चत्वारः। चित्राया-स्त्रयः पादाः, मात्रासमकादिचतुष्टयस्यैकैकः इति चत्वारः। तथा वनवासिकायास्त्रयः पादाः, मात्रासमकादिचतुष्टयस्यैकैकः इति चत्वारः। मात्रासमकस्य द्वौ पादौ, उपचित्रायाः, विश्लोकस्य, चित्रायाः, वानवासिकायाश्च प्रत्येकं द्वाविति भेदाश्चत्वारः। मात्रासमकं हित्वा उपचित्रायाः द्वौ पादौ, विश्लोकस्य, चित्रायाः, वानवासिकायाश्च प्रत्येकं द्वाविति त्रयो भेदाः। मात्रासमकमुपचित्रां च हित्वा विश्लोकस्य द्वौ पादौ, चित्रायाः, वानवासिकायाश्च, प्रत्येकं द्वाविति द्वौ[4] भेदौ। मात्रासमकमुपचित्रां विश्लोकं च हित्वा चित्रायाः द्वौ पादौ वानवासिकायाश्च द्वावित्येकः। एवं त्रिंशत्। त्रिकसंयोगे मात्रासमकस्य द्वौ पादौ, उपचित्राविश्लोकयोः, उपचित्राचित्रयोः, उपचित्रावानवासिकयोः, विश्लोकचित्रयोः, विश्लोकवानवासिकयोः, चित्रावानवासिकयोः प्रत्येकं द्वाविति षड् भेदाः। उपचित्रायाः द्वौ पादौ, मात्रासमकविश्लोकयोः, मात्रासमकचित्रयोः, मात्रासमकवानवासिकयोः, विश्लो-कचित्रयोः, विश्लोकवानवासिकयोः, चित्रावानवासिकयोः प्रत्येकं द्वाविति षड् भेदाः। तथा विश्लोकस्य द्वौ पादौ,मात्रासमकोपचित्रयोः,मात्रासमकचित्रयोः,मात्रासमकवानवासिकयोः, उपचित्राचित्रयोः, उपचित्रावानवासिकयोः, चित्रावानवासिकयोश्च प्रत्येकं द्वाविति षड् भेदाः। चित्रायाः द्वौ पादौ, मात्रासमकोपचित्रयोः, मात्रासमकविश्लोकयोः, मात्रासमक-वानवासिकयोः, उपचित्राविश्लोकयोः, उपचित्रावानवासिकयोः, विश्लोकवानवासिकयोश्च प्रत्येकं द्वाविति षड् भेदाः। तथा [5]वानवासिकायाः द्वौ पादौ, मात्रासमकोपचित्रयोः, मात्रासमकविश्लोकयोः, मात्रासमकचित्रयोः, उपचित्राविश्लोकयोः, उपचित्राचित्रयोः,

---

1) सैव संख्येति—५३०८४१६। 2) सौरभेति-पाण्डिमा धवलत्वम्। नागेति—ताम्बूलीपत्रम्। वनवासे भवं वानवासं फलादि तद्विद्यते यासां ताभिः।

---

१ पण्डा॰ A. २ ते dropped in B. ३ मात्रासमादिपादै. CDN. ४ द्वित्रिचतुष्कसं॰ A. ५ उपचित्राचतु॰ N. ६ The sentence is dropped in A. ७ द्वौ dropped in A. ८ A reads मात्रासम for मात्रासमक in the whole passage. ९ N drops the word. १० Repeated in A. ११ वानवासिका द्वौ पादौ A.

विश्लोकचित्रयोश्च प्रत्येकं द्वाविति षड् भेदाः। एवं त्रिंशत्। चतुष्कसंयोगे एकैकपरिहारेण पञ्च। सर्वे मिलिताः पञ्चषष्टिः।

द्विजातिजा विकल्पाः स्युः, त्रिंशत्; त्रिंशत् त्रिजातिजाः।
चतुर्जातिभवाः पञ्च, पञ्चषष्टिरितीरिताः॥ ७०.१॥

इति संग्रहश्लोकः। एषां च पञ्चषष्टेर्भेदानां मध्यात् मात्रासमकस्य त्रयः पादाः, एकः उपचित्रायाः इत्येवंरूपस्य प्रथमभेदस्य संख्या यथा मात्रासमकपादत्रयभेदानां तिसृणां चतुर्विंशतीनां उपचित्रैकपादभेदानां चाष्टाचत्वारिंशतोऽन्योऽन्याभ्यासे जाताः षट् लक्षाः त्रिषष्टिः सहस्राणि पञ्च शतानि द्विपञ्चाशदधिकानि।

प्रथमभेदस्य च [2]लोष्टसंचारक्रमेण चातुर्विध्यम्। स्थापना — मा | मा | मा | उ
ततश्चतुर्भिर्गुणने जाताः षड्विंशतिर्लक्षाः चतुःपञ्चाशत्सहस्राः मा | मा | उ | मा
द्वे शते अष्टोत्तरे। एवं द्वितीयादिभेदेष्वप्यूह्यम्। मा | उ | मा | मा
उ | मा | मा | मा

तत्र मात्रासमैकस्य त्रिभिः पादैरुपचित्रायाश्चैकेन पादाकुलकं यथा —

[3]शशधरपादाकुलके गगने, कोकिलनादैर्मुखरे च वने।
मदने च जगज्जयनैकामे, पान्थ कथं गन्ता तदिहामे॥ ७०.२॥

मात्रासमैकस्य पादद्वयेन उपचित्रायाः एकेन विश्लोकस्य चैकेन यथा —

[4]जयिनि दिगन्ताद् भवति प्राप्ते, पौरस्त्रैणं त्वरितं नृपते।
विचरति सद्यः पादाकुलकं, मलयानिल इव [5]भृङ्गीकुलकम्॥ ७०.३॥

[6]मात्रासमकोपचित्राचित्रावानवासिकापादैर्यथा —

[7]वन्दितपादाकुलकैर्युसदाम्, अनुपममहिमश्रीधाम सदा।
सा वो वितरतु शिवमाकल्पम्, भारत्यनुदिनमसममनल्पम्॥ ७०.४॥

मात्रान्तरेष्वपि यथा —

[8]चंदुज्जोओ चंदणलेवो, कुवलयसेज्जा कमलुक्खेवो।
दाहिणमारुअओ कप्पूरं, अहिअं विरहे डहइ सरीरं॥ ७०.५॥

---

1) द्विजातिजेत्यत्र द्विकसंयोगभवेति भावः। 2) लोष्टसंचारक्रमेणेति—पूर्वं तावत् पादत्रयं मात्रासमकस्य पश्चादुपचित्रायाः एकः पादः। अनया रीत्या ज्ञेयम्। 3) शशधरेत्यत्र पादैः किरणैराकुलम्। स्वार्थे के पादाकुलकं तस्मिन्। 4) जयतीत्यत्र पादेति — क्रियाविशेषणम्। (पादैराकुलकं पादाकुलकं P.)। 5) भ्रमरीवृन्दम्। 6) मात्रासेति—प्रत्येकं पादो योज्यः। 7) वन्दितपादेत्यत्र आकल्पं युगान्तं यावत्। 8) चंदुज्जोउत्ति—चन्द्रोद्योतः चन्दनलेपः कुमुदशिष्यो(शय्या) कमलतालवृन्तं दक्षिणवायुः सिताम्रोऽधिकं दहति शरीरम्।

---

१ त्रिजातिजाः B. २ पाद dropped in B. ३ आद्यभेदस्य F. ४ गणने समस्य A. ६ अविकलं for अनुदिनं A (V.L) BPP. ७ लेओ लेओ B.

अथ चतुर्थोऽध्यायः ।

[1]चूगौ पष्ठो जो न्लौ वा पूर्वेऽर्धेऽपरे पष्ठो [2]लार्या गाथा ॥ १ ॥

नौजे जः इति वर्तते । चूगौ चगणसप्तकं गुरुश्चार्धे यस्याः सा आर्या । अत्रापवादः । पूर्वेऽर्धे पष्ठो जगणो न्लौ वा । अपरेऽर्धे[3] पष्ठो गणो लघुः कार्यः । अर्धग्रहणादार्यादिषु पादव्यवस्था नास्ति । [4]तेन 'द्वीपादन्यस्मादपि' इत्यादौ गणत्रयस्य [5]अन्ते [6]लघोर्गुरुत्वं न भवति । आर्यैव संस्कृतेतरभाषासु गाथासंज्ञेति गाथाग्रहणम् । अत्र पूर्वार्धे [7]प्रथमे चे विकल्पाश्चत्वारः । यथा—ऽ ऽ; ॥ ऽ; ऽ ॥; ॥॥; द्वितीये पञ्च ऽ ऽ; ॥ ऽ; । ऽ ।; ऽ ॥; ॥॥; तृतीये चत्वारः ऽ ऽ; ॥ ऽ; ऽ ॥; ॥॥; चतुर्थे पञ्च ऽ ऽ; ॥ ऽ; । ऽ ।; ऽ ॥; ॥॥; पञ्चमे चत्वारः ऽ ऽ; ॥ ऽ; ऽ ॥; ॥॥; षष्ठे द्वौ । ऽ ।; ॥॥; सप्तमे चत्वारः ऽ ऽ; ॥ ऽ; ऽ ॥; ॥॥; अष्टमे गुरुरेक एव । अन्योऽन्यताडनायां द्वादशसहस्राण्यष्टौ शतानि । एवमपरार्धेऽपि । नवरं षष्ठे लघुन्येकस्मिन्नेक एव विकल्पः । अन्योऽन्यताडनायां षट् सहस्राणि चत्वारि शतानि । उभयदलविकल्पताडनायां [8]अष्टौ कोटयः एकोनविंशतिर्लक्षाः विंशतिः सहस्राणि । यदाह—

जगणविहीना विषमे चत्वारः पञ्च युजि चतुर्मात्राः ।
द्वौ षष्ठाविति चगणास्तद्घातात् प्रथमदलसंख्या ॥ १.१ ॥
एवमपरार्धसंख्या षष्ठे स्याल्लघुनि चैकस्मिन् ।
आर्यासंख्योभयदलसंख्याघातात् विनिर्दिष्टा ॥ १.२ ॥

आर्या यथा—

[9]उपदिश्यते तव हितं यदि वाञ्छसि कुशलमात्मनो नित्यम् ।
मा जातु दुर्जनजनेष्वार्याचरितं प्रपद्यस्व ॥ १.३ ॥

प्राकृते यथा—

[10]कलसभवतवस्सिचुलुअपूरणमेत्ते[11] वि मुणिअमज्झाण ।
जलहीण कहं सरिसा सया अगाहा महप्पाणो ॥ १.४ ॥

अथ चतुर्थाध्यायस्य पर्यायाः प्रादुःक्रियन्ते । 1) चूगौ षष्ठो ज इत्यत्र चूगौ पूर्वार्धे पश्चार्धे च भवतः । पर परार्धे षष्ठचतुर्मात्रिकस्थाने एक एव लघुवर्णः कार्यः । एतावता मात्राश्च हीयन्ते अपरार्धे । ष इति—षष्ठमः स्वरः । 2) तेन द्वीपेत्यत्र द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् । आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः । अन्तात् प्रान्तात् । झटिति शीघ्रम् । अभिमत इष्टं समुखः सन् । 3) अन्ते गुरुत्वं नेति—वान्ते ग्वक इति सूत्रोक्तम् । 4) प्रथमे चे विकल्पाश्चत्वार इति—नौजे जः इति सूत्रादेव जगणस्य निषिद्धत्वात् । 5) उपदिश्येत्यत्र आर्याणां सरलानां आचरितम् । 'शठस्तु हठकर्मणा तुष्यति पादपीठे परम्' इति वचनात् । 6) कलसभवेत्यत्र महात्मना समुद्रोपमान न घटते यथा कुम्भजन्मतपस्विचुलुकमानमात्रेऽपि ज्ञातमध्यानां जलधीनां कथं सदृशा सदा अगाधा अप्राप्तपारा महात्मान. ।

---

१ पूर्वार्धे परे H, पूर्वेऽर्धे परे BN, पूर्वेऽर्धे अपरेऽर्धे A, पूर्वेऽर्धे अपरे P २ आर्या N. ३ परेऽर्धे N. ४ लघो dropped in P. ५ अष्टा N. ६ विंशतिसह० N. ७ तज्ज्ञाता ABCD. ८ मिते EF.

पैशाचिके यथा—

[1]पनमध पनयपकुप्पितगोलीचलैनग्गलग्गपतिबिंबं।
तससु नखतेप्पनेसुं पकाससतनुधलं लुइं ॥ १.५ ॥

एवमन्यभाषास्वप्युदाहार्यम् ॥ १.५ ॥

आर्याया वक्तव्यान्तरमाह—

षष्ठे न्ले लाद् द्वितीयात्सप्तमे त्वाद्यात्पदमन्यार्धे च पञ्चमे ॥ २ ॥

पूर्वार्धे षष्ठे गणे न्ले सति द्वितीयाल्लादारभ्य पदं भवति। षष्ठन्लगणस्य प्रथमे ले यतिरित्यर्थः। तथा सप्तमे न्ले आद्याल्लादारभ्य पदं भवति। षष्ठगणान्ते यतिरित्यर्थः। अन्यार्धे द्वितीयेऽर्धे पञ्चमे न्ले सत्याद्याल्लात्पदम्। चतुर्थगणान्ते यतिरित्यर्थः। यथा—

[2]चतुरम्बुराशिमुद्रितभूभारोद्धारचतुरभुजपरिघः।
एकाङ्गवीरतिलकः श्रीमानिह जयति सिद्धेशः ॥ २.१ ॥

आर्याया विशेषानाह—

आद्यचियतिः पथ्या ॥ ३ ॥

यस्या द्वयोरप्यर्धयोराद्यचगणत्रये यतिर्भवति सा पथ्या। यथा—

[3]नेपथ्यानि निरस्यति संत्रस्यति मत्तकोकिलानादात्।
निन्दति चेन्दुमयूखांस्त्वद्विरहे नः सखी सुभगा ॥ ३.१ ॥

विपुलान्याद्यन्तसर्वभेदात् त्रेधा ॥ ४ ॥

अन्या द्वयोरर्धयोराद्यचियतिरहिता विपुला। सा चाद्यन्तसर्वभेदात् त्रेधा। पूर्वार्धे चगणत्रययतिरहिता आदिविपुला। मुखविपुलेत्यर्थः। अपरार्धे अन्तेविपुला। जघनविपुलेत्यर्थः। द्वयोरप्यर्धयोः सर्वविपुला। महाविपुलेत्यर्थः। यथा—

[4]मुखविपुलाः पर्यन्ते च लघीयांसो भवन्ति नीचानाम्।
वर्षासु ग्रामपयःप्रवाहवेगा इव स्नेहाः ॥ ४.१ ॥

[5]नाभीनिम्ना कुचतटतुङ्गा जघनविपुलाथ मध्यकृशा।
भ्रूकुटिलाशयसरला च मानसं हरति सा बाला ॥ ४.२ ॥

---

1) पनमधेत्यत्र प्रणमत प्रणयप्रकुपितगौरीचरणाग्रलग्नप्रतिबिम्बं दशसु नखदर्पणेषु एकादशतनुधरं रुद्रम्। 2) चतुरम्बुधे(रे)ति [अत्र] मुद्रितः सहितः। पृथ्वीभारोद्धरणदक्षभुजार्गलः सिद्धेशः सिद्धराजः। 3) नेपथ्यानीति—कस्याश्चित् सख्यस्तद्गमणं प्रति कथयन्ति। निरस्यति निराकरोति। संत्रस्यति त्रासं भजति। चन्द्रकिरणान्। नोऽस्माकं सखी। 4) मुखविपुलाः पर्यन्ते चेत्यत्र नीचानां स्नेहा भवन्ति। क इव वर्षाकाले ग्रामजलप्रवाहवेगा इव। बहिःक्षेत्रेषु प्रवेशनात्। कथंभूताः। आदौ वृद्धाः प्रान्ते लघवः। 5) नाभीनिम्नेत्यत्र नाभौ निम्ना स्तनभागे उन्नता नितम्बे विशाला कटौ कृशा दुर्बला। भ्रूकुटिं लातीति भ्रूकुटिला भ्रुवो वक्रेति वा।

---

१ The word is dropped in A. २ पनयकुप्पत C. ३ चलणग्ग BB. ४ तप्पतेसुं B. ५ चायात् N. ६ आर्ये ले F. ७ मयूषान् B. ८ निधा N. ९ अन्त्यविपुला C. १० मुखविपुला AN.

"शब्दाभ्यासे रतिवल्लभस्य मन्थे खल्लरिका रम्या।
तव कमलदलाक्षि नितम्बभूमिरेषा महाविपुला ॥ ४.३ ॥

ग्मध्ये द्वितीयतुर्यौ जौ चपला ॥ ५ ॥

गुर्वोर्मध्ये द्वितीयतुर्यौ जगणौ यस्यां सा चपला। सा चाद्यन्तसर्वभेदात् त्रेधा। तत्र पूर्वार्धे आदिचपला मुखचपलेत्यर्थः। अपरार्धे अन्तचपला जघनचपलेत्यर्थः। द्वयोरप्यर्धयोः सर्वचपला महाचपलेत्यर्थः। तत्र पूर्वार्धे "प्रथमे चे द्वौ विकल्पौ-ऽऽ; ।।ऽ; द्वितीये एकः ।ऽ।; "तृतीयेऽप्येकः ऽऽ; चतुर्थेऽप्येकः ।ऽ।; "पञ्चमे द्वौ ऽऽ; ऽ।।; "षष्ठेऽपि[1] द्वौ ।ऽ।; ।।।।; "सप्तमे चत्वारः ऽऽ; ।।ऽ; ऽ।।; ।।।।; अष्टमे गुरुरेव। अन्योऽन्यताडनायां द्वात्रिंशत्। अपरार्धे षष्ठस्य लघोरेकत्वात् षोडशैव। उभयार्धताडनायां पञ्चशतानि द्वादशोत्तराणि सर्वचपलाविकल्पाः। मुखचपलायां पूर्वार्धविकल्पैर्द्वात्रिंशता अपरार्धचतुःषष्टिशतविकल्पानां ताडने द्वे लक्षे अष्टाचत्वारिंशच्छतानि। जघनचपलायां चापरार्धविकल्पैः षोडशभिः पूर्वार्धविकल्पानामष्टशताधिकद्वादशसहस्रसंख्यानां ताडने तावन्त एव विकल्पाः। तत्र पथ्यापूर्विका मुखचपला यथा—

"एकोऽपि बालचूतः शिखोद्गमैरभिनवैर्मनो दहति।
एतत्पुनरधिकं सखि कलकण्ठी तत्र मुखचपला ॥ ५.१ ॥

आदिविपुलापूर्विका मुखचपला यथा—

"मृदु वाच्य एष नेत्राक्षि वल्लभस्ते शठोऽन्यविवशमनाः।
तर्जय परुषैर्वचनैर्मुखचपलानामयं विषयः ॥ ५.२ ॥

अन्तर्विपुलापूर्विका मुखचपला यथा—

"दयितस्त्वयानुनीतो मया सखि त्वां किलानुनेष्यति सः।
तं पादानतमालोक्य मा कटु ब्रूहि मुखचपले ॥ ५.३ ॥

एवं सर्वविपुलापूर्विकायां मुखचपलायामुदाहार्यम्। पथ्यापूर्विका जघनचपला यथा—

---

1) शब्दाभ्यास इत्यत्र खल्लरिका श्रमयोग्या भूः। 2) प्रथमे चे द्वौ विकल्पाविति—यतो द्वितीयो जगणो गुरुद्वयमध्ये भवति गुर्वन्तौ च एतौ स्तः। जगणस्य तु ओजस्थानत्वान्निषेधः। 3) तृतीयेऽप्येक इत्यत्र ओजस्थानत्वात् जगणस्य निषेधः शेषाणां चतुर्णां गणानां मध्ये द्वयोर्गणयोरादौ लघुः [एकस्य चान्ते लघुः] तत एक एव सर्वगुरुरूपो अवशिष्यते। 4) पञ्चमे द्वाविति—अत्राप्योजस्थानत्वाज्जगणस्य निषेधः। द्वयोस्त्वाद्यो लघुः स्यात् ततो गणत्रयवर्जनम्। 5) षष्ठे द्वौ इति—षष्ठे स्थाने जन्लयोरेवानुशासत्वात्। 6) सप्तमे चत्वार इति—ओजस्थानत्वात् जगणो न। 7) एकोऽपि बालेत्यत्र कलकण्ठी कोकिला। मुखे वाचाला। 8) मृदु वाच्य एष इत्यत्र मृदु क्रियाविशेषणम्। अन्यासु विषये परस्मिन् मनो यस्यांत सः। या मुखे चपला वाचाला भवन्ति तासां गोचरः। 9) दयितस्त्वयेत्यत्र अनुनयं प्रापितः त्वा(त्वां) मानयिष्यति हे आस्यवाचाले।

---

१ महाचपला dropped in A. २ dropped in C. ३ अपि dropped in KP. ४ अपरार्द्ध N; अपरार्धेऽपि A. ५ उभयार्द्ध N. ६ अपरार्धे P. ७ ताड्नायां A. ८ अन्तर्विपुला यथा A.

[1]तस्या नितान्तचपलान् नेत्रविलासान् विलोक्य बालायाः ।
को वर्णयेदमुग्धः कुरङ्गिकादृष्टिललितानि ॥ ५.४ ॥

अन्तविपुलापूर्विका जघनचपला यथा—

[2]उद्दाममारुतहतध्वजघनचपलानि जीवितव्यानि ।
जानन् जनः कथं नाम जातुचित् प्रीयते तत्र ॥ ५.५ ॥

महाविपुलापूर्विका जघनचपला यथा—

कस्य कृते कृतपुण्यस्य दृष्टिरियमनिमिषा[1] त्वया ध्रियते ।
यासीत्पुरा कुरङ्गाक्षि नित्यमत्यन्तचपलैव ॥ ५.६ ॥

एवं मुखविपुलापूर्विका जघनचपलोदाहार्या । पथ्यापूर्विका महाचपला यथा—

[3]चपलं न कस्य चेतो नरस्य जायेत पश्यतस्तन्वीम् ।
नृत्येक्षणेऽत्र नव्याङ्गहार[2]लीलामहाचपलाम् ॥ ५.७ ॥

महाविपुलापूर्विका महाचपला यथा—

[4]युगपत्प्रफुल्लकङ्केल्लिमल्लिकाबकुलचम्पकान् दृष्ट्वा ।
जाता मधूत्सवे षट्पदावलीयं महाचपला ॥ ५.८ ॥

एवं मुखविपुलापूर्विका जघनविपुलापूर्विका च महाचपलोदाहार्या । [5]एवं गाथाप्युदाहार्या । एवं पथ्याभेदेनैकेन "विपुलाभेदैस्त्रिभिश्चपलाभेदैर्द्वादशभिः" षोडश भेदाः । [6]केचित्तु लघुत्रयादारभ्य द्विद्विलघुवृध्या कमलादीन् पञ्चत्रिंशतिभेदानाहुः । यथा—

कमला ललिआ सीला[3] जुण्हा[4] रंभा य मागही लच्छी ।
विज्जा माला हंसी ससिलेहा जण्हवी[5] सुद्धा ॥ ५.९ ॥
काली कमली मेहा सिद्धी रिद्धी अ कुम्मई धरणी[6] ।
जक्खी वीणा वंभी गंधव्वी मंजरी गोरी ॥ ५.१० ॥
कमला तिहि लहुएहिं ललिआ पंचेहिं पवमाईओ ।
विहिं विहिं वड्ढंतेहिं कमेण सेसाओ जाअंति ॥ ५.११ ॥

एतच्च गाथाप्रस्तारेष्वन्तर्भूतमिति न पृथग्लक्ष्यते । न च सर्वे प्रस्तारभेदाः शक्या उपदर्शयितुमित्यास्तामेतत् ॥ ५.११ ॥

---

1) तस्या नितान्तेत्यत्र अमुग्धो दक्षः । ललितानि क्रीडितानि । 2) उद्दाममारुतेत्यत्र प्रचण्डवात्याहतपताकामेघचञ्चलानि । नाम कोमलामन्त्रणे । कदाचित् प्रीणाति संसारे । 3) चपलं न कस्येत्यत्र तन्वीं कान्ताम् । नाट्यावसरे नवीनाङ्गविक्षेपमहाचञ्चलाम् । 4) युगपदिति—मधूत्सवे वसन्तावसरे । 5) एवं गाथेति—प्राकृतादिजा । 6) विपुलाभेदैस्त्रिभिरिति—मुखविपुला-जघनविपुला सर्वविपुला-भेदैः । 7) द्वादशभिरिति—यतो मुखचपला-जघनचपला—सर्वचपला—रूपेषु त्रिष्वपि भेदेषु प्रत्येकं पथ्या-मुखविपुला-जघनविपुला—सर्वविपुला—रूपाश्चत्वारो भेदा लभ्यन्ते ततो भवन्ति द्वादश । 8) केचित्तु लघुत्रयादिति—आर्याणां हि लघुत्रयेणावश्यं भाव्यम् । काली कुमा(म)रीत्यत्र कुमा(म)रीस्थाने कमली प्रत्यन्तरे ।

---

१ अनिमिषात् N. २ नृत्यक्षणेत्र N. ३ नव्याङ्गहार A. ४ मल्लिका ब० N. ५ लीला A. ६ जुन्हा F. ७ जन्हवी F. ८ कुमरी AFKP. ९ धरिणी F.

द्विः पूर्वार्धं गीतिः ॥ ६ ॥

द्वौ वारौ पूर्वार्धलक्षणं यस्यामार्यायां सा गीतिः। सा चैकः पथ्यायास्त्रयो विपुलाया द्वादश चपलाया विकल्पा इति षोडशधा। अत्र पूर्वार्धे द्वादश सहस्राण्यष्टौ शतानि विकल्पाः। अपरार्धेऽपि तावन्तः। अन्योऽन्यताडनायां षोडश कोट्यः अष्टात्रिंशल्लक्षाः चत्वारिंशत्सहस्राः विकल्पाः पथ्यागीतौ भवन्ति। विपुलागीतावपि त एव। सर्वचपलागीतौ पूर्वार्धे द्वात्रिंशद्विकल्पाः। अपरार्धेऽपि तावन्तः। अन्योऽन्यताडनायां चतुर्विंशत्यधिकानि दश शतानि। मुखचपलागीतौ पूर्वार्धे द्वात्रिंशद्विकल्पाः। अपरार्धे द्वादशसहस्राण्यष्टशताधिकानि। अन्योऽन्यताडनायां चतस्रो लक्षाः पण्णवतिः शतानि। जघनचपलायामप्येतावन्त एव। तत्र पथ्यागीतिर्यथा—

"विरचितकुसुमाभरणा तन्वाना गीतिमलिकुलनिनादैः।
अभ्यागच्छति चैत्रे वासकसज्जेव संप्रति वनश्रीः ॥ ६.१ ॥

महाविपुलागीतिर्यथा—

"मत्तद्विरेफपुंस्कोकिलैर्वेतालिकमहाविपुलगीत्या।
क्रियते निर्भरमुन्निद्र एष यूनां मनःसु मनसिशयः ॥ ६.२ ॥

पथ्यामहाचपलागीतिर्यथा—

"यावद्धुनामि चूताङ्कुरान्पुरोऽस्या मधुं व्यपहोतुम्।
तावद्बभूव गीतिः पिकाङ्गनानां प्रमोदचपलानाम् ॥ ६.३ ॥

महाविपुलामहाचपलागीतिर्यथा—

कष्टां[2] जनस्त्वदालोकनादपि क्षणमिमां दशां लभते।
विपुलां तनोपि दीर्घाक्षि गीतिमेवां कुतो महाचपले ॥ ६.४ ॥

एवं शेषभेदेषु द्वादशस्वप्युदाहार्यम् ॥ ६.४ ॥

परार्धमुपगीतिः ॥ ७ ॥

द्विः परार्धलक्षणं यत्र भवति सा आर्योपगीतिः[4]। इयमपि पूर्ववत् षोडशभेदा। तत्र पथ्योपगीतौ पूर्वार्धे चतुःषष्टिशतानि विकल्पाः। अपरार्धेऽपि तावन्तः। अन्योऽन्यताडनायां चतस्रः कोट्यो नव लक्षाः षष्टिः सहस्राणि। विपुलोपगीतावपि तावन्त एव।

1) विरचितेत्यत्र भर्तरि समागते आत्मानं अलंकरोति। (see p. 103 n. 2). 2) मत्तद्विरेफेत्यत्र पुरुषवत् प्रगल्भवचाः कोकिलः पुंस्कोकिल उच्यते। 3) यावद्धुनामीत्यत्र काचिद्विरहिणी वसन्तागमे वसन्तं विनाशयितुं [प्रवृत्ता आह]—वसन्ते कन्दर्पसद्भाव इति हेतोः कन्दर्पशस्त्रदेवत्वं चूताङ्कुरान् हे सखि यावद्धुनामि तावत्कोकिलानां ध्वनिः प्रादुर्भूतः। किं करोमि इति भावः। यद्वा चूताङ्कुरा हि मधोरवतारे भवन्ति ततश्च यदि छिनद्मि तदेषा विरहिणी वसन्तागमं न जानातीति भावः।

१ अपरार्धे तु P. २ पुष्कोकिल P. ३ काष्टां जन. A; कष्टाजन. N. ४ उपगीति N. ५ षोडशभेदाः N. ६ त एव B.

महाचपलोपगीतौ पूर्वार्धे षोडश। अपरार्धेऽपि तावन्तः। अन्योऽन्यताडनायां षट्पञ्चाशदधिके द्वे शते। मुखचपलोपगीतौ पूर्वार्धे षोडश विकल्पाः। अपरार्धे चतुःषष्टिः[1] शतानि। अन्योऽन्यताडनायां लक्षमेकं चतुर्विंशतिः[2] शतानि। जघनचपलोपगीतावपि तावन्त एव। तत्र पथ्योपगीतिर्यथा—

[1]उपगीति कुरङ्गशिशो मा गाः श्रुतिसुखलवस्पृहया।
व्याधं किमिति न पश्यसि चापन्यस्तेषुमिह पुरतः॥ ७.१॥

महाविपुलोपगीतिर्यथा—

[2]संप्रति शिलीमुखाः पश्य महाविपुलोपगीतिरवैः।
सौखप्रसुप्तिकाः[3] पङ्कजिनीः प्रीत्योपतिष्ठन्ते॥ ७.२॥

पथ्यामहाचपलोपगीतिर्यथा—

[3]उपगीतिगन्धरूपादि याति चेतो महाचपलम्।
तेभ्यो निवर्तयैतत् समीहसे चेत् परां सिद्धिम्॥ ७.३॥

महाविपुलामहाचपलोपगीतिर्यथा—

[4]चूताङ्कुराः स्मरास्त्राणि चापलात्कोकिलैर्लीढाः।
विपुलोपगीतयोऽस्त्राणि तेनिरे तेन तैस्तस्य॥ ७.४॥

एवं शेषभेदेषु द्वादशस्वप्युदाहार्यम्॥ ७.४॥

द्वयोर्व्यत्यये उद्गीतिः॥ ८॥

आर्यायाः द्वयोः पूर्वार्धपरार्धयोर्विपर्यये उद्गीतिः। इयमपि पूर्ववत् षोडशधा पथ्यावच्च तदुद्गीतिषु विकल्पा वाच्याः। तत्र पथ्योद्गीतिर्यथा—

वीरवरेण्य रणमुखे श्रुत्वा तव सिंहनादमिह।
सपदि भवन्त्यरिकरिणो मधुव्रतोद्गीतिरिक्तगण्डतटाः॥ ८.१॥

महाविपुलोद्गीतिर्यथा—

[5]विपुलोद्गीतिः कलकोकिलारवैः पल्लवाताम्रा।
मत्तेव पुरस्तरुपङ्क्तिरियं मधुपरिचयादितो भाति॥ ८.२॥

---

1) उपगीति कुरङ्गेत्यत्र गीतिर्गानं तस्याः समीपं उपगीति। अव्ययीभावसमासः। मा गाः मा गच्छेः। व्याधं लुब्धकं धनुर्न्यस्तबाणम्। 2) संप्रति शिलीत्यादि—शिलीमुखा भ्रमराः। सुख प्रसुप्तं सुखप्रसुप्तं तद्विद्यते यासां ताः पृच्छती(न्ती)ति भावः। 3) उपगीतिगन्धरूपादीत्यत्र गीत्यादयः पञ्च विषयास्तेषां समीपे। 4) चूताङ्कुरा इत्यत्र आम्राङ्कुराः कन्दर्पबाणाः यद्यास्वादितास्तर्हि तस्यापरे बाणा विलोक्यन्ते इत्याह। तेन कारणेन तैः कोकिलैस्तस्य कन्दर्पस्य अस्त्राणि विपुलोपगीतयः तेनिरे कृता इत्यर्थः। 5) विपुलोद्गीतिरित्यत्र मधुश्चैत्रमासो मद्यं च। इतः पार्थे।

---

१ चतुःषष्टिशतानि AP. २ चतुर्विंशतिशतानि ACP. ३ सौखप्रसुप्तिका AB. ४ महा dropped in B. ५ महाविपुलोपगीतिः A.

पथ्यामहाचपलोद्गीतिर्यथा—

[1]"चपले प्रयातु मानादयं वराकः किमाह्वयसि।
प्रतिभूरसुप्य भूयः समागमे भाविनी पिकोद्गीतिः॥ ८.३॥

महाविपुलामहाचपलोद्गीतिर्यथा—

[2]"बाला कुतोऽपि सारङ्गिकेव सा विपुलचपलाक्षी।
श्रुत्वा तवाभिधोद्गीतिमाशु [3]"निष्पन्दिनी चिरं भवति॥ ८.४॥

एवं शेषेषु द्वादशसु भेदेष्वप्युदाहार्यम्। तत्रायं संग्रहः—

[4]"एकैव भवति पथ्या तिस्रो विपुलास्ततश्चतस्रस्ताः।
चपलाभेदैस्त्रिभिरपि भिन्ना इति षोडशार्याः स्युः॥ ८.५॥
गीतीनां त्रयमित्थं प्रत्येकं षोडशप्रकारं स्यात्।
साकल्येनार्याणामिमा विकल्पाश्चतुःषष्टिः॥ ८.६॥

गीतिः सप्तमे पे रिपुच्छन्दाः॥ ९॥

गीतिरेव सप्तमे पे पञ्चमात्रे गणे रिपुच्छन्दाः। अतः परं प्राकृतादौ छन्दसां भूम्ना प्रयोग इति तत्रैवोदाहरिष्यते। यथा—

[5]"केलाससेलतुलणामाणं मा वहसु संपयं दसमुह।
उअ हरिपुच्छंदोलणतोलिज्जंते महोअहिम्मि गिरिणो॥ ९.१॥

अत्र पगणस्याष्टभेदत्वेऽपि 'नौजे जः' इति जगणानुविद्धभेदद्वयवर्जनात् षड् भेदाः। ततस्तेषां शेषगणविकल्पानां चान्योऽन्यताडनायां पूर्वार्धे जाता एकोनविंशतिः सहस्राणि द्वे शते। तावद्भिरेवोत्तरार्धविकल्पैर्घाते जाताः षट्त्रिंशत्कोट्यः षडशीतिर्लक्षाश्चत्वारिंशत्सहस्राणि॥ ९.१॥

तृतीये ललिता॥ १०॥

गीतिरेव तृतीये पे ललिता। यथा—

[6]"अंगुलिआहिं ललिअंगी पवासदिअहे गणंतिआणुदिणम्।
वल्लहआयड्ढणकए जवइव मंतक्खराइं एंकमणा॥ १०.१॥

अत्र तृतीयपगणस्य षड्विकल्पत्वे प्राग्वत्तावन्त एव भेदाः॥ १०.१॥

---

1) चपले प्रयात्वित्यत्र वराकः क्लीबः। एनं व्रजन्तं मा निषेधय। आकारयसि। 2) बाला कुतोऽपीत्यत्र कान्ता हरिणीव भवति। अभिधायाः नाम्नः उद्गीतिः भणनं पद्ये गानम्। 3) निश्चला। 4) एकैव भवतीत्यत्र चतस्र इति—पथ्या १ विपुला ३। भिन्ना इति प्रत्येकं योज्यम्। 5) कैलाससेलेत्यत्र हे दशमुख कैलासपर्वततोलनात् मानं मा वह सांप्रतं पश्य हरयो वानरा अथवाऽनेयस्तेषां तस्य वा पुच्छान्दोलनेन पर्वताः क्षोल्यन्ते समुद्रे। 6) अंगुलिआहिंत्ति—वल्लभाकर्षणकृते एकमना इयम्। इवोत्प्रेक्षणे। अनुदिनं अङ्गुलिकाभिर्मन्त्राक्षराणि। गणयंति(न्ती) वल्लभकथितदिवसगणनव्याजतः। जपतीव।

---

१ तवाभिधो॰ N. २ निष्पन्दिनीं N; नि स्पन्दिनी P. ३ कैलाससैल N; कैलाससेल KP. ४ घुलणा S. ५ महोअहंमि O. ६ अन्योऽन्यताडने A; अन्योऽन्यहतौ E. ७ अथ प्रायः प्राकृते तृ॰ O. ८ आयड्ढकए ADGE. ९ इक्कमणा E.

द्वाभ्यां भद्रिका ॥ ११ ॥

गीतिरेव द्वाभ्यां सप्तमतृतीयपगणाभ्यां भद्रिका। यथा—

[1]जुवईण नयणलच्छीए सहजसलोणत्तणेण भद्दिआए।
चक्खुभएण व दिण्णयं लक्खिज्जइ कज्जलं वयंसिआहिं ॥ ११.१ ॥

अत्र तृतीयसप्तमपगणयोः षट् षट् भेदास्ततस्तेषामन्यविकल्पानां चान्योऽन्यघाते जाता अष्टाविंशतिः सहस्राणि अष्टौ शतानि पूर्वार्धे। तेषां तावद्भिरेवोत्तरार्धविकल्पैर्घाते जाता द्व्यशीतिः कोट्यश्चतुर्नवतिर्लक्षाश्चत्वारिंशत्सहस्राः ॥ ११.१ ॥

षष्ठं विनेष्टपैर्विचित्रा ॥ १२ ॥

गीतिरेव [2]षष्ठगणं विना यथेष्टं पगणैर्निबद्धा विचित्रा। यथा—

[3]भासासु विचित्तासु जुगवं सुरनरतिरिआण जीवजाईण[3]।
संवादमणुहवंती जयइ वाणी भयवओ जिणिंदस्स ॥ १२.१ ॥

विचित्रभेदत्वादस्या विकल्पसंख्या नोक्ता। केचित्सर्वैरपि पगणैरिच्छन्ति ॥१२.१॥

चेऽष्टमे स्कन्धकम् ॥ १३ ॥

गीतिरेवाष्टमस्य गुरोः स्थाने चगणे कृते स्कन्धकम्। आर्यागीतिरित्यहीन्द्रः। अत्र गीत्यर्धविकल्पानामष्टमचगणविकल्पपञ्चकेन ताडने जाताश्चतुःषष्टिः सहस्राः पूर्वार्धे। तावद्भिरेवोत्तरार्धविकल्पैस्ताडने जातानि चत्वारिंशदर्बुदानि नव कोट्यः षष्टिर्लक्षाणि। यथा—

[4]तुह रिउरायपुरेसुं तरुणीजणलालिअम्मि [5]किंकेल्लिवणे।
संपइ अरण्णमहिसाण खंधकंडूअणं पयट्टेइ दढम् ॥ १३.१ ॥

केचित्तु लघुचतुष्टयादारभ्य लघुद्व्यद्व्यवृद्ध्या ब्रह्मादीनि स्कन्धकान्याहुः। यथा—

बंभो हीरो कण्हो रामो चंदो पुरंदरो मेरू।
धम्मो सेलो भाणू जक्खो वण्ही अ मायंगो ॥ १३.२ ॥
कालो हरी कुबेरो सालो सुवणो सुदंसणो खंदो।
नीरं सिही सुवण्णो मेहो[6] पंको अ कल्हारो ॥ १३.३ ॥

---

1) जुवईणेत्यत्र नयनलक्ष्म्याः। 'एदौतौ पदान्ते प्राकृते ह्रस्वौ वा' (छं० १.९) इति ह्रस्वत्वं ज्ञेयम्। सहजसलवणत्वेन प्रशस्याया चक्षुभएण। इवोत्प्रेक्षते—दृष्टिदोषविघाताय वयस्याभिः सखीभिर्दत्तं कज्जलम्। 2) षष्ठगणं विना यथेष्टमिति—यादृशाः पगणाः रोचन्ते तादृशाः क्षेप्याः यत्र तत्र वा। चगणानां मध्ये पुनः षष्ठं चगणं वर्जयित्वा। 3) भासासु विचित्तासुत्ति—भाषासु विचित्रासु युगपत् सुरनरतिरश्चां जीवजातीनां संवदनं संवादस्तं अनुभवन्ती जयति सर्वोत्कृष्टत्वेन प्रवर्त्तते वाणी भगवतो जिनेन्द्रस्य। भा १ वि २ सु ३ पञ्चमात्राः। सु १ ति २ ण ३ चगणाः। ज० पगणः। 4) तुह रिउरायेति—तव रिपुराजपुरेषु तरुणीजनलालिते कंकेल्लिवने। सांप्रतं तत्र वने वनमहिषाणां स्कन्धकण्डूयनं प्रवर्त्तत इति भावः।

---

१ चक्खुम्भएण दिन्नं E. २ प dropped in N. ३ जीवजाईणं A. ४ भगवओ E. ५ गीतेरर्ध० P. ६ कंकेल्लिवणे ABEKP; किंकिल्लवणे S. ७ पयट्टेइ NS. ८ पण्ही N. ९ मोहो S.

हेरंवो भीणो[1] वेण्णो[2] लहुमेएहिं सुहय नामाइं।
एआइं साहिआइं पउणतीसाण[3] संघाणं ॥ १३.४ ॥
चउलहुएहिं[4] बंभो, हीरो छहिं, अट्ठहिं तहा कण्हो।
विहिं विहिं[5] वट्टंतेहिं[6] कमेण सेसाण[7] नामाइं ॥ १३.५ ॥

एतच्च स्कन्धकप्रस्तारेष्वन्तर्भूतमिति न पृथग् लक्ष्यते। एवं भेदपरिकल्पने ह्यतिप्रसङ्गः स्यादिति ॥ १३.५ ॥

[10]तत्पष्ठे ल्युपात् ॥ १४ ॥

तत्स्कन्धकमर्धद्वयेऽपि षष्ठे गणे एकस्मिन्नेव लघौ सति उपात्परं स्कन्धकमुपस्कन्धकमित्यर्थः। यथा—

[11]उअ संधाहअत्तुट्टंतबाहुदंडो वि को वि सुहडओ।
एसो सहि परजोहं पहरइ पाएण दट्ठोहरओ[9] ॥ १४.१ ॥

अत्र षष्ठस्य गणस्य लघुत्वेनैकत्वात्[10]पूर्वार्धे द्वात्रिंशत्सहस्रास्तावद्भिरेवापरार्धविकल्पैस्ताडने जातानि दशार्बुदानि द्वे कोट्यौ चत्वारिंशल्लक्षाः ॥ १४.१ ॥

आद्येऽर्धे उदः ॥ १५ ॥

आद्येऽर्धे षष्ठे लि उदः परं स्कन्धकं उत्स्कन्धकमित्यर्थः। यथा—

[12]जा बलमंडप्फरेण[13] निवाण उक्खंधया आसि पुरा।
सा तुह सासणभारं ताण वहंताण संपयं कह वि गया ॥ १५.१ ॥

अत्र पूर्वार्धविकल्पानां द्वात्रिंशत्सहस्राणामपरार्धविकल्पैश्चतुःषष्टिसहस्रैर्घाते जातानि विंशतिरर्बुदानि[14] चतस्रः कोट्योऽशीतिर्लक्षाः ॥ १५.१ ॥

अन्त्येऽवात् ॥ १६ ॥

अन्त्येऽर्धे षष्ठे लि अवात्परं स्कन्धकमवस्कन्धकमित्यर्थः। यथा[15]—

[16]पवणपहल्लिरपल्लवघयवडमुल्लसिअकोइलावंदिरवं[17]।
ओ संधावारं चिअ पेच्छ[18] वणं रइवइनरिंदस्स ॥ १६.१ ॥

पूर्ववद्विकल्पाः ॥ १६.१ ॥

---

1) 'तत्पष्ठे ल्युपात्' इति सूत्रे षष्ठचरणस्थाने एकस्मिन्नेव लघुन्यक्षरे सतीति भावार्थः। 2) उअ संधाहय(इ)त्ति—पश्य स्कन्धाहतित्रुट्यद्बाहुदण्डोऽपि सुभटः एष परयोधं प्रहरति पादेन रोषेण दष्टाधरकः। 3) जा बलेत्यत्र या बलदर्पेण नृपाणां ऊर्ध्वस्कन्धता आसीत् पूर्वं सा तवाज्ञाभार तेषां वहतां साम्प्रत कुत्रापि गता। 4) विंशतिरर्बुदानीत्यादि २०४०००००००। दशकोटिभिरेकमर्बुदं भवति। 5) पवणपहल्लिरेत्यत्र पहल्लिरेति—कम्पनशीलवाचको देश्यः। घ्वजपटम्। ओ सूचनायाम्। कटकमिव पश्य वनं कन्दर्पनरेन्द्रस्य।

---

१ भीणो AEN; भीणो C. २ वण्णे N. ३ एऊण० B; पऊण N. ४ विहुलहु० A. ५ विहु विहु A. ६ वट्टंतेहिं AD; वट्टंतेहिं N. ७ सेसाइं A. ८ भेदविकल्पने P. ९ दट्ठाहरओ N. १० पूर्वार्धद्वात्रिं० N. ११ मप्फुरेणं S. १२ स्कन्धमि० B. १३ यथा dropped in P. १४ उत्सर्गय S. १५ पिच्छ ABE; पच्छ DN.

गीतिस्कन्धके संकीर्णम् ॥ १७ ॥

पूर्वार्धे स्कन्धकमपरार्धे गीतिः यद्वा पूर्वार्धे गीतिरपरार्धे स्कन्धकमित्युभयथापि संकीर्णं[1] नाम स्कन्धकम् । यथा—

[2]जह जह [3]तुह पहु सेन्नं किज्जइ [4]संकिण्णयं मयगलघडाहिं ।
तह तह रिउरायघरेसु खलइ लच्छि त्ति पेच्छ अच्छरिअं ॥ १७.१ ॥

[5]सा बाला तुह [6]विरहे हिअए संकिण्णए अमंताइं ।
नीसासधूमलहरिच्छलेण दुक्खाइं सुहय उव्वमइ फुडं ॥ १७.२ ॥

[7]अत्र स्कन्धकार्धविकल्पानां गीत्यर्धविकल्पैर्घाते भङ्गद्वयेऽपि प्रत्येकं जाता एकाशीतिः कोट्यो द्विनवतिर्लक्षाः ॥ १७.२ ॥

गाथार्धेऽन्त्यगात्प्राक् चो वृद्धौ जातीफलम् ॥ १८ ॥

गाथैव [8]पूर्वार्धेऽन्त्याद् गुरोः प्राक् चगणस्य वृद्धौ [9]जातीफलम् । उत्तरार्धं तु गाथाया एव । यथा—

[10]तुह रिउणो निव्वसंता [11]अविरलजाईहलेसु जलहितडवणेसु ।
वणवाससुहसइण्हा [12]न रज्जमीहंति सिविणे[13] वि ॥ १८.१ ॥

चयोर्गाथः ॥ १९ ॥

गाथैव पूर्वार्धेऽन्त्यगात् प्राक् चगणद्वयस्य वृद्धौ गाथः । यथा—

[14]गोरीइ[15] चिहुरभारो जलगाहोत्तिण्णिआइ निवडंतथोरबिंदूहिं[16] ।
विअलिअपसूणमालाविरहदुहेणं रुएइव्व ॥ १९.१ ॥

अत्राष्टमश्चगणः पञ्चभेदो नवमो 'नोजे जः' इति चतुर्भेदोऽन्योन्याहतौ विंशतिः । तथा आर्याविकल्पानां[17] गुणने जातमब्जमेकं त्रिषष्टिः कोट्यश्चतुरशीतिर्लक्षाः । एवमुद्-

---

1) जह जहेत्यत्र हे प्रभो यथा यथा हस्तिघटाभिः तव सैन्यं संकीर्णं क्रियते तथा तथा रिपुगृहेषु लक्ष्मीः स्खलति स्खलनं प्राप्नोति अर्थात् भ्रश्यति । अन्यत्र सकीर्णं अन्यत्र स्खलतीति पश्याश्चर्यम् । संकीर्णस्थाने स्खलने किमपि नाश्चर्यं भवति । 2) सा बालेत्यत्र सा स्त्री तव विरहे हृदये संकीर्णके अमान्ति मानाधिका(क्या)त् निःश्वासधूमलहरीकपटेन दुःखानि उद्गमति सुभग स्फुटम् । 3) अत्र स्कन्धकार्धेत्यत्र ६४००० । गीत्यर्धेति १२८०० । घाते गुणने । ८१९२०००००० । 4) जातीफलमित्यत्र अत्राष्टमश्चगणः पञ्चभेदस्तेनार्याभेदानां ८१९२०००० गुणने चत्वारि अर्बुदानि पण्णवतिर्लक्षाः । स्थापना यथा ४०९६०००००० । एष जातीफलस्य प्रस्तारः । 5) तुह रिउणो इत्यत्र राजन् जातीफलाकीर्णेषु समुद्रतटेषु निवसन्तस्तथा च वनवाससुखे 'सहण्हा' इति सतृष्णाः सोत्कण्ठा इति यावत् राज्यं स्वप्नेऽपि नेहन्ते इति भावः । 6) गौरी[ए] इति—गौर्याः चिकुरभारः जलगाहोत्तीर्णायाः निपतत्स्थूलबिन्दुभिः विगलितप्रसूनमालाविरहदुःखेन रुदतीव ।

---

१ स्कन्धमप० B. २ सकीर्णकं B. ३ पहु तुह P. ४ किज्वइ S. ५ मच्छरिअं A. ६ विरहो S. ७ लहरी N. ८ दुक्खाइं S. ९ स्कन्धकार्धे वि० P. १० आद्यार्धेऽन्त्या० E. ११ निवसतो N. १२ सइण्हा AE. १३ सुविणे वि AB. १४ गौरीए KN. १५ गाहोतिण्णि० DP. १६ थोरबिंदूहिं CDN. १७ रुयइव्व CS. १८ चतुर्विंशतिः A. १९ भेदानां E.

गाथादिष्वपि। वर्द्धमानचगणद्वयविकल्पैर्विंशत्या पूर्वपूर्वविकल्पानां ताडने विकल्पसंख्या उन्नेयाः॥ १९.१॥

क्रमवृद्ध्योद्व्यवसमुपात्॥ २०॥

गाथात्परं क्रमेण चगणद्वयवृद्ध्या उद्-वि-अव-सम्-उप-परो गाथो भवति। उद्गाथ-विगाथ-अवगाथ-संगाथ-उपगाथा इत्यर्थः। [1]उद्गाथो यथा—

[2]सिरिवद्धमाणजिणवर उग्गाहंतो सुराहिवो तुज्झ अइसयसिरिं परूढरोमंचो।
अहिलसइ मुहसहस्सं ठाणे दिट्ठीसहस्सस्स॥ २०.१॥

[3]विगाथो यथा—

[4]सिरिकुमरवालभूवइ अज्जवि भुअचरिअवण्णणं तुज्झ जो किर
करेउमिच्छइ कुसग्गतिक्खबुद्धी वि।
वाहाहिं सो विगाहिउमिच्छइ रयणायरं सयलं॥ २०.२॥

[5]अवगाथो यथा—

[6]सो जयइ अजलठाणं वायागुंफो पुराणसुकईण को वि अन्नो
व्विअ सरिनाहो अकलिअमज्झो सया वि विबुहेहिं।
जो अवगाहिज्जंतो निरंतरं देइ अमयरसं॥ २०.३॥

[7]संगाथो यथा—

[8]नहकोलस्स व दाढा तिक्खसुरुप्पं व जलणउत्तिण्णमणंग-
महाभडस्स किंसुअवतंसउ व्व पुरहूअवल्लहदिसाइ एत्ताहे।
कणयपिसंगी हरिणंकलेहिआ सहइ उअयंती॥ २०.४॥

[9]उपगाथो यथा—

---

1) उद्गाथो यथेति—अत्र पूर्वविधिना गुणने भेदाः ३२७६८०००००। 2) सिरिवद्धमाणत्ति—उद्गाहमानः स्तुवन्निित्यर्थः। इन्द्रस्तव अतिशयलक्ष्मीं उत्पन्नरोमाञ्चकञ्चुकः। अभिलषते मुखसहस्रं स्थाने दृष्टिसहस्रस्य। 3) विगाथो यथेत्यत्र भेदाः ६५५३६०००००००। 4) सिरिकुमरेत्यत्र अद्यापि तवचरितवर्णनं तव यः पुमान् किल कर्तुमिच्छति कुशाग्रतीक्ष्णबुद्ध्या बाहाभिः स पुमान् विगाहितुं वाञ्छति रत्नाकर सकलम्। 5) अवगाथो यथेति—अत्र भेदाः १३१०७२०००००००। 6) सो जयइत्ति—स जयति अजाद्यस्थानं अजलस्थानं [वा]। वाग्गुम्फः पुराणकवीनां कोऽपि अन्य एव सरित्नाथः समुद्रः। यः अवगाह्यमानः सन्। कैः देवैः सुधाभिश्च। अमृतरसं अमृतं पक्षे शृङ्गारादयो रसा उच्यन्ते। 7) संगाथो यथेति—अत्र भेदाः २६२१४४०००००००००। 8) नहकोलस्स येत्यत्र आकाशवराहस्य। इवोत्प्रेक्षते। दंष्ट्रा अथवा तीक्ष्णं क्षुरप्रं अर्धचन्द्राकारं लोहमयं बाणं अग्निमध्याद्विर्गतं कन्दर्पमहाभटस्य। अथवा पूर्वदिग्वध्वाः किंशुकप्रकरं इत्युत्प्रेक्षते। कुर्वती मृगाङ्कलेखा कनकवल्लीवा शोभते। पीतरक्तयोरैक्यं कविसमये। उदयन्ती। 9) उपगाथो यथेति—अत्र भेदाः ५२४२८८०००००००००।

---

१ भेदै-भेदानां F. २ उग्गाहंतो AP. ३ करेइमि० A. ४ बुद्धीइ K. ५ बाहाहि B. ६ अजल-ठाणं P; अजलट्ठाणं N. ७ अज्जो विअ AS; अज्जु चिय P. ८ सरिणाहो A. ९ सुरप्पं व A; सुरप्पं च S. १० उत्तिण S. ११. पुरहूअ BC. १२ पिसंगी A. १३ हरिणंगले० A.

[1]समरमहोअहिमुब्भडकरिमयरं [2]उच्छलंतरुहिरसलिलमसिवर-
दाढिआइ सहसत्ति मेइणिं उद्धरंतओ महिहराण
आकंपणाइं विरइंतो।
[3]उअ गाहइ चोलुक्कस्स आइकोलु व्व भुअदंडो ॥ २०.५ ॥

गाथिनी ॥ २१ ॥

उपगाथाच्चगणद्वयवृद्ध्या गाथिनी। यथा—

[4]सिरिमूलरायभूवइकुलगयणमिअंक तिहुंअणललाम जयसिरि-
निवास जसभरभरिअदिअंत रिउभडकयंत निवकुमरवाल
भणिमो अइगहिराइं कहं तुज्झ चरिआइं।
सयलगुणगाहिणी जस्स न किर चउवयणवाणी वि ॥ २१.१ ॥

यथेष्टं मालागाथः ॥ २२ ॥

गाथिन्याः परं यथेष्टं चगणद्वयवृद्ध्या मालागाथः। यथा—

[5]इह माला गाहाण व वयंस पेच्छसु नवंबुवाहाण गयणविउल-
सरवरम्मि विमुक्कघोरघोसाण विज्जुजीहाविहीसणाण
वहलवारिनिचयपमंचिराण अइदीहगत्ताण।
इद्धी गसइ मयंकं खेलंतं रायहंसं व ॥ २२.१ ॥

जातीफलाद्यर्धं गाथवद् दामादयः ॥ २३ ॥

जातीफलस्य प्रथमेऽर्धेऽन्त्यगात्प्राक् क्रमेण चगणद्वयवृद्ध्या दामादयो भवन्ति। गाथवदिति यथा गाथः केवल उद्-वि-अव-सम्-उपात् परो, मत्वर्थीयान्तो, मालायाश्च पर उक्तस्तथायमपि। तत्र दामो यथा—

[6]जूहाउ व वूहाओ कड्ढिअ चोलुक्कराइणा [7]दरिअवेरिभूवमयगलाण।
कंठे पाएसु तहा ओ दीसइ घल्लिअं दाम ॥ २३.१ ॥

---

1) समरमहोअहित्ति—हे राजन् तव भुजदण्डः आदिवराह इव संग्रामसमुद्रमवगाहते। कथंभूतं समुद्रम्। उद्भटकरिरूपा मकरा यत्र तं, पुनः रुधिरमेव सलिलं यत्र, पुनः खड्ग एव दंष्ट्रा यत्र। किं कुर्वन्। उद्धरन्मेदिनीं सहसा। पुनः किं कुर्वन्। पर्वतानां राज्ञां च आकम्पनानि। 2) सिरिमूलरायत्ति—श्रीमूलराज भूपतिकुलगगनमृगाङ्क हे त्रिभुवनललाम जयश्रीनिवास यशोभरभरितदिगन्त रिपुभटकृतान्त हे नृप कुमारपाल यस्य ब्रह्मणः चतुर्वदनजापि वाणी तव चरित्राणि वक्तुं न समर्थेति वयं [कथं] भणामः। अ[इ]गहिराइत्ति—[अ]प्रकटानि। 3) इह माला गाहाणत्ति—ग्राहाणामिव क्रूरजलचरजीवानामित्यर्थः। हे वयस्य प्रेक्षस्व नूतनमेघमाला गगनरूपसरसि क्रीडन्तं चन्द्ररूपं राजहंसम्। इद्धीति—हा धिक्। ग्रसते बहलजलनिकरेण मन्दगमनशीलानाम्। विभक्तयत्र पक्षद्वये समासः कार्यः मन्थरगतीत्रि(ना)मिति भावः। 4) जूहाउचेत्यत्र। राज्ञां यूथादिव कटरचनामध्यात् भाग्यस्य उत्कटवैरिभूपरूपहस्तिनां कण्ठे पादे क्षिप्तं दृश्यते बन्धनम्। ओ सूचनायाम्।

---

1 All mss. and N. read मयरमुच्छ० against metre; P seems to read मयरमुरुच्छ०. 2 दाढिआइ S. 3 विरयंतो ANP. 4 ओ S. 5 चोलुक्कस्स आइ dropped in A. 6 मियंग A; मयंक P. 7 विहूअण AD. 8 कह dropped in C. 9 गाहिनी S. 10 पणचिराण NS. 11 मयंगं A; portion from मयंकं to the end of २३.५ not photographed in P. 12 दामाद्याः स्युः P. 13 जहालव० N. 14 रायणा A. 15 दरिआ वेरि० S; दलियवेरि AC. 16 भूत N.

उद्दामो यथा—

[1]"चालुक्क तुज्झ नयरी उद्दामसुरालयाण सिहरेसु पवणतरलेहिं दीहरधयवडकरेहिं।
देइ चविलापहारं किल कलिणो ओअरंतस्स ॥ २३.२ ॥

विदामो यथा—

[2]"सिरिकुमरपाल मुच्चसि सरमालं जत्थ जत्थ सुहडम्मि
तत्थ तत्थ अणुमग्गलग्गो सयंवरकए सहस त्ति।
मेल्लइ सुरकुसुममयं सुरजुअइजणो वि दाम नवं ॥ २३.३ ॥

अवदामो यथा—

[3]"ओ दामाइं रयंतीइ तीइ कामस्स पूअणनिमित्तमिह तुह समागमूसवं
तद्दिअहमहिलसंतीए नवकुवलयच्छीए।
कुसुमसमिद्धिविरहिअं उज्जाणं निम्मिअं सयलं ॥ २३.४ ॥

संदामो यथा—

[4]"अणुरयणि चंदकिरणप्फंसप्पसरंतचंदकंतसिलानीसंदामयरस-
सिंचिज्जमाणतरुतलनिसण्णरइकेलिखिन्नविज्जाहरमिहुणो।
जिणचरणरयपवित्तो रेहइ सिरिउज्जयंतगिरी ॥ २३.५ ॥

उपदामो यथा—

[5]"सिरिमूलराय भूवइकुलगयणमिअंके तुह दिसजयम्मि दुद्धरतुरंगखुर-
पुडुक्खायमेइणीवहलधूलिपडलेण पंकिलिज्जंतसायरसलिलसयणिज्जे।
[6]उअ दामोअरमेण्हिं[7]" लच्छी अइदुक्करं रमइ ॥ २३.६ ॥

---

1) चौलुक्येत्यत्र चौलुक्य तव नगरी उद्दाममुरालयानां शिखरेषु पवनतरलैः दीर्घध्वजपटकैः ददाति चपेटाप्रहारं किल कलेरवतरतः। 2) सिरिकुमरपाल हे राजन् यत्र यत्र त्वं शरमालां मुञ्चसि यस्मिन्सुभटे तत्र तत्र अनुलग्नः सुरीजनोऽपि कुसुमदाम मुञ्चति। 3) ओ दामाइं इति—ओ सूचनायाम्। रच[य]न्त्या तया कामपूजनकृते तव समागमोत्सवं च(मे)लनदिवसानभिलषन्त्या नवकुवलयाक्ष्या कुसुम-समृद्धिवि[र]हितं उद्यानं निर्मितं सकलम्। 4) अणुरयणित्ति—अनुदिनं चन्द्रकिरणस्पर्शात् प्रसरच्चन्द्रकान्त-शिलातो निष्यन्दामृतरसेन सिच्यमानतरुतले निषण्णरतिकेलिपि(रि)तविद्याधरमिथुनानि यत्र सः। जिनक्रम-रजःपवित्रः राजते श्री उज्जयन्तगिरिः। 5) सिरिमूलरायत्ति—हे श्रीमूलराज भूपतिकुलगगनभृगाङ्क तव दिग्जये उत्कटतुपार(तुरंग)खुरपुटोत्खातमेदिनीप्रभूतरजःपटलेन कर्दमीभवत्सागरशयनीये दामोदरसमीपे इदानीं लक्ष्मीः कष्टेन रमते।

---

१ चालुक्क BD; चौलुक्क K; चालक्क N. २ कुमरपाल AES. ३ मिल्लइ D. ४ फुंस A; फुस N. ५ खिन्न-सहरमि० S; खिन्नविज्जाहरमि० A. ६ चलण S. ७ भूअइ B. ८ नयंक CDN. ९ दिसिज०D. १० पुडुक्खाइ D; पडुक्खाय D; पुडुक्खाय S; पुडुरक्खाय N. ११ उव ADP. १२ मिण्हि AD. १३ दुक्खरं A. १४ रमइ A.

दामिनी यथा—

[1]सिरिसिद्धरायनंदण तुमयं आयंतमिक्खिउं झत्ति धाविरीए[2] इमाइ
पज्जाउलत्तवससिढिलवद्धगंठि ल्हसिऊण
रमणत्थलाउ[3] चरणग्गएसु रइअ[4]घणावेढम् ।
मणिकंचिदाम निम्मिअगइखलणं[5] दामिणी होइ ॥ २३.७ ॥

मालादामो यथा—

[6]हंहो जुआणय तुमं मा उज्जाणम्मि भमसु[7] भुल्लो वि अन्नहा इत्थ फुल्लिअ-
नवल्लमल्लिआवचयकोउअपरायणाण[8] मयभिंभलाण
कंदप्पविब्भमुब्भासिआण पोढ[9]महिलिआण ।
दूसहकडक्खमालादामिअहिअओ न नीहरसि ॥ २३.८ ॥

[11]इदानीं मात्राच्छन्दसां गुरुलघुपरिज्ञानार्थमाह—

[10]मात्रा वर्णोना गो[12] वर्णा गूना लः ॥ २४ ॥

यस्य कस्यापि मात्राच्छन्दसो यावत्यो मात्रा [13]भवन्ति ता वर्णोना अक्षरैरूना गुरवो ज्ञात[14]व्याः । [15]तथा वर्णा गुरुभिरूना लघवो ज्ञातव्याः । तत्रायमुपयोगः । [16]यदा कश्चित्पृच्छति अष्टात्रिंशदक्षरा[17]यां कति गुरवः कति वा लघव इति—तदा "सप्तपञ्चाशति शास्त्रोपदिष्टायामार्यामात्रासंख्यायामष्टात्रिंशतं वर्णसंख्यामपनयेत् [18]अत्र येऽवशिष्यन्ते तान्गु[19]रूनुपदिशेत् । ते चैकोनविंशतिः । वर्णेभ्यश्च गुरून्पातयित्वा शे[20]षानेकोनविंशतिं लघूनुपदिशेत् । यथा—

---

1) सिरिसिद्धरायनंदणेत्यत्र हे कुमारपाल त्वां आयान्तं ईक्षितुं शीघ्रं धावमानायाः अस्याः पर्याकुलत्व-वशात् शिथिलीभूतबद्धग्रन्थितः स्रंसित्वा ल्हसिऊण ह्रादिवर्जनात् पूर्वोऽत्र गुरुर्न भवति । रमणत्थलाउत्ति—जघनस्थलात् । यदनेकार्थसंग्रहः—'रमणं पुनः । पट्टोलमूले जघने रमणो रासभे प्रिये' इति । सांप्रतं चरणाग्रतो रचितघनावेष्टं यथा स्यात्तथा रचितगतिस्खलना दामिनी पशुबन्धनरज्जुर्भवतीति । 2) हं हो जुआणयत्ति—भो भो युवन् उद्याने मा भ्रम । भुल्लो देश्योऽज्ञातार्थे । यदि च गमिष्यसि तदात्र पुष्पितनूतनमल्लिकापचयने [स]कुतुकानां मदविह्वलानां कन्दर्पविभ्रमोद्भासितानां प्रौढमहेलिकानां दुःसहकटाक्षश्रेणिविद्धहृदयः सन् न निस्सरसि । न बहिरागमिष्यसीति भावः । 3) मात्रा वर्णोना इति—गो गुरवो [लो] लघवः । तथा वर्णा निवक्षिताक्षराणि । 4) सप्तपञ्चाशतीत्यत्र आर्या-पथ्या-विपुला-चपलादेः पूर्वार्द्धे ७ चरणा गुरुश्च तस्य मात्राद्वयं विवक्ष्यते ततो ३० मात्राः । अपरार्द्धे तु षष्ठस्य लघुत्वात् ३ हानौ २७ मात्राः । ततो द्वयोर्मीलने ५७ भवन्ति । जयति विजितेत्यत्र आकस्मिकं भयं त्रासः । पद्ये रलान्तवर्ती दोषः । यमिते सति यमकसहिते (इत्यार्या-प्रकरणम्) ।

---

१ उक्खियं B. २ धाविरीइ AB. ३ थलाओ D. ४ रइअ० CN. ५ निमियगइ A. ६ भवसु S. ७ मल्लिआचय S. ८ कोऊअ S. ९ विब्भाविआण S; १० उपोढम० N; पोढमहिलाण A. ११ अथ P. १२ गा N. १३ स्युः P. १४ ज्ञेयाः P. १५ तथा to ज्ञातव्या dropped in P. १६ यथा P. १७ P adds आर्यायां. Portion from आर्यामात्रासं० to तुङ्ग विरहे in २५-१ is not photographed in P. १८ तत्र A. १९ ते गुरवः P. २० शेषाः. १९ लघवः P.

जयति विजितान्यतेजाः सुरासुराधीशसेवितः श्रीमान्।
विमलस्त्रासविरहितत्रिलोकचिन्तामणिर्वीरः ॥ २४.१ ॥ इति ॥

आर्यामकरणम्।

*

पौ चौ तौ गलितकं यमितेंऽह्रौ ॥ २५ ॥

द्वौ पञ्चमात्रौ द्वौ चतुर्मात्रावेकस्त्रिमात्रो गणो गलितकम्। अंह्रौ पादे यमिते सति। तगणो यद्यपि वर्णगणोऽप्यस्ति तथापि मात्रागणसमभिव्याहारादिह मात्रागणो गृह्यते। एवमन्यत्रापि। यथा—

[1]"गलिअंजणधवले वहइ नयणपंकए,
सुहय चयइ कालागुरुचंदणपंकए।
सहीअणअप्पिअं दलइ[2] चिअ निद्दयं[3],
सा तुह विरहे मालइदाम विणिद्दयं ॥ २५.१ ॥

तृतीये षष्ठे ल्युपात् ॥ २६ ॥

यमितेंऽह्रौ तृतीये षष्ठे च "[4]लघुन्युपात्। उपगलितकमित्यर्थः। यथा—

[5]"तुह विजयपयाणयभेरीरवडंबरं,
झत्ति निसुणिऊण पडिरवमुहलिअंबरं।
सज्झसेण पकंपिरस्स हरिणो करओ,
उअ गलिअमिमं खु धणुहं धरए सरओ ॥ २६.१ ॥

समेऽन्तरात् ॥ २७ ॥

"[7]समेंऽह्रौ यमितेऽन्तरात्। अन्तरगलितकमित्यर्थः। यथा—

[8]"उअ वयंस वित्थरिअमहूसवलच्छिअं,
रणरणंतभसलावलिअं वणराइअं[9]।

---

1) गलिअंजणेत्यत्र। निरन्तराश्रुपातादगलिताञ्जने सती धवले वहति नयनपङ्कजे सुभग त्यजति कृष्णागुरुचन्दनयोः पङ्कं विलेपनार्हं कर्दमम्। सखीजनार्पितं चूर्णयति निर्दयं सा तव विरहे मालतीदाम। विनिद्रकं विकसितम्। 2) लघुन्युपादिति—प्रतिपादं लघुन्यक्षरे कृते सति। 3) तुह विजयेत्यत्र तव विजयप्रयाणभेरीशब्दाडम्बर शीघ्रं श्रुत्वा प्रतिरवमुखरिताम्बरसाध्वसेन भयेन प्रकम्पमानस्य इन्द्रस्य कराद् पश्य गलितं इदम्। सुशब्दो निश्चये पादपूरणे च। धनुः धरति शरद्। 4) समेंऽह्राविति—गणा. पूर्ववत्। यमिते सयमके। 5) उअ वयंसेत्यत्र पश्य हे वयस्ये विस्तृतवसन्तोत्सवलक्ष्मीकां रणरणद्भ्रमरावलिकां वनराजिकां कवलितचिरोत्पन्नमनस्विनीमानिकां फुल्लगच्छिकुसुमान्तरगलित्परागिकाम्।

---

१ तौ DN. २ दलइ विअ S. ३ विद्दयं BCDNP. ४ मुहरियंबरं P. ५ सज्झसेण A. ६ धरइ H. ७ समे पादेऽन्तरात् H. ८ नधूसव E. ९ वणराइअ A.

कवलिअचिरपरूढमाणंसिणिमाणिअं[1],
फुल्लवल्लिकुसुमंतरगलिअपराइअं ॥ २७.१ ॥

अन्ये तु प्रथमचतुर्थयोः पादयोर्यमनेऽन्तरगलितकमाहुः। यथा—

"पत्तलच्छि सुहयं जणमोहपयासयं,
गलिअनिद्दइंदीवरपत्तसहोअरं।
सहइ तुज्झ एअं तं लोअणजुअलयं,
पत्तलच्छि सुहयंजणेमोहपयासयं ॥ २७.२ ॥

पौ चौ पो वेः ॥ २८ ॥

द्वौ पञ्चमात्रौ द्वौ चतुर्मात्रौ एकः पञ्चमात्रश्चेद् यमितेऽन्हौ [2]वेर्गलितकम्। विगलितकमित्यर्थः। यथा—

"उअ महुसमओ मिउकुरिअमलयपवमाणओ,
विगलिअचिरपरूढमाणंसिणिजणमाणओ।
कोइलाहिं कयकलगीईहिं गिज्जमाणओ,
वम्महस्स विजयम्मि सहाओ असमाणओ ॥ २८.१ ॥

चौ पः समः ॥ २९ ॥

द्वौ चतुर्मात्रौ पञ्चमात्रश्चैको यमितेऽन्हौ समः परं गलितकम्। संगलितकमित्यर्थः। यथा—

"वणफलमरसं गलिअयं,
जरस य निव्वुइदाययं।
तस्स सया वणवासिणो,
किं वण्णामि महेसिणो ॥ २९.१ ॥

पतीगाः शुभात् ॥ ३० ॥

एकः पण्मात्रः चत्वारस्त्रिमात्राः गुरुश्च यमितेऽन्हौ शुभाद् गलितकम्। शुभगलितकमित्यर्थः। यथा—

---

1) पत्तलच्छि इत्यत्र पत्रलाक्षि सुखदं जनानां मोहपदं निष्फलव्यापारलक्षस्थानम्। अथवा जनानां मोहपदं मोहव्यापारलक्षस्याश्रयम्। गलितनिद्रेन्दीवरपत्रतुल्यं शोभने तव पृथुलोचनयुगलकम्। भासा लक्ष्म्यैव। सभीकमित्यर्थः। सुभगाज्ञानमयमूलप्रकाशकम्। अथवा सुभगाज्ञानस्य मोहपदे निष्फलपदे भासकं स्थासकम्। 2) उअ मधुसमयत्र पश्य मधुसमयोऽस्ति मृदुस्फुरितमलयपवमानो विगलितचिरप्ररूढमनस्विनीमानकः कोकिलाभिः कृतकलगीतिभिः गीयमानः कन्दर्पस्य विजये सहायः। असमानो निरुपमः। 3) वनफलं नीरसं भूमिपतितं यस्य च निर्वृतिदायकं सन्मोदितम्। तस्य सदा वनवासिनः किं वर्णयामि महर्षेः।

---

१ मानभं B. २ पुनरिह "पएवं A. ३ यमितेऽन्तर० कमित्याहुर्यथा A. ४ गलितनिद्रेन्दीवर A; गलितनिद्रभे इंदी० D. ५ Portion from जनमोह० to सभगत्ति in १२ com. is not photographed in P. ६ भेदे। गलितकं पेलपिचरः भागलिच्चकरणमतेः P.। ७ सहाउ B. ८ वनफलमरस० M. ९ निर्वृतिदायं D.

"पुणरवि निअरज्जसिरिसुहगलिआसया,
पव्वयकंदरेसु निवसंतया सया।
पहु तुह रिउणो धरंतया मुणिव्वयं,
पुणो पुणो वि हु उवालहंति दिव्वयं ॥ ३०.१ ॥

चः पौ चौ तः समात् ॥ ३१ ॥

एकश्चतुर्मात्रो द्वौ पञ्चमात्रौ द्वौ चतुर्मात्रौ एकस्त्रिमात्रोऽन्ही यमितेः समाद् गलितकम्। समगलितकमित्यर्थः। यथा—

"दुद्धरवारिवुट्ठिघोरा चलविज्जुलभीसणा,
सेलगुहंतरालपडिसद्दिअदुगुणिअनीसणा।
जाव समुत्थरंति मेहा पिहिअंबरदेसया,
पहिआ ताव हुंति जंबूफलसम गलिआसया ॥ ३१.१ ॥

तदोजे चतौ मुखात् ॥ ३२ ॥

तदेव समगलितकमोजपादयोः चगणतगणौ चेत्तदा मुखाद् गलितकम्। मुखगलितकमित्यर्थः। यथा—

"सयवत्तयं,
मुहगलिअमहुकरसुरहिअजलमलिसयवत्तयं।
तमणंगेओ,
चावम्मि ठवेविणु कस्स व न हु हंतं मणं गओ ॥ ३२.१ ॥

पाचृनौजे जः समे जो लीर्वा मालायाः ॥ ३३ ॥

षण्मात्राद् गणात्परे दश चगणा न विषमे जः समे जो "लघुचतुष्टयं वा यमितेऽन्ही मालाया गलितकम्। मालागलितकमित्यर्थः ॥ यथा—

---

1) पुणरवित्ति—पुनरपि। निजराज्यश्रीसुखगलिताशयाः पर्वतकन्दरेषु निवसन्तः सदा हे प्रभो तव रिपवो धरन्तः मुनिव्रतं पुनः पुनर्निश्चयेन उपालभन्ते दैवम्। 2) दुद्धरवारित्ति—दुर्द्धरवारिवृष्टिघोराः चलविद्युन्नीषणाः शैलगुहान्तरालप्रतिशब्दितद्विगुणितनिःस्वनाः यावद्विस्तरन्ति मेघाः पिहिताम्बरदेशकाः पथिकास्तावद्भवन्ति जम्बूफलसमगलिताशाकाः। जम्बूफलानां समाः सन्तः गलिता आशा यान्हा येषां पक्वे गलितानि क्षयितानि आशयानि येषां नष्टमध्यानि। तदा हि तानि क्षय्यन्ते। अथवा जम्बूफलसमा अत एव गलिता पतिता आशा येषाम्। वर्षाकालेन जम्बूफलानि पतन्ति। 3) सयवत्तयमित्यत्र शतपत्रकं मुखगलितमकरन्दौघसुरभितजलं अलीनां शतानि तेषां वर्तकं जीवकम्। तदनङ्गः चापे सस्थाप्य कस्य न हु निश्चितं हन्ति मनो गतः। 4) लघुचतुष्टयं वेति—पादचतुष्टयेऽपि विषमस्थाने तृतीयपञ्चमसप्तमनवमैकादशलक्षणे जगणो न स्यात्। तथा समे द्वितीयचतुर्थषष्ठाष्टमदशमलक्षणे जगणो लघुचतुष्टयं वा भवति सर्वेषु पादेषु।

---

१ सिरिसुह° N; —सुहगलियआसया A. २ निवसतवा सया B; सया dropped in B. ३ त्रिः N. ४ वुट्टि B; वुड्डि N. ५ पिहिहिअवर A. ६ पहिआ° N; पहिअतोव हुंति A. ७ गलिअआसया A. ८ सुहगलियं महु° A; सुहगलिअमहु° D. ९ तमणं गओ N. १० हंति CE.

[1]खेलिरकामिणीकराहयअविरलविअसिअजलरुहमालागलिअपरायसुरहिअसलिलयं,
तरलतरंगरंगपरिनच्चिरकलहंसमिहुणावलिसरहसकिज्जमाणकलयलकलिलयं ।
अब्भंलिहतडपरिरूढवहलवउलतिलयतमालतालीवणपडिहयखरदिणयरकरयं,
पिच्छ सरोवरं इममणारयं पि विज्जाहरसुरवरकिन्नराण एकं विलासहरयं ॥ ३३.१ ॥

चूर्गन्तो मुग्धात् ॥ ३४ ॥

षगणात्परे अष्टौ चगणा गुर्वन्ताः । नौजे जः समे जो लीर्वा यमितेऽहौ मुग्धाद् गलितकम् । मुग्धगलितकमित्यर्थः । चूः इत्यस्य गन्तत्वेन विशेषणादन्त्यश्चगणो गुर्वन्तो लभ्यते । न तु पृथगेव गुरुः । अन्यथा चूगाविति कुर्यात् । यथा—

[2]नमिरसुरासुरिंदसिरेरयणमउडरुइभरकरंविअचरणकमलनहमणि,
सयलतिलोअलोअणविहुरणमोहंधयारनिअरविहडणनहमणिं ।
न नवसि जइ जुआइजिणइंदममलकेवलसिरिकुलहरमिह भवभयहणणं,
ता वयंस तुह रयणं चिअ कराउ मुद्ध गलिअं किर विहलमिदं खु जणणं ॥ ३४.१ ॥

चूरुग्रात् ॥ ३५ ॥

षात्परे षट् चगणा गन्ताः । नौजे जः समे जो लीर्वा यमितेऽहौ उग्राद् गलितकम् । उग्रगलितकमित्यर्थः ॥ यथा—

[3]निम्मलनाणदिट्ठिअवलोइअभुवणयलं विसुद्धचित्तं,
उग्गगलिअसमग्गकम्मं निरवहिनाणरइअजगचित्तं ।
वीरं संभरामि तारणतरंडयं समपसन्नसोहं,
पंडिओ दुत्तरस्स भवसायरस्स लहरीभरम्मि सोहं ॥ ३५.१ ॥

---

1) खेलिरकामिणीत्यत्र क्रीडनशीलकामिनीकराभिहताविरलविकसितजलरुहमालागलितपरागसुरभितसलिलकम् । तरलतरङ्गेण परिवर्तनशीलहंसमिथुनावलीना सरभस क्रियमाण कलकलशब्दविशेषस्तेन कलिलकम् । अभ्रंलिहतटाभिरूढबहलबकुलतिलकतमालतालीवनेन प्रतिहतकठिनदिनकरकरा यत्र । स्वार्थे के करकम् । पश्य सरोवर इद अनारत विद्याधरसुरकिन्नराणा एक विलासगृहम् । 2) नमिरसुरेत्यत्र नम्रसुरासुरेन्द्रशिरोरत्नमुकुटरुचिभरकम्बितमिश्रितक्रमकजनखमणिं सकलत्रिलोकलोचनानां पीडनशीलमोहान्धकारनिकरविघट्टने नभोमणिं सूर्यम् । न नमसि । रुदनमोर्वे इति मस्य व । यदि युगादिजिनेन्द्र अमलकेवलश्रीकुलगृह भवभयहननं तत् वयस्य तव रत्न एव कारात् हे मुग्ध गलित किल विफलमिद निश्चित जननम् । 3) निम्मलनाणेत्यत्र निर्मलज्ञानदृष्ट्यवलोकितभुवनतल विशुद्धचित्तम् । उग्र सत् गलित समग्रं कर्म यस्मात् । निरवधिज्ञानरचितजगचित्र जगच्छब्देन जगस्था जना गृह्यन्ते आधाराधेययोरभेदोपचारात् । वीर चरमजिन स्मरामि तारणयानपात्रम् । सर्वप्राणिषु समा मध्यस्था अत एव प्रसन्ना शोभा यस्य । अथवा शमेन उपशमेन प्रसन्ना । पतितः दुस्तरस्य भवसागरस्य लहरीभरे सोऽहम् ।

---

१ जलरुहे S २ सुरदिअ S, सुरहिअ B. ३ परिणचिर A. ४ सयसहस्सकि० S, सरहकि० A. ५ वहलबहुल S. ६ दिणयरकय S. ७ एकं A, एव V. ८ अन्त्यथो गान्तो न तु P. ९ सिरिरयण C. १० चलण P. ११ लोअ dropped in DAV, विहुरण V, विहरण B १२ निअर dropped in D. १३ जिणयदममल BP, मलकेवल to 38 com. dropped in P. १४ हरण S. १५ गलितसुम० A. १६ निर्मल A. १७ भुवणलय B. १८ समग्र DP, समग्ग N. १९ उरंदयसम० A. २० पडिओ CM. १९ छन्दो०

पौ तः सुन्दरा ॥ ३६ ॥

द्वौ पञ्चमात्रौ त्रिमात्रश्चैको यमितेंऽह्रौ सुन्दरा नाम गलितकम्। नौजे जः समे जो लीर्वेति निवृत्तम्। यथा—

[1]नरवरिंद तुह कित्तिआ,
कत्थ कत्थ न पहुत्तिआ।
भरिअगयणमहिकंदरा,
कुंदसंखससिसुंदरा ॥ ३६.१ ॥

पौ तौ भूषणा ॥ ३७ ॥

[2]द्वौ पञ्चमात्रौ द्वौ त्रिमात्रौ यमितेंऽह्रौ भूषणा नाम गलितकम्। यथा—

[3]पिच्छे पीवरमहापओहरा,
कस्स कस्स न वयंस मणहरा।
विप्फुरंतसुरचावकंठिआ,
भूसणा नहसिरी उवट्ठिआ ॥ ३७.१ ॥

चपचापचाल्गा मालागलिता ॥ ३८ ॥

चतुर्मात्रः पञ्चमात्रः चतुर्मात्रद्वयं पञ्चमात्रः चतुर्मात्रद्वयं लघुगुरू चैं मालागलिता। यथा—

[4]न मुणिज्जइ गलाउ रयणमाला गलिइआ न गणिज्जइ भग्गओ,
मणिवलयनिअरो न य जाणिज्जइ अंसुअंचलो वि हु विलग्गओ।
चौलुक्कुलंबरदिणमणि तुह अवलोअणनिमित्तधावंतिहिं,
मयरद्धयबाणघोरणिविद्धहिअइहि नारिहि हरिसिज्जंतिहि ॥ ३८.१ ॥

पञ्चीः समे जो लीर्वा विलम्बिता ॥ ३९ ॥

एकः पण्मात्रश्चतुष्टयं च। तथा समे स्थाने जगणो लघुचतुष्टयं वांह्रौ यमिते विलम्बितागलितकम्। यथा—

---

1) नरवरिंदेत्यत्र हे नरवरेन्द्र तव कीर्तिः कुत्र कुत्र न प्राप्ता भूतगगनमहा(ही)गुहा कुन्दशङ्खशशिसुन्दरी। 2) द्वौ त्रिमात्रौ इत्यत्र अत्र तावत् *तगणद्वयस्य स्थाने पगण. ऽऽ॥ एवंविधः क्षेप्यते तदा तगणद्वयव्यवहारो न भवति। अतः पृथग्ग्रहणम्। एवमन्यत्रापि ज्ञेयम्।* 3) पिच्छ पीवेत्यत्र पश्य पीवरमहापयोधरा कस्य कस्य न हे वयस्य मनोहरा विस्फुरत्सुरचापकण्ठिकाभूषणा नभसः श्रावणमासस्य गगनस्य च श्रीः सा उपस्थिता प्रकटिता। 4) *न मुणिज्जइ गलाउत्ति—न ज्ञायते गलात् रत्नमाला गलिता न गण्यते भग्नोऽपि* मणिवलयनिकरो न च ज्ञायते अंशुकाञ्चलोऽपि विलग्नः कण्टकादौ। हे चौलुक्यकुलाम्बरदिनमणे कुमारपाल तवालोकननिमित्तं धावन्तीभिर्मकरध्वजबाणविद्धहृदयाभिर्नारीभिर्हर्षन्तीभिः।

---

१ इन्दरात् N; मुन्दराः D. २ पेच्छ BEP, पीच्छ M. ३ कंचिआ S. ४ चामला PM. ५ P adds यमितेंहौ after च. ६ जानिज्जइ A. ७ चालुक्क BODP. ८ धावंतहिं A. ९ चगणचतु० ODP.

"मसिसव्वंभयारि घणतिमिरमालिआओ,
उअह समुल्लसंति दुव्वारमालिआओ ।
वासयपंजरेसु सुत्ताओ सारिआओ,
तह अविलंविआओ जंति अहिसारिआओ ॥ ३९.१ ॥

गन्तचः पचुपाः खण्डोद्गतम् ॥ ४० ॥

गुर्वन्तश्चतुर्मात्रः पञ्चमात्रः चतुर्मात्रपञ्चकं पञ्चमात्रश्च । समे जो लीर्वा खण्डोद्गतम् । यथा—

"खंडुग्गयमिंदुबिंबमिणमज्जवि अहिणवकिंसुअकुसुमसरिसयं,
न हु जा चंदिमाइ तिमिरभरं किर परिदलिऊण पयडइ हरिसयं ।
वम्मीसरभडस्स सरनिअरेहिं अइदूसहिहिं पहरिज्जंतओ,
अहिअं ता संपइ अहिसरणे पयट्टइ जुवइजणो तुवरंतओ ॥ ४०.१ ॥

चर्पाचीपाः प्रसृता ॥ ४१ ॥

चतुर्मात्रः पञ्चमात्रद्वयं चतुर्मात्रचतुष्टयं पञ्चमात्रश्च प्रसृता । यथा—

"जं किर मुद्धिआइ तीए अहिणवमहुसमयलच्छितुवरिज्जंतओ,
पसरिअमलयमारुओ न हु सुहाइ तुह विरहंमि सुरूवे छिवंतओ ।
तस्स व चिंतिऊण पडिखलणकारणं किरइ रुद्धनहयलवहाओ,
किर उण्हुण्हिआओ घणनीससिअसमीरलहरीओ अइदूसहाओ ॥ ४१.१ ॥

चुर्दो नौजे जो लम्बिता ॥ ४२ ॥

पञ्च चतुर्मात्राः द्विमात्रश्चैको नौजे जगणश्चेल्लम्बितागलितकम् । यथा—

"कइलासतुलणपयडिअबहुबाहपएणं,
संजणिअतिअसमंडलबहुबाहपएणं ।

---

1) मसिसव्वंभयारीत्यत्र मषीसदृशचारिघनतिमिरमालिकाः पश्यथ समुल्लसन्ति दुर्वारं यथा स्यात्तथा । हे आलिकाः सख्यः वासकपञ्जरेषु सुप्ताः शारिकाः । तथा अविलम्बिताः त्वरिताः यान्ति । याः कामाक्रान्ताः स्वयं भर्तारं प्रतिव्रजन्ति ता अभिसारिका उच्यन्ते । 2) खंडुग्गयमित्यत्र । अर्धोद्गतं चन्द्रबिम्बं इदं अद्यापि अभिनवकिंशुककुसुमसदृशं न निश्चितं यावत् चन्द्रिकया तिमिरभरं किल परिदाल्य प्रकटयति हर्षम् । वम्मीसरशब्दो देश्यः कामवाचकः । स एव भटस्तस्य बाणनिकरैः । कथंभूतैरतिदुःसहैः । ताड्यमानः अधिकं यथा स्यात्तथा तस्मात्सम्प्रति अभिसरणे भर्तुर्युवतिजनः प्रवर्तते त्वरमाणः । 3) जं किर मुद्धिआइ इत्यत्र हे सुभग यस्मात्कारणात् । किलेति निश्चये । तस्या मुग्धिकायाः तव विरहे मलयमारुतः छिवन्निति अङ्गे लगन्नपि न सुखायते । कथंभूतः । अभिनववसन्तलक्ष्म्या त्वरमाणः । तस्मात्कारणात् तत्प्रतिस्खलनकारणं ध्यात्वा रुद्धनभस्तलपथाः उष्णोष्णिका अत्युष्णा अतिदुःसहाः निश्वासवायुलहरीः करोति (किरति ?) । 4) कइलासतुलणेत्यत्र कैलासतोलने प्रकटितं बहुतरं बाहापदं बाहाव्यापारो येन संजनितत्रिदशमण्डलबहुबाष्पपयसा आलम्बितक्षयकारणदशाशतेन । वणे इति निश्चये । नीता सीता दशास्येन वने कानने ।

---

१ सव्वम्भयारि A; सवंभयारि E; सव्वम्भयारि DN. २ ओअह BDN. ३ The line is dropped in D. ४ अवलंविआओ AC. ५ अहिसारिओ C. ६ खंडुग्गय DP. ७ अइसरणे B. ८ चर्पाः चीराः H. ९ तस्य A. १० उण्हुण्हिआओ B.

आलंबिअखयकारणदसासएण वणे,
नीआ सीआ तेणं दसासएण वणे ॥ ४२.१ ॥

सौजे पैर्विच्छित्तिः ॥ ४३ ॥

सैव लम्बिता ओजे पगणैः विच्छित्तिर्गलितकमंहौ यमिते। यथा—

"रणरणंति जत्थ पमत्ता कुसुमेसु सिलीमुहा,
होंति जत्थ लोअदूसहा कुसुमेसुसिलीमुहा।
विच्छित्तिपरो तरुणिअणो विणा वि हु महु समओ,
विब्भमइ जत्थ समुत्थरइ एस इह महुसमओ ॥ ४३.१ ॥

चापचपदा ललिता ॥ ४४ ॥

चद्वयं पचपदाश्चांहौ यमिते ललितागलितकम्। यथा—

"मत्तमयरपुच्छच्छटोहभग्गवणराइअं,
तीरसहंतलवंगलवलिकणइवणराइअं।
नहमंडलगरुअनिरंतरविविहघणपालयं,
उअहिं पेच्छ ललिअगत्ति एअं घणवालयं ॥ ४४.१ ॥

उभे विपमा ॥ ४५ ॥

उभे विच्छित्तिललिते ललिताविच्छित्ती वा संकीर्णे विपमांगलितकमंहौ यमिते। यथा—

"तरलं दीहत्तणेणं पाविअकण्णमग्गं,
विसमत्थमोहसायरे करेइ कं ण मग्गं।
एअं तुह नयणजुअलयं सुंदरि कालसारं,
सोहाविणिज्जिअलोअणं निंदइ कालसारं ॥ ४५.१ ॥

अत्र पूर्वार्द्धे ललिता अपरार्द्धे विच्छित्तिः ॥ ४५.१ ॥

---

1) रणरणन्ति शब्दं कुर्वन्ति यत्र प्रमत्ताः पुष्पेषु भ्रमरा भवन्ति तत्र लोकदुःसहाः कुसुमेषोः कामस्य बाणाः। विच्छित्तिः पत्रभङ्गादिरचना तस्याः परायणः तत्पर्याप्तो विनापि मधु मद्यं समदः मदसहितः विभ्रमति यत्र विस्तरति एष स इह मधुसमयः। 2) मत्तमयरपुच्छेत्यत्र उदधिं पश्येति सदृङ्गः। कथंभूतम्। मत्तमकरपुच्छच्छटाघेन भग्ना वनराजिका यत्र सः तथा तम्। तीरे राजमाना लवङ्गलवल्यो कणइत्ति वल्लिविशेषश्च यासां वने राजितं तत एतयोर्द्वन्द्वः (?)। नभोमण्डले ये गुरुका निरन्तरा विविधा घना मेघास्तेषां पालकं वर्तकम्। मेघानां हि समुद्रादेव वृत्तिर्भवनात्। घना व्याप्ता जलचरसर्पा यत्र स तथा तम्। 3) तरलं दीहत्ति—हे सुन्दरि इदं नयनयुगलकं चञ्चलं दीर्घत्वेन प्राप्तकर्णमार्गं विषमात्यमोहसागरे करोति कं न मग्नम्। एतच्च कालगुणेन सारं प्रधानं किं च शोभाविनिर्जितं लोचने यस्य स तं कृष्णसारं हरिणं निन्दति।

---

१ शिली० AE २ The line is dropped in D. ३ लोहदुसहा ५. ४ शिली० E. ५ तुरंगि० D. ६ विणा dropped in D. ७ समुल्लइ A. ८ चछदोहम० DP, चछदाभ० BE. ९ एइसं A. १० वणराइ dropped in S, वणराइअ A. ११ पिच्छ E. १२ ललियगति A. १३ पश्च N. १४ विप्प० B, विषमालालितक० A.

तीचौ मुक्तावली ॥ ४६ ॥

चत्वारस्त्रिमात्राश्चतुर्मात्रश्चैको मुक्तावलीगलितकम्। यथा—

[1]चंदणयं पिहु न हु सा सहए,
गंडयलं करकलिअं वहए।
धरइ न मुत्तावलिअं हिअए,
तुज्झ तणुं चिअ लिहिअं निअए ॥ ४६.१ ॥

पिचौ रतिवल्लभः ॥ ४७ ॥

त्रयः पञ्चमात्राः चगणश्चैको रतिवल्लभो गलितकम्। यथा—

[2]दीसए एस तरुणिअणदुल्लहओ,
पच्चक्खतणू चेव रइवल्लहओ।
जो भणइ मयणो हरेण परिअड्ढो,
सो मामि जणो निच्छइण अविअड्ढो ॥ ४७.१ ॥

पौ चपौ हीरावली ॥ ४८ ॥

द्वौ पञ्चमात्रौ चतुर्मात्रपञ्चमात्रौ च हीरावलीगलितकम्। यथा—

[3]कुवलयदलनयणे पयावइणा कयं,
बहुरयणमयं पिव तुह वयणपंकयं।
जस्सिं मणहरदसणाहरकुंतलया,
हीरावलिविद्दुमदलइंदनीलया ॥ ४८.१ ॥

दण्डकार्यादिभ्योऽन्यच्च सयमकं गलितकमित्येके ॥ ४८.१ ॥

गलितकप्रकरणम्।

*

गलितकमेवायमकं सानुप्रासं समांहि खञ्जकम् ॥ ४९ ॥

पूर्वकाण्येव गलितकानि यमकरहितानि सानुप्रासानि यदि भवन्ति तदा खञ्जक[11]संज्ञानि ॥ ४९ ॥

---

1) चंदयणं (णयं) पि हुत्ति—चन्दनं सा न सहते अर्थादङ्गे। तथा गण्डतलं कपोलभागं करतलगतं वहते शोकाकुलत्वात्। धरति न मुक्तावलिकां हृदये तव तनुमेव लिखितां पश्यते। हृदये कीदृशी। निजके। 2) [दीसइत्ति—] दृश्यत एष तरुणीजनानां दुर्लभः प्रत्यक्षतनुः निश्चयेन रतिवल्लभः। य एवं वक्ति 'ईश्वरेण परिदग्धः' स पुमान् मामि मन्ये निश्चयेनाविदग्धकः। मूर्ख इत्यर्थः। 3) कुवलयेत्यत्र हे कुवलयदलनयने ब्रह्मणा बहुरत्नमयमिव कृतं तव वदनपङ्कजं यस्मिन्मनोहरदशनाधरकुन्तलकाः सन्ति। कीदृशाः। हीरावलिविद्रुमदलेन्द्रनीलका इवेत्यर्थः। इति गलितकप्रकरणम्।

---

१ तणूं चेअ B. २ परिअड्ढो D. ३ सामि N. ४ मिच्छइण NS; निच्छएण E. ५ बहुरणमयं D. ६ रजसि S. ७ विद्रुमदल B; ८ इत्यन्ये A. इति dropped in P. ९ पूर्वाण्येव P. १० सुः KP. ११ खञ्जकनामानि A.

खञ्जकविशेषानाह—

तौ चितगाः खञ्जकम् ॥ ५० ॥

त्रिमात्रगणद्वयं चतुर्मात्रत्रयं त्रिमात्रो गुरुश्चायमकं सानुप्रासं खञ्जकम्। यथा—

"मत्तमहुअमंडलकोलाहलनिब्भरेसुं,
उच्छलंतपरहुअकुंडुंबपंचमसरेसुं।
मलयवायखंजीकयसिसिरयाए घणेसुं,
विलसइ का वि चित्तसमयंमि सिरी वणेसुं ॥ ५०.१ ॥

पचपचपा महातोणकः ॥ ५१ ॥

पञ्चमात्रचतुर्मात्रपञ्चमात्रचतुर्मात्रपञ्चमात्राश्चेन्महातोणकः। यथा—

"तुह पयावेण वि दुवदूसहेण महिवलए,
दड्ढुंदरिअवेरिमंडलेण इह पसाहिए।
महातूणयदरिविवरमज्झंमि अहोमुहा,
लज्जिअव्व ठिआ नरनाह तुज्झ सिलीमुहा ॥ ५१.१ ॥

चीगौ सुमङ्गला ॥ ५२ ॥

चगणचतुष्टयं गुरुश्च सुमङ्गला। यथा—

"चीणं चएसु निवसेसु कंबलं,
चालुक्कायमणुसर महाबलं।
मूढ वहसु मा माणविसघंघलं,
अत्ताणयस्स चिंतेसु मंगलं ॥ ५२.१ ॥

चौ पः खण्डम् ॥ ५३ ॥

चतुर्मात्रद्वयं पञ्चमात्रश्च खण्डं नाम खञ्जकम्। यथा—

"नवाविअचंदणेरणो,
मज्झाविअमंदुअरणो।

---

1) मत्तमहुअमंडलेत्यत्र उन्मत्तभ्रमरश्रेणिकोलाहलेन व्याप्तेषु, उच्छलत्कोकिलकुटुम्बस्य पञ्चमस्वरो येषु तेषु, मलयवायुखञ्जीकृतशिशिरपदा लक्षणया निरस्कृतः शिशिरस्य ऋतोः पदं व्यापारो यया सा, निविडेषु विलसति कापि चैत्रसमये श्रीः शोभा वनेषु। 2) तुह पयावेणेत्यत्र तव प्रतापेनापि दवबहुःसहेन दग्धदरि-वैरिमण्डलेन महीतलये [प्र]साधिते सति। तृणको भक्षकः स एव दरी गुहा [तस्याः] विवरमध्ये अधोमुखाः लज्जिता इव नरनाथ बाणालिष्टन्ति। 3) चीण चएसु इत्यत्र चीनांशुकं त्यज परिधेहि कम्बलं कुमारपाल-मनुसर। हे मूढ मानं मा वह विह्वलं त्वं विशृङ्खलं वा। आत्मनश्चिन्तय मङ्गलम्। 4) नवाविअचि। अत्र नर्तितचन्दनवनो मदं प्रापितमधुकरगणः खण्डितमनस्विनीमानकः याति दक्षिणः पवनः।

---

१ मत्तमहुअरमं० A. २ कुटुंब D; कुटंब CS; कुडंब BE. ३ सिसिरपया A; सिसिरपया E. ४ महातोणः F. ५ ददरिव A. ६ द्विधा F. ७ चोडुक AN. ८ मा dropped in S. ९ नंदण-वणो A. १० माहुअर० A.

खंडिअमाणिणिमाणओ,
घाअइ दाहिणपवणओ ॥ ५३.१ ॥

पचता उपात् ॥ ५४ ॥

पण्मात्रः चतुर्मात्रः त्रिमात्रश्च उपात्खण्डकम् । उपखण्डकमित्यर्थः । यथा—

"साहीणो चित्तण्णुओ,
पणओ खंडिअमन्नुओ ।
माए पयरेणदुल्लहो,
कत्तो लब्भइ वल्लहो ॥ ५४.१ ॥

पञ्चौ खण्डिता ॥ ५५ ॥

एकः पण्मात्रो द्वौ चतुर्मात्रौ खण्डिता । यथा—

"उज्जागरकसायनयणं,
हिअयलग्गजार्वयचलणं ।
खंडिआइ दट्ठूण पिअं,
मरणयंमि हिअयं निहिअं ॥ ५५.१ ॥

त्रयोऽप्यवलम्बकः ॥ ५६ ॥

त्रयोऽपि खण्ड-उपखण्ड-खण्डिता-भेदाः प्रत्येकमवलम्बकसंज्ञाः । "संज्ञाप्रयोजनं द्विपदीखण्डे ॥ ५६ ॥

पञ्चीर्युग्जो लीर्वा हेला ॥ ५७ ॥

पण्मात्रः चतुर्मात्रचतुष्टयम् । तथा युक् समस्थानगतो जो लीर्वा हेला । यथा—

"कोअंडं पसूणरइअं गुणो महुअरा,
बाणा कामिणीण नयणा विलासंगहिरा ।
सयमतणू जडो सहयरो तुसारकिरणो,
हेलाए तहावि भुवणं जिणेइ मयणो ॥ ५७.१ ॥

---

1) साहीणो चित्तेत्यत्र स्वाधीनः चित्तज्ञः । पणओ स्नेहलः । खण्डितमन्युकः मयि सकोपे सति इति शेषः । हे मातः प्रकरणे उत्सवसमये दुर्लभः परदेशगतत्वात् । कुतो लभ्यते वल्लभः । 2) उज्जागरेत्यत्र निद्राभावेन कषायनयनं हृदयलग्नभावकचरणं परस्त्रीपादप्रहारात् खण्डितया दृष्ट्वा प्रियं मरणे हृदयं निहितम् । निद्राकषायमुकुलीकृतताम्रनेत्रो, नारीनखप्रणविरोपविचित्रिताङ्गः । यस्याः कुतोऽपि गृहमेति पतिः प्रभाते, सा खण्डितेति कथिता कविभिः पुराणैः । 3) संज्ञाप्रयोजनमित्यत्र एतेषां त्रयाणामप्युदाहरणानां अवलम्बक इति संज्ञा । अस्याः अवलम्बकसंज्ञायाः प्रस्तावो द्विपदीप्रकरणेऽस्मे । उदाहरणं रत्नावलीसभवं यथा—कुसुमाउहपिअदूअयं इत्यादि ज्ञेयम् । 4) कोअंडं पसूणेत्यत्र कोदण्डं प्रसूनरचितम् । गुणः प्रत्यञ्चा मधुकराः । बाणाः कामिनीनां नयनानि विलासगभीराणि । स्वयमतनुः जडः सखा तुषारकिरणः । हेलया तथापि भुवनं जयति मदनः ।

---

१ दाहिणपवयणओ S. २ खण्डकमुप० C; पण्डकमुप० A. ३ पवरण N. ४ कत्ते S. ५ चतुर्मात्रद्वयं K. ६ पण्डिता A. ७ उज्जागर ABK; उज्जमर DP. ८ जावयं चलणं N. ९ अविलम्बिकः G, The Sūtra is dropped in D. १० पण्डिता A. ११ विलासमंगहिरा S. १२ समयतणू N.

सान्ते दोनावली ॥ ५८ ॥

सा हेला पादान्ते द्विमात्रोना आवली । यथा—

"नवघणमालिअत्ति कलिउं विहत्थओ,
सजलविलोअणेहिं पहिआण सत्थओ ।
गिम्हे दवहुआसमसिमेलिणसामलिं,
पेच्छेइ हंत विंझसिहराण आवलिं ॥ ५८.१ ॥

चूपगा विनता ॥ ५९ ॥

चतुर्मात्रपट्कं पञ्चमात्रो गुरुश्च । समे जो लीर्वा विनता । यथा—

"मुहसिरिकलावनिज्जिअदिवायरनिसायरं तइलोक्कइं,
अक्खलिअसुद्धझाणाणलेण निद्दड्ढसयलकम्मुग्गइं ।
विणयामरिंदमणिमउडकंतिपब्भारपल्लविअचरणयं,
तं अणुसरामि भवजलहितारणं वद्धमाणमिह सरणयं ॥ ५९.१ ॥

तौ चस्तौ विलासिनी ॥ ६० ॥

द्वौ त्रिमात्रौ एकश्चतुर्मात्रः पुनर्द्वौ त्रिमात्रौ विलासिनी । यथा—

"मत्तकोइलामहुरभासिणी,
हसइ किं पि सा जइ विलासिणी ।
दोण्हि हुंति सोहग्गलण्हिआ,
मल्लिआ तह य चंदजोण्हिआ ॥ ६०.१ ॥

तौ चितौ मञ्जरी ॥ ६१ ॥

द्वौ त्रिमात्रौ त्रयश्चतुर्मात्राः पुनरेकस्त्रिमात्रो मञ्जरी । यथा—

"चूअमंजरिं मंजुकोइलागीअयं,
मलयमारुअं पुण्णबिंबयं चंदयं ।

---

1) नवघणमालिअत्ति इत्यत्र पथिकानां सार्थः विन्ध्याचलशिखराणामावलिं पश्यति । कीदृशीम् । दवहुतासनसमपीलिमः मलिनाः कृष्णाः शालमलयो यत्र ताम् । क । ग्रीष्मे काले । सार्थः कीदृग् । विह्वलः व्याकुलः । कथ(कलिउ)मिति ज्ञात्वा । इत्यंति किम् । नवघनमालिकां ज्ञात्वा । कैः साधुजनैः । 2) मुह-सिरिकलेति अत्र मुखश्रीकलापनिर्जितदिवाकरनिशाकरं त्रिलोकपतिं अस्खलितशुद्धध्यानानलेन निर्दग्धा सकल-कर्माणि उद्गतिरुद्धो येन स तम् । विनतामरेन्द्रमणिमुकुटकान्तिप्राग्भारेण पल्लवितं रचीकृतं चरणमेव स्वार्थे के चरणकं यस्य स तथा । तं जिनमहं अनुसरामि भवजलधितारणं वर्धमानानिध शरणमेव शरणकम् । 3) मत्त-कोइलामहुरभासिणीत्यत्र यदि सा मत्तकोकिलावन्मधुरभाषिणी विलासिनी हसति तदा सौभाग्येन श्लक्ष्णे कोमले द्वे भवतः एका मल्लिका द्वितीया चन्द्रज्योत्स्ना । 4) चूअमंजरिं इत्यत्र मधुमासे विषमाशः कामः एतानि उपकरणानि प्राप्य शीघ्रं त्रैलोक्यविजयसमर्थो भवति । तानि कानि । चूतमञ्जरीं मनोज्ञकोकिलागीतिकं मलयाचलमारुतं पूर्णबिम्बं चन्द्रं च ।

---

१ मालइति P. २ मसिनिलय P. ३ पिच्छइ E. ४ दहहिरे D1S. ५ झाणानलेच P. ६ निरिरयन-लक्खुगाइं A. ७ दोन्ह A; दोवि BEP. ८ लाण्हिआ S. ९ तुण्हिआ. १० मलयमारुअ S.

पाविऊण महुमासि एत्थ विसमत्थओ,
हवइ झत्ति तेलोक्कनिज्जयसमत्थओ ॥ ६१.१ ॥

सा तान्ता सालभञ्जिका ॥ ६२ ॥

सा मञ्जरी त्रिमात्रान्ता सालभञ्जिका । यथा—

[1]"चरणकमललग्गे वि हु पिअयमंमि पकोविरी,
सालंभंजिअव्व सहि कीस तुमं सि अजंपिरी ।
सुणसु समुल्लसंति पिअमाहवीकुलकलयला,
मयणविजयदुंदुहिझुणी इव पूरिअनहयला ॥ ६२.१ ॥

चादिः कुसुमिता ॥ ६३ ॥

सैव मञ्जरी पादादौ चतुर्मात्रश्चेत्कुसुमिता । यथा—

[2]"मयपरिपुट्ठघुट्ठकलयंठीपंचमनिब्भरा,
विहडप्फडभमंतभसलावलिकलयलसुंदरा ।
घणघोलंतमलयपवणोद्धुअकुसुमिअकेसरा,
हिअयं निम्महंति न हु कस्स इमे महुवासरा ॥ ६३.१ ॥

पञ्चगौ द्वितीयषष्ठौ जो लीर्वा द्विपदी ॥ ६४ ॥

एकः षण्मात्रः पञ्च चतुर्मात्राः गुरुश्च । तथा द्वितीयषष्ठौ चगणौ जो लीर्वा द्विपदी । यथा—

[3]"[11]मा रे वच्च पहिअ निअदइअं परिहरिऊण सव्वहा,
इह हि समुच्चरंतकुसुमायरमासमुहंमि अन्नहा ।
[12]परहुअजुवइगीअहालाहलविहलंघलिअचित्तओ,
[13]चलसि न दुवइअं पि वम्मीसरसरनिउरंबछित्तओ ॥ ६४.१ ॥

---

1) चरणकमलेत्यत्र सखीं प्रति सखी प्राह । चरणकमललग्नेऽपि प्रियजने भर्तरि कथं प्रकोपनशीला हे सखि कथं अजल्पनशीला । केव । पुनिरेव । हे सखि शृणु प्रियो माधवो वसन्तो यस्याः सार्थात् कोकिला तस्याः कुलानां कलकलाः शब्दाः समुल्लसन्ति पूरितनभस्तलाः । इवोत्प्रेक्षते । कामविजयानकध्वनयः । 2) मयपरिपुट्ठेत्यत्र मदपरिपुष्टेन सत्रोपा याः कलकण्ठ्यः तासां पञ्चमस्वरालीर्निर्भरा व्याप्ताः । विहडप्फडो व्याकुले देशः । एवंविधा भसला भ्रमरालेषामावल्यस्तासां कलकलेन गुञ्जारवेण सुन्दराः । घनाश्च ते घोलन्तश्च एवंविधा मलयपवनास्तैरुद्धताः कुसुमितकेसरा येषु । एवंविधा वसन्तवासराः कस्य चित्तं न निम-(मे)ष्यन्ति अपि तु सर्वस्येति भावः । 3) मा रे वच्च पहिअ इत्यत्र रे पथिक मा वच्च मा याहि सम्यगुच्च-रत्कुसुमाकरमासमुखे वसन्तस्यादौ इत्यर्थः । निजदयितां परिहृत्य । कथम् । सर्वथा । तां मुक्त्वा चेद् गमिष्यसि तदा परभृतयुवतिगीतहालाहलविह्वलः सन् कन्दर्पशरसमूहताडितः सन् द्विपदिकामपि पदद्वयमितमेदिनीं न चलिष्यति । ततो मा गच्छेत्यर्थः ।

---

१ तेलुक्कनि० A; लोक्कनि० D; तेल्लोक्कविजय B. २ समुल्लओ D. ३ पिअयंमि CN; पियआमि A ४ सालिभंजि० D. ५ मुअ कीस B० A. ६ कुलकलल० DB. ७ दुंदुभिझुणिणी इव पूअनह० B. ८ चतु-र्मात्रेऽपि के वर्णे कु० P. ९ विहडप्फुड N; विहडप्फड E. १० परहुअ B; परभुअ N. ११ मारे N. १२ परहूअजुवई A; परभुअजुवई P. १३ चलसि N. १४ निउरंब B.

२० छन्दो०

इहान्या[1] अपि सुमनः-तारा-ज्योत्स्ना-मनोवतीप्रभृतयः सप्तत्रिंशद् गणसमा द्विपद्यो विपुला-चपलादयोऽष्टावर्द्धसमाश्च कैश्चिन्निबद्धाः। ताश्च क्वचित्काश्चिदन्तर्भवन्तीति पृथङ् नोक्ताः ॥ ६४.१ ॥

साद्ये न्ले छै रचिता ॥ ६५ ॥

सा द्विपदी आद्ये चगणे न्ले लघुचतुष्टये सति छैः सप्तभिर्मात्राभिर्यतिश्चेद्रचिता। रतिकेत्यन्ये। यथा—

[1]"नच्चिरकीरमिहुणकोलाहलमुहलिअकलमछेत्तओ,
दिम्मुहमहमहंतगंधुक्कडविअसिअसत्तवण्णओ।
विरइअमुद्धदुद्धसुंदेरिमेअविरलकासहासओ,
पिअसहि मा पिअंमि परिकुप्पसु जं सरओ समागओ ॥ ६५.१ ॥

गन्तारनालम् ॥ ६६ ॥

सा द्विपदी गुर्वन्ता एकेन गुरुणा वृद्धा आरनालम्। यथा—

[2]"अविरलवाहवारिधारावलिविअलणसोणलोअणाए,
दारुणपंचवाणवाणाहयहिअयफुरंतवेअणाए।
तुह विरहंमि चंदमंदानिलचंदणतावजालिआए,
अहिणवमार नालवणयं पि तीइ तं कुणसि चालिआए ॥ ६६.१ ॥

उपान्त्यलोना कामलेखा ॥ ६७ ॥

सैव द्विपदी अन्त्यस्य गुरोः समीपमुपान्त्यं तत्र यो लः तेनोना कामलेखा। यथा—

[3]"राई चंदकिरणधवला मणहरणा पुप्फमाला,
नीलुप्पलपसूणपरिवासमहग्घा जुण्णहाला।
गेहं रयणदीवरुईरुइरं गीअं पंचमेणं,
तेण विणा असारमखिलं खु कामलेहाधरेणं ॥ ६७.१ ॥

---

1) नच्चिरकीरमिथुने(द्वये)त्यत्र नर्तनशीलशुकमिथुनकोलाहलमुपरितशालिक्षेत्राणि यस्यां सा। दिक्षु-क्षेपु उच्छसन्तो गन्धोत्कटा विकसिताः सप्तपर्णाः यस्यां सा। विरचिता मुग्धैः ग्रामलोकैः दुग्धानां मुग्ध(ग्ध)तिमेति सौदर्यं यत्र। कासेषु दुग्धगुणारोपः इत्यर्थः। सा चासौ अविरलकासा एव हासः सौ उभौ यत्र सा। यस्मात्कारणात् एवंविधा शरत् समागता अत एव प्रियसखि प्रिये मा परिकोपं कुरु। 2) अविरलबाष्पवारिधारावलीं[विगलनशीलां] लोचनायाः। पुनः क० दारुणपञ्चबाणाहतहृदये स्फुरद्वेदनायाश्च विरहे सति चन्द्रमन्दानिलचन्दनानां तापैर्ज्वालितायाः। 3) राई चंदकिरणेत्यत्र चन्द्रकिरणैर्धवला रात्रिमनोहरा पुष्पमाला नीलोत्पलप्रसूनवासमहर्घ्यो जीर्णहाला मदिरा रत्नदीप[रुचि]रुचिरं गृहं पञ्चमस्वरेण गीतम्। युक्तमित्यध्याहार्यम्। परं तेन भर्त्रा विना सर्वं अपि असारम्। कीदृशेन कामलेखाधरेण।

---

१ इहान्यापि N. २ मुहलिअकमल० A; मुहलिअकमल० D ३ गंधवड B; गंधवड C. ४ विरहिअ ABDNP. ५ सुंदरिम N3. ६ बाणाहइहि० P. ७ विरहंमि P. ८ रइ dropped in AK; रइं रइ N.

पचीदाश्चन्द्रलेखा ॥ ६८ ॥

एकः पण्मात्रः चत्वारश्चतुर्मात्राः द्विमात्रश्चैकः चन्द्रलेखा। यथा—

[1]मयणविआरसमुद्दलहरिवित्थारकारिणी,
जणिआणंदचंदमणिनिज्झरसारसारणी।
उच्छलंतलायण्णमऊहावलिपसाहिआ,
मज्झ [3]नयणकुमुआण इमा सा चंदलेहिआ ॥ ६८.१ ॥

चिपॅताः क्रीडनकं जैः ॥ ६९ ॥

चतुर्मात्रत्रयमेकः पञ्चमात्रः त्रिमात्रश्च। जैरित्यष्टभिर्यतिश्चेत्क्रीडनकम्। यथा—

[2]कंकणकिंकिणिनेउरकलयलमुहलं,
पवणपहल्लिरसिचयंचिअगयणयलं।
दीहोच्छलणखेल्लणकयलोलणयं,
सहइ इमाए अंदोलणकीलणयं ॥ ६९.१ ॥

पपचतदा अरविन्दकम् ॥ ७० ॥

षट्पञ्चचतुस्त्रिद्विमात्राः अरविन्दकम्। यथा—

[5]उअह तुज्झें विरहे इमाइ मुहकमलं,
अविरलबाहधाराविलुलिअकज्जलं।
अब्भलेहपिहिअं व [6]पुण्णिमचंदयं,
सेवलसंवलिअं व नवारविंदयं ॥ ७०.१ ॥

पलदलचदगाद्यौ मागधनर्कुटी ॥ ७१ ॥

पण्मात्रलघुद्विमात्रलघुचतुर्मात्रद्विमात्रगुरुभ्यः परौ गुरू चेन्मागधनर्कुटी। यथा—

[4]नवमयरंदपाणपायडमयउत्ताला,
भमरा रुणरुणंति कार्यलिकयसद्दाला।

---

1) मयणविआरेत्यत्र मदनविकारसमुद्रलहरीविस्तारकारिणी जनिता निष्पादिता आनन्द एव चन्द्रमणिश्चन्द्रकान्तस्तस्य निर्झरो निष्यन्दः स एव सारसारिणी यया सा। उच्छलल्लावण्यमयूखश्रेणिभिः प्रसाधिता शोभिता। मम नयनकुमुदानां एषा चन्द्रलेखेव चन्द्रलेखिका आह्लादकत्वात्। 2) कंकणकिंकिणीत्यत्र एतस्या आन्दोलनक्रीडन शोभते। कङ्कणकिङ्किणीनूपुराणां कलकलः शब्दविशेषस्तेन मुखरम्। पुनः कथंभूताम्। पवनेन प्रकम्पमानं यल्लिचयं परिधानवस्त्रं तेनाञ्चितं पूजितं गगनतलं यत्र तत्। दीर्घान्दोलनक्रीडाकृतालोडनकम्। 3) उअ तुज्झेत्यत्र पश्य तव विरहे एतस्या मुखकमलम्। कीदृशम्। अविरलं निरन्तर बाष्पधाराभिर्विलुलितं कज्जलं यत्र। अभ्रलेखापिहितमिव पौर्णिमचन्द्र अथवा सेवालपटलैः सवलितं आच्छादितं नवीनारविन्दमिव। 4) नवमयरंदेत्यत्र नूतनमकरन्दपानेन प्रस्तो मदस्तेन उत्ताला मदोत्कटा ये भमरास्ते रुणरुण—(ण)शब्दं कुर्वन्ति। कीदृशाः। काकलीकृतशब्दालाः। विरूपा दृष्टयोऽतो ता विदृष्टयः न विदृष्टयो अविदृष्टयः शोभनदृष्टय इत्यर्थः। चूताङ्कुरैः कषायः कण्ठो यासां ता एवंविधाः कलकण्ठ्यः कोकिलाः पञ्चमस्वरं उद्गिरन्ति शब्दं कुर्वन्तीत्यर्थः।

---

१ समद्द S. २ निम्भर DN; निम्भर CP. ३ नयनकु- N. ४ चिपचाः N. ५ तुम्ह N. ६ पिहिअव्वं D. ७ The whole line upto यथा is dropped in P. ८ कोइलि A.

पंचममुग्गिरंति एआ अविदिट्ठीओ,
चूअंकुरुकसायकंठा कलयंठीओ ॥ ७१.१ ॥

सश्चेन्नर्कुटकम् ॥ ७२ ॥

पलदलचदगातसर्गणश्चेत्तदा नर्कुटकम्। यथा—

"परिमललुद्धलोलअलिगीअसणकुडयं,
जाव न जग्गवेइ विसमत्थमहाभडयं।
माणं मोत्तुआण माणंसिणि सप्पणयं,
पेम्मभरेण ताव अणुसर सहि वल्लहयं ॥ ७२.१ ॥

पजौ सिः समात् ॥ ७३ ॥

एकः पण्मात्रो जगणः सगणत्रयं च समानर्कुटकं समनर्कुटकमित्यर्थः। यथा—

"सयलसुरासुरिंदपरिवंदिअपायतलो,
निरुवमझाणनाणवसनासिअकम्ममलो।
निवसउ मे मणंमि भयवं सिरिवीरजिणो,
विलयं जंति कामपमुहा जह ते अरिणो ॥ ७३.१ ॥

नलगजसाः ससौ यदि तदा समनर्कुटकमिति तु "संस्कृतनर्कुटेनैव गतार्थमिति नोक्तम् ॥ ७३.१ ॥

त्रिष्वप्यन्त्यचस्य ते तरङ्गकम् ॥ ७४ ॥

त्रिष्वपि मागधनर्कुटी-नर्कुटक-समनर्कुटकेष्वन्त्यस्य चतुर्मात्रस्य स्थाने त्रिमात्रेषु भवति तदा तरङ्गकम्। यथा—

"बहुविहभावमुद्धमहुरत्तणमंदिरं,
पयणुदलासमसरसीरुहसुंदरं।
निम्मलकंतिपुंजपरिलद्धयचंगयं,
सोहइ तीइ दीहनयणाण तरंगियं ॥ ७४.१ ॥

---

1) परिमलेत्यत्र परिमलेषु लुब्धलोलभ्रमरगीतेन स्वनत् कुटजं कर्तृत्वेन स्थितं कन्दर्पमहाभटं न जागरयति तावत् हे मनस्विनि मानं मुक्त्वा सप्रणयं प्रेमभरेण सखि वल्लभं अनुसर भजेत्यर्थः। 2) सयलसुरेत्यत्र तथेति श्रीभगवान् वीरजिनो निवसतु। कीदृक्। सकलसुरासुरेन्द्रपरिवन्दितपादतलः। निरुपमध्यानज्ञानवलेन नाशितः कर्ममलो येन सः। तथेति किम्। यथा ते प्रमिदा अरयः कामप्रमोदादयः विलयं यान्ति। 3) संस्कृतनर्कुटेनैवेत्यत्र नर्कुटमिति नाम जयदेवमते। स्वमते तु सप्तदशाक्षराणां जातौ 'नजभजला स्यादविश्रमम्' (२.२९७)। 4) बहुविहभावेत्यत्र बहुविधभावेन मुग्धं मनोहरं सुन्दरत्वं तस्य मन्दिरं गृहम्। पवनोद्धतसरसीरुहसुन्दरं निर्मलकान्तिपुञ्जेन परिलब्धं चञ्चितं येन। तत् शोभनं तस्या दीर्घनयनतरङ्गितम्।

---

१ अविहीट्ठीओ S. २ चूअंकुर A; चूअकर BS. ३ कलकंठीओ BE. ४ सगणो वर्णगणश्चेत् F. ५ विसमच्छ B. ६ मप्पणयं A. ७ पिम्म० E. ८ सिहि D. ९ झाणमाण F. १० नासिअ B. ११ भवयं K. १२ नर्कटेष्वन्त्यस्य P. १३ जिनाने सति F. १४ बहुविहु H; विहु dropped in A. १५ पवनोद्धत ADN. १६ तरंगयं A.

गान्तं पवनोद्धुतम् ॥ ७५ ॥

तरङ्गकमेव गान्तं अन्ते गुरुणाधिकं पवनोद्धुतम् । यथा—

"भसला दसयति महुपाणपरव्वसाण,
उक्कण्ठातरलिअमणाण निअवल्लहाण ।
निब्भरमहुरगीईरवमुच्चरिउ इमासु,
दोलाकीलणाइ पवणुद्धुअवल्लिआसु ॥ ७५.१ ॥

चाभ्यां पाभ्यां पाद्धा तिर्निध्यायिका ॥ ७६ ॥

द्वाभ्यां चतुर्मात्राभ्यां यद्धा पञ्चमात्राभ्यां एकस्माद्धा पञ्चमात्रात्पर त्रिमात्रत्रयं चेत् त्रिधाप्येषा निध्यायिका ॥ चाभ्यां तिर्यथा—

"हो सामोअरि कुरगनेत्तिए,
वयणमऊहजिअचदकतिए ।
निज्झाइअजीवाविअमणसिए,
दुसहो तुज्झ विरहानलो पिए ॥ ७६.१ ॥

पाभ्यां तिर्यथा—

"निज्झाइअइ जत्थ मयगयवहूए,
ललिअकतिचगे कलकसोअरी ।
सेवति त तुह मुहचदय सया,
उव्विग्गबालहरिणच्छि चउ(ओ)रा ॥ ७६.२ ॥

पात्तिर्यथा—

"हरइ जम्मसयसचिआइ,
भविआण असेसदुरिआइ ।
तुह मुह जणिअमयणमाह,
निज्झाइअ पि सुअणनाह ॥ ७६.३ ॥

---

1) भसला दसयन्तित्यत्र भ्रमरा पवनोद्धूतवल्लिकासु सत्यासु दोलाक्रीडनानि दर्शयन्ति । किं कृत्वा । निर्भरमधुरगीतिरवमुच्चरित्वा । कासासु । निजवल्लभानाम् । कीदृशीनाम् । मधुपानपरवशानां उत्कण्ठातरलित-मनसाम् । 2) हे प्रियेऽरीत्यत्र हे सामोदरि हे प्रिये तव विरहानलो दुस्सहो यत्त । तव कथम्भूताया । कुरङ्ग-नयनाया वदनमयूखिरचन्द्रकान्त्या निष्पादित मनसि कलनं क्रीडितो मनसिज कामो यया तस्या । 3) निज्झाइ अइत्यत्र यत्र यस्यां मृगमदवधूटि कस्तूरिकाया निष्पादित दर्शने । कीदृशि मुखा । लटिताक्षिरेखा सुन्दरे । उन्मत्तबालहरिणीवत् चञ्चलाक्षिसदृशे मुखचन्द्रे सकल(क्ष) । क । चउराणा चतुरा वदा (पक्षे च) चकोराश्च । 4) हरइ जम्मसयसचिआइ इत्यत्र हे जनिजनकनाथ हे सुजनाथ हे जिनेन्द्र । निज्झाइअमिति—भवतो अपि सत् जन्मशतसचितानि मे दुरितानीति मत्वेवं सर्वेषां हरत जिनेश्वरा इति भावः ।

केचित्तु पचाभ्यां तिरिति निध्यायिकां वदन्ति। यथा—

[1]"वम्मीसरकंचणतोमरलिआ,
दिट्ठा छुडु सुंदरि चंपयकलिआ।
घुलिओ छुडु दक्खिणओ गंधवहो,
विअलिओ ता पहिआण मणोरहो ॥ ७६.४ ॥

चुपौ युग्म जोऽधिकाक्षरा ॥ ७७ ॥

पञ्च चतुर्मात्रा एकः पञ्चमात्रस्तथा समो न जगणोऽधिकाक्षरा। यथा—

[1]"उज्जागरओ कवोलपडुत्तणं तणुअत्तं,
दीहुण्हा सासदडया चित्तए विवसत्तं[2]।
अहिअक्खरजंपिएण किं वा मुहय तुह विरहे,
सा एत्ताहे वराई[3]आ निअयं मरणं लहे ॥ ७७.१ ॥

सा तुर्यपा मुग्धिका ॥ ७८ ॥

सा अधिकाक्षरा तुर्योऽपि चेत्पगणो भवति तदा मुग्धिका। यथा—

[2]"जीए लग्गेइ चंदणं गरलरसं व दूसह,
अगपि [3]अं जीए तावइ ससी अणंगनीसहं।
कयलीदलमारुओ वि किरइ हुअवहं पिव जीए,
दाहो मुद्धाइ एस कह समइ गुणालय तीए ॥ ७८.१ ॥

आदौ पँश्चित्रलेखा ॥ ७९ ॥

सा अधिकाक्षरा आदौ पँश्चेच्चित्रलेखा। यथा—

[4]"नहयलम्मि सयलदिसामुहेसु गहणम्मि गिरिवरे,
सरिपुक्खरिणिआसु देवउलएसु भित्तिसु नयरे।
दूरम्मि पासे घरम्मि अंगणपएसए तुह
चित्तलिहिअं पिव मयच्छि पेच्छामि सुंदरं मुहं ॥ ७९.१ ॥

---

अष्टांह्रौ धवले आद्यतृतीययोः पादयोश्चगणत्रयं द्विमात्रश्च । द्वितीयचतुर्थयोश्चगणत्रयम् । शेषेषु चतुर्षु पादेष्वोजयोः पञ्चमसप्तमयोर्द्वौ चगणौ त्रिमात्रश्चैकः, समयोः षष्ठाष्टमयोः चगणद्वयं द्विमात्रश्चैकः, मतान्तरे चगणत्रयं वा, यत्र तद्यशोधवलम् । यथा—

[3]जे तुह पिच्छहिं वयणकमलु, ससहरमंडलनिम्मलु ।
जे वि हु पालहिं भिच्चकम्मु, धुणहिं जि निरुवमु विक्कमु ॥

---

1) निद्दड्ढदड्ढेत्यत्र निर्दग्धा ज्वलिताः । दग्धः पापीयान् विरहानलस्तेन संतापतुलितवडवानलेन मूर्च्छां ग्राहिताः । नवघनमण्डलेन कर्तृभूतेन उत्प्राबल्येन स्थिताः पथिकाः कृतदुःखेन । 2) खीरसमुद्दिणेत्यत्र हे प्रभो तव यशःश्रिया धवलिते सति के के पाण्डुरत्वं न प्रापु । क्षीरसमुद्रस्य सदृशो लवणजलनिधिः हू इति जातः । कुवलयानि श्यामकमलानि कुमुदसदृशानि जातानि । कालिन्दी यमुना सुरसिन्धुजलसदृशी जाता । मधुमथनो हरिः रुद्रस्य सदृशो जातः । किरि इति किलार्थम् । सोऽञ्जनगिरिः कैलाससदृशो जातः । 3) जे तुह पिच्छहि इत्यत्र ये पुरुषाः तव पश्यन्ति वदनकमलम् । कीदृक् । शशधरमण्डलवन्निर्मलम् । ये पुरुषास्ते तव भृत्यकर्म पालयन्ति । ये नरा निरुपमविक्रमं स्तुवन्ति । ये पुरुषाः शासनमाज्ञां धरन्ति । ये पादकमलं प्रणमन्ति । तेषां विमुखी पराङ्मुखी लक्ष्मीर्न भवति । हे यशोधवलितदिङ्मुख ।

---

१ निद्दड्ढ० N; निद्दड्ढ० AB; निद्दड्ढड्ढ CDK. २ विरहाणलेण P. ३ वडवानलेन A. ४ मुत्थाविअ N. ५ ओ थक्क B, उत्थक्क DK ६ अष्टपात् षट्पात्-चतुष्पात् N. ७ सुउरिसो P ८ वन्निज्जइ AP, वज्जण्णिइ C. ९ मुसुयहिं CDV. १० मधुमहण D. ११ हरिणु P. १२ कइलासण C. १३ किं पंडउ A; किं पंडउ B. १४ चगणत्रयं A. १५ तद्योशो० C. १६ पिच्छहि NS, पेच्छहिं DP १७ मंडउनिम्मल A. १८ धुणिहि A. १९ निरुवनवि० AP.

जे वि हु सासणु धरहिं, पायकमलु जे पणमहिं ।
ताह नं लच्छी विमुह, पहु जसधवलिअदिसिमुह ॥ ३४.१ ॥

षडंहावाद्ये तुर्ये पादौ द्वितीये पञ्चमे
चौ शेषे पाद्यां चः पो वा कीर्तिधवलम् ॥ ३५ ॥

तत्र षडंह्रौ धवले प्रथमे चतुर्थे च पादे द्वौ पण्मात्रावेको द्विमात्रः । द्वितीये पञ्चमे च पादे द्वौ चतुर्मात्रौ । शेषे तृतीये षष्ठे च पगणद्वयात्परश्चतुर्मात्रः पञ्चमात्रो वा चेत् तदा कीर्तिधवलम् । यथा—

"उक्करडा खवलेउ गज्जउ, चिरु जुज्झुमेणु,
उन्नामउ सिरु कसरु म लुंज्जउ ।
एक्क महब्भर तुंहु कड्ढहिं, अवरु न तिहुअणि,
कित्ति धवल विसाउ तुह वड्ढइ ॥ ३५ १ ॥

चतुरंह्रावोजे पञ्चौ समे पचचाद्स्तो वा गुणधवलम् ॥ ३६ ॥

तत्र चतुरंह्रौ धवले विषमपादयोरेकः पण्मात्रो द्वौ चतुर्मात्रौ । समयोः पचचेभ्यः परो द्विमात्रस्त्रिमात्रो वा चेत् तदा गुणधवलम् । यथा—

"कइमभग्गा मग्गुलया, वहुं पिहुला दुत्तरजलुल्लया ।
तिम्व भरु वहंसु गुणधवलया, जिम्व केम्वइ न हसति पिसुणया ॥ ३६.१ ॥

पचताः पचौ भ्रमरः ॥ ३७ ॥

ओजपादयोः पण्मात्रचतुर्मात्रत्रिमात्राः समयोः पण्मात्रचतुर्मात्रौ चेत्तदा भ्रमरो धवलम् । यथा—

"कित्ति तहारी वर्ण्णेविणु, कइ अर्हुं न वर्ण्णहिं ।
मालइ माणिवि कि भमर, धत्तूरई लग्गेहिं ॥ ३७ १ ॥

---

1) उक्करडा खवलेउ इत्यत्र मयि धुरंधरे भार समुद्वहति सति साहङ्कृतित्व सूचयतेव मदग्रे वस्तु इत्युत्पन्नखेद वृषभ प्रति कविराह । हे धवल खसदृशक्षितिभुवन कोऽपि नास्ति । यस्मात्मागस्थितभारं खमेव कृष्यसि नान्य इत्यतस्तव विषाद किं वदत । स च वृषोऽवकर उत्खलतु गर्जारव करोतु । चिरं योद्धु मना स च शिर उन्नामयतु । मा लज्जतां भीदां मा करोतिति शब्दार्थः । 2) कइमभग्गा मग्ग(ग्गु)लयत्र हे सुरागो वृषभ धवलशब्दन वृषभ । कदर्मैर्भग्ना मार्गा दुस्तरजलयन्त । पृथुला वहा नद्य सन्ति । तत तथा भार वह यथा तत ते पिशुना न हसन्ति हास्य न कुर्वन्ति कथमपि । अन्यथा कारयन्ति । 3) कित्ति तहारी इत्यत्र त्वदीयां कीर्ति वर्णयित्वा कवि किं वराक । अपि तु न । कथम् । यथा मालतीं मालतीं अङ्गीकृत्य भ्रमर कनकदुमे किं लगति । अपि तु न तथायम् ।

---

१ सासण A0 २ ता हत उच्ची ১ ३ दिसिमुह A दिसिमुहु B ४ खग्गउ ১, खवलउ S खलवउ 0 ५ जुज्झमणु A0 ६ मउयबउ B ७ तुहु B ८ कड्ढइ B कड्ढहिं D১ ९ अवरु N १० तिहुअणि A. ११ विसाओ ১ १२ वड्ढइ A. Portion from ३०-१ to ३५ १ end is not photographed in P १३ वह P १४ वहुवु B १५ वग्गविनु D १६ अवरु N १७ वग्गहिं N, वग्गिहिं AP १८ धत्तुरइ ১S, १९ लग्गइ P

पचताः पचचा अमरम् ॥ ३८ ॥

ओजे पण्मात्रचतुर्मात्रत्रिमात्राः समे पण्मात्र एकश्चतुर्मात्रो द्वौ चेत्तदा अमरं धवलम्। यथा—

"इंदहुं[1] तुहुं गुणि अहिअउ, सग्गु वि[2] पहु मइं वाहिअउं[3]।
अमरविलासिणिगीअए, तुह पर कित्ति निसामिअए[4] ॥ ३८.१ ॥

आद्ययोः पची अन्त्ययोश्चुः सर्वत्रान्ते तो दो वा मङ्गलम् ॥ ३९ ॥

आद्ययोः प्रथमद्वितीययोः पादयोः प्रत्येकं पगणश्चगणत्रयं च, अन्त्ययोस्तृतीयचतुर्थयोः प्रत्येकं चगणपञ्चकं सर्वपादेषु चान्ते त्रिमात्रो द्विमात्रो वा चेत्तदा मङ्गलार्थसंबद्धत्वात् मङ्गलम्। यथा—

"तुह असिलट्ठिहिं नरवइ मंगलकारणि[5],
वित्थारिअ निम्मलयर सत्थिअधोरणि[6]।
संगरंगि विवाहमहूसवि जयलच्छिहिं[7],
दारिअमयगलकुंभत्थलमोत्तिअंगुच्छिहिं[8] ॥ ३९.१ ॥

उत्साहादिना येनैव धवलमङ्गलभाषांगाने तन्नामाद्ये धवलमङ्गले ॥ ४० ॥

उत्साहादीत्यादिग्रहणात् प्रक्रान्तानां रासावलयादीनां, पूर्वोक्तानां हेलादीनां, वक्ष्यमाणानां दोहकादीनां च ग्रहणम्। "तन्नामाद्ये इति उत्साहादिनामपूर्वके। यथा—उत्साहधवलं वदनधवलं हेलाधवलं दोहकधवलं चेति। एवं मङ्गलेऽपि उत्साहमङ्गलादि वाच्यम्। यदाहुः—

उत्साहहेलावदनाडिलाद्यैः[9], यद् गीयते मङ्गलवाचि किञ्चित्।
"तद्रूपकाणामभिधानपूर्वं[10], छन्दोविदो मङ्गलमामनन्ति ॥ ४०.१ ॥

तैरेव धवलैर्व्याजात् पुरुषः स्तूयते यदा ॥
तद्वदेव तदानेको धवलोऽप्यभिधीयते ॥ ४०. २ ॥

---

1) इंदहु तुहुं इत्यत्र इन्द्राच्चं गुणैरधिकः स्वर्गस्यापि प्रभुत्वं मया दृष्टः यस्मादमरविलासिनीगीतके तव परा महती कीर्तिः श्रूयते। एतावता राज्ञोऽतिशयो द्योतितोऽमरविलासिनीभिस्तवं गीयते। 2) तुह असिलट्ठिहिं इत्यत्र हे नरपते तव खड्गयष्ट्या मङ्गलनिमित्तं निर्मलस्त्वत्किंकरैरणी विस्तारिता संगरमण्डपे। कैः। दारितमदकलकुम्भस्थलमौक्तिकगुच्छैः। समूहैरित्यर्थः। कस्मिन्सति। विजयलक्ष्म्याः विवाहमहोत्सवे सति। 3) तन्नामाद्ये इत्यत्र धवलमङ्गलेति नामद्वयम्। 4) तद्रूपकाणामित्यत्र उत्साहादिरूपकाणामभिधानपूर्वके पूर्व। तैरेवेति मया उत्साहादिभिरेव। तद्वदेवेत्यत्र तद्रूपकाणामभिधानपूर्वके पूर्व।

---

१ अमरधवलं A. २ इंदह P. ३ सग्गु K (!) ४ चाहिअउ DCD. ५ निसामिइए P. ६ मंगलकारिणि ABD. ७ मोत्तियगोच्छिहिं P. ८ भायागीते A. ९ दोहडीनाम् A. १० तद्रूपनामभि० A. ११ मङ्गल्या० B.

देवगानं फुल्लडकम् ॥ ४१ ॥

उत्साहादिना येनैव देवो गीयते तत्फुल्लडकम् ॥ ४१ ॥

गाने चिदौ झम्बटकम्[1] ॥ ४२ ॥

यस्य कस्यचिद्गाने चगणत्रयं द्विमात्रश्च पादे चेत्तदा झम्बटकम्। यथा—

"पहु तुह वेरि[2] अरण्णि गय, निच्चु वि निवसहिं जिम्व ससय।
घणकंटयदूसंचरेणि[3], तहिं झंबडइ करीरवणि ॥ ४२.१ ॥

वक्ष्यमाणा गन्धोदकधारैवेयं गानवशाज्झम्बटकसंज्ञां लभते ॥ ४२.१ ॥

उत्साहादिप्रकरणम्।

*

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ उत्साहादिप्रतिपादनः पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥

ग्रन्थाग्रं १८८; उभयं २२८४।

---

1) पहु तुह इत्यत्र हे प्रभो तव वैरी अरण्यगतः सन् नित्य यथा तातत्वे निवसति तथायम्। क। करीरवने। कीदृशे। अनुषसंहते निम्ननिमिते घनकण्टकदुःसंचरे।

इत्याचार्येति पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥

---

१ झम्बटक H. २ वेरि रण्णि A; वेरि अरण्णि P. ३ दुसंचरणि M.

अथ षष्ठोऽध्यायः ।

सन्ध्यादौ कडवकान्ते च ध्रुवं स्यादिति ध्रुवा ध्रुवकं घत्ता वा ॥ १ ॥

कडवकसमूहात्मकः सन्धिस्तस्यादौ । चतुर्भिः पद्धडिकाद्यैश्छन्दोभिः कडवकम् । तस्यान्ते ध्रुवं निश्चितं स्यादिति ध्रुवा, ध्रुवकं, घत्ता चेति[1] संज्ञान्तरम् ॥ १ ॥

सा त्रेधा षट्पदी चतुष्पदी द्विपदी च ॥ २ ॥

सेति ध्रुवा ॥ २ ॥

कडवकान्ते प्रारब्धार्थोपसंहारे आद्ये छड्डणिका च[2] ॥ ३ ॥

प्रारब्धस्य प्रकरणायातस्यार्थस्य कडवकान्ते भङ्गन्तरेणाभिधाने षट्पदीचतुष्पद्यावेव छड्डणिकासंज्ञे । न केवलं ध्रुवादिसंज्ञे छड्डणिकासंज्ञे चेति चार्थः ॥ ३ ॥

षट्पदीचतुष्पदीध्रुवयोश्च सप्तकलादयः सप्तदशकलान्ताः पादा भवन्तीति[1] तेषु गणनियममाह—

ध्रुवायां छैः कलाभिः पादे चतौ पदौ वा ॥ ४ ॥

ध्रुवायां छैरिति सप्तभिः कलाभिः पादे चतुर्मात्रत्रिमात्रौ पञ्चमात्रद्विमात्रौ वा गणौ भवतः ॥ ४ ॥

जैः पतौ पदौ चौ वा ॥ ५ ॥

जैरित्यष्टभिः कलाभिः पादे पञ्चमात्रत्रिमात्रौ षण्मात्रद्विमात्रौ द्वौ वा चतुर्मात्रौ गणौ भवतः ॥ ५ ॥

ह्रैः पतौ तिः पचौ वा ॥ ६ ॥

ह्रैरिति नवभिः कलाभिः पादे षण्मात्रत्रिमात्रौ त्रिमात्रत्रयं पञ्चमात्रचतुर्मात्रौ वा गणौ भवतः ॥ ६ ॥

जैश्चादौ पचौ पौ वा ॥ ७ ॥

जैरिति दशभिः कलाभिः पादे चतुर्मात्रद्वयद्विमात्रौ षण्मात्रचतुर्मात्रौ द्वौ वा पञ्चमात्रौ गणौ भवतः ॥ ७ ॥

अथ षष्ठाध्यायस्य पर्यायाः प्रारभ्यन्ते ।

1) आद्ये छड्डणिका चेत्यत्र प्रथमे षट्पदीचतुष्पद्यौ [छड्डणिका]संज्ञे ।

---

१ पद्धटिकादै. P. २ चेति BCN. ३ भवन्ति तेषु P. ४ पञ्चमात्रौ वा गणौ० A.

टैश्चपदं पचदं पदतं चातौ वा ॥ ८ ॥

टैरित्येकादशभिः कलाभिः पादे चतुर्मात्रपञ्चमात्रद्विमात्राः पञ्चमात्रचतुर्मात्रद्विमात्राः षण्मात्रद्विमात्रत्रिमात्राश्चतुर्मात्रद्वयत्रिमात्रौ वा गणा भवन्ति ॥ ८ ॥

ठैश्चपतं पचदं पादौ चिर्वा ॥ ९ ॥

ठैरिति द्वादशभिः कलाभिः पादे चतुर्मात्रपञ्चमात्रत्रिमात्राः षण्मात्रचतुर्मात्रद्विमात्राः षगणद्वयद्विमात्रौ चतुर्मात्रत्रयं वा गणा भवन्ति ॥ ९ ॥

डैः पातौ चापौ पचतं वा ॥ १० ॥

डैरिति त्रयोदशभिः कलाभिः पादे पञ्चमात्रद्वयत्रिमात्रौ चतुर्मात्रद्वयपञ्चमात्रौ षण्मात्रचतुर्मात्रत्रिमात्रा वा गणा भवन्ति ॥ १० ॥

ढैश्चिदौ पचचं वा ॥ ११ ॥

ढैरिति चतुर्दशभिः कलाभिः पादे चतुर्मात्रत्रयद्विमात्रौ पचचा वा गणा भवन्ति ॥ ११ ॥

णैश्चितौ पिर्वा ॥ १२ ॥

णैरिति पञ्चदशभिः कलाभिः पादे चतुर्मात्रत्रयत्रिमात्रौ त्रयो वा पञ्चमात्रा गणा भवन्ति ॥ १२ ॥

तैः पचादं चीर्वा ॥ १३ ॥

तैरिति षोडशभिः कलाभिः पादे षण्मात्रचतुर्मात्रद्वयद्विमात्राश्चत्वारो वा चतुर्मात्रा गणा भवन्ति ॥ १३ ॥

थैः पचातं चिपौ वा ॥ १४ ॥

थैरिति सप्तदशभिः कलाभिः पादे षण्मात्रचतुर्मात्रद्वयत्रिमात्राश्चतुर्मात्रत्रयपञ्चमात्रौ वा गणा भवन्ति ॥ १४ ॥

एवं च सप्तादिसप्तदशान्तकलौघेभ्यस्त्रिभिरतुल्यैः[1] तुल्यातुल्यैः तुल्यैर्वार्धे पादा यत्र भवन्ति सा विदग्धगोष्ठीगरिष्ठा षट्पदी ध्रुवा। षट्पदीषु चाद्यस्य पादस्य द्वितीयेन तृतीयस्य षष्ठेन चतुर्थस्य पञ्चमेनानुप्रासः कर्तव्यः। चतुष्पदीष्वाद्यस्य द्वितीयेन तृतीयस्य चतुर्थेन। अन्तरसमासु सङ्कीर्णासु च प्रायेण द्वितीयस्य चतुर्थेनानुप्रासः कार्यः। तत्र षट्पदीभेदानाह—

तृतीयषष्ठयोर्दशादिसप्तदशान्ताः कलाः शेषेषु
सप्त षट्पदी षट्पदजातिरष्टधा ॥ १५ ॥

---

1) त्रिभिरतुल्यैरिति-तुल्यकलालक्षणं वा अर्धसमं एकः पादोऽपरं द्वयं चान्यत्। अथवा सर्वैरप्यन्यैः।

---

१ कार्य. A. २ कर्तव्य. A.

तृतीयपष्ठयोः पादयोः दशादयो मात्राः एकैकवृद्ध्या यावत् सप्तदश, अन्येषु चतुर्षु पादेषु सप्तैव यत्र भवन्ति, सा पद्मपदजातिर्नाम पद्मपदी भवति । सा च दशादीनां सप्तदशान्तानामष्टविधत्वादष्टधा । तत्राद्या यथा—

"इअ नारिहिं, रससारिहिं, मुद्धपरिमलल्लुद्धउ ।
ढुरु ढोल्लइ, न हु मेल्लइ, छप्पयँगणु मुद्धउ ॥ १५.१ ॥

एवं शेषभेदेषूदाहार्यम् ॥ १५.१ ॥

अष्टोपँजातिः ॥ १६ ॥

तृतीयपष्ठयोः पादयोर्दशादिसप्तदशान्ताः कलाः शेषेष्वष्टौ चेत्तदोपजातिर्नाम पद्मपदी । पूर्ववदष्टधा । तत्राद्या यथा—

"इअ उवजाइहिं, सुरहिअवाइहिं, गुंजिरघणछप्पउ ।
उव वण सारउ, केअइफारउ, कर्सु नवि रइ अप्पउ ॥ १६.१ ॥

एवं शेषभेदेषूदाहार्यम् ॥ १६.१ ॥

नवावजातिः ॥ १७ ॥

तृतीयपष्ठयोः पादयोर्दशादिसप्तदशान्ताः कलाः शेषेषु नव चेत्तदा अवजातिर्नाम पद्मपदी । पूर्ववदष्टधा । तत्राद्या यथा—

"इअ वणराइहिं, अहिणवजाइहिं, छप्पउ परिभमइ ।
मालइरत्तउ, महुरसमत्तउ, जलयागमसमइ ॥ १७.१ ॥

एवं शेषभेदेषूदाहार्यम् । एवं पद्मपदजात्युपजात्यवजातीनां प्रत्येकमष्टविधत्वाच्चतुर्विंशतिधा पद्मपदी ॥ १७.१ ॥

चतुष्पदी वस्तुकं वान्तरसमार्धसमा संकीर्णा सर्वसमा च ॥ १८ ॥

वस्तुकमिति चतुष्पद्या एव नामान्तरम् । "तुल्यसमपादा तुल्यविषमपादा च अन्तरेण व्यवधानेन समान्तरसमा । तुल्यप्रथमद्वितीयपादा तुल्यतृतीयचतुर्थपादा चार्धे सममसा अर्धसमा । व्यामिश्रा सङ्कीर्णा । तुल्यचतुष्पादा सर्वसमा ॥ १८ ॥

---

1) इअ नारिहिं इत्यत्र एव रससारायाः नार्याः मुग्धपरिमलल्लुब्धः सन् मुग्धः षट्पदगणः पार्श्वे न मुञ्चति । हु निश्चितम् । 2) इअ उवजाइहिं इत्यत्र गुञ्जद्भुपट्पदं सारं प्रधानं केतकीस्कारं एतद्वने कस्य रइं रतिं नार्पयति । काभिः । उपजातिभिः समीपस्थजातिभिः । कर्पूराभिः । सुरभिवाताभिः । 3) इअ वनराहिमित्यत्र एव षट्पदोऽभिनवजातिषु वनराजिषु परिभ्रमति । कः । जलदागमसमये मेघसमये । कीदृशः । मालतीरक्तः । पुनः कीदृग् । मधुरसमत्तः । 4) तुल्यसमपादेति – तुल्यौ सदृशौ समौ द्वितीयतुर्यौ पादौ यस्याः अथवा तुल्यौ विषमौ प्रथमतृतीयौ यस्याः इति सङ्केतेनान्तरे व्यवधाने भवति ।

---

१ परिभम्ड॰ क. २ इर ग; मुद्ध ङ. ३ मिल्ल क. ४ गण ङ, गुण ब. ५ अहो पद्मावतीः ब; अहो उपजातीः ग, ङ इअ ग;

तत्रान्तरसमाः प्राह—

[1]चतुष्पदी कला ओजे सप्ताद्याः षोडशान्ताः समे प्रत्येकं सैकाः सप्तदशान्ताः [2]चम्पककुसुम-सामुद्रक-मल्हणक-सुभगविलास-केसर-रावण-हस्तक-सिंहविजृम्भित-मकरन्दिका-मधुकरविलसित-चम्पककुसुमावर्त्ताः (१०)। मणिरत्नप्रभा-कुङ्कुमतिलक-चम्पकशेखर-क्रीडनक-चकुलामोद-मन्मथतिलक-मालाविलसित-पुण्यामलक-नवकुसुमितपल्लवाः (९)। मलयमारुत-मदनावास-माङ्गलिका-अभिसारिका-कुसुमनिरन्तर-मदनोदक-चन्द्रोद्द्योत-रत्नावल्यः (८)। भ्रूवक्रणक-मुक्ताफलमाला-कोकिलावली-मधुकरवृन्द-केतकीकुसुम-नवविद्युन्माला-त्रिवलीतरङ्गकाणि (७)। अरविन्दक-विभ्रम-विलसितवदन-नवपुष्पन्धय-किन्नरमिथुनविलास-विद्याधरलीला-सारङ्गाः (६)। कामिनीहास-अपदोहक-प्रेमविलास-काञ्चनमाला-जलधरविलसिताः (५)। अभिनवमृगाङ्कलेखा-सहकारकुसुममञ्जरी-कामिनीक्रीडनक-कामिनीकङ्कणहस्तकाः (४)। मुखपालनतिलक-वसन्तलेखा-मधुरालापिनीहस्ताः (३)। मुखपङ्क्ति-कुसुमलतागृहे (२)। रत्नमाला[3] (१)। इति पञ्चपञ्चाशद्भेदाः[4] ॥ १९ ॥

ओजयोः सप्ताद्याः षोडशान्ताः कलाः समयोस्ता एवैकाधिकाद्याः सप्तदशान्ताः प्रत्येकं यत्र भवन्ति सा चतुष्पदी चम्पककुसुमादिसंज्ञा। अयमर्थः—ओजे सप्त कलाः समे सैकाद्या अष्टाद्याः सप्तदशान्ता यत्र भवन्ति सा चम्पककुसुमादिभेदेन दशविधा। एवमोजेऽष्टकलाः समे सैकाद्या नवाद्याः सप्तदशान्ता यत्र भवन्ति सा मणिरत्नप्रभादिभेदेन नवविधा। तथा ओजे नव समे सैकाद्याः दशाद्याः सप्तदशान्ता यत्र भवन्ति सा चतुष्पदी मलयमारुतादिभेदेनार्ष्टविधा। यावदोजे षोडश समे सप्तदश यत्र भवन्ति सा रत्नमालासंज्ञा चतुष्पदी। एवं पञ्चपञ्चाशच्चतुष्पदीभेदाः। तत्रौजे सप्त समेऽष्टौ चम्पककुसुमम्। यथा—

[5]"अंगचंगिम, जइ गोरंगिहिं।
चंपयकुसुम, ता कह अग्घहिं[6]" ॥ १९.१ ॥

ओजे सप्त समे नव सामुद्रकम्। यथा—

"जइ वोल्लइ, धण उक्कंठिअ।
सा मुद्दउ, मुद्ध कलयंठिअ ॥ १९.२ ॥

---

1) अंगचंगिमेत्यत्र यदि गौराङ्गया अङ्गचङ्गिमा स्यात्तदा चम्पककुसुमानि कथं अर्घ्यन्ते। 2) जइ बोल्लइ इत्यत्र यदि सा उत्कण्ठिता सती धन्या जल्पति तदा कलकण्ठी मुग्धं मुद्रयतु।

---

१ चतुष्पदी dropped in BEFP. २ नव dropped in H. ३ रत्नमाला चेति पद्य० BDGH. ४ भेदाः ABCNP. ५ सा अन्तरसमा च० P. ६ अट्टया A. ७ अग्घिहिं E. अग्घहि P. ८ पद्य DS.

ओजे सप्त समे दश मल्हणकम्। यथा—

"कहिं हंसिहिं, तलोव्वेल्लगउं।
जेउ दीसइ, गउ तहिं मल्हणउं॥ १९.३॥

ओजे सप्त समे एकादश सुभगविलासः। यथा—

"पइं विणु तहिं, सुहय विलासु कवणु।
विणु चंदउं, मुद्ध जामिणिहिं ठवणु॥ १९.४॥

ओजे सप्त समे द्वादश केसरम्। यथा—

"भेडि' माणु, वल्लहिं करि अणुराउ।
ओ उद्दिउ, केसरउसुमगंधउ॥ १९.५॥

ओजे सप्त समे त्रयोदश रावणहस्तकः। यथा—

"लेहि वीण, करि धरि रावणहत्थउ।
जिणमन्नणि, सुरहिं दिण्णु सम्वहत्थउ॥ १९.६॥

ओजे सप्त समे चतुर्दश सिंहविजृम्भितम्। यथा—

"तुरयाणु वि, जं मग्गहु न तिणु चरइ।
तं अज्ज वि, सीहविजंभिउ विण्णेरइ॥ १९.७॥

ओजे सप्त समे पञ्चदश मकरन्दिका। यथा—

"तुसुमंजरि, नवि लग्गइ अलि अवलिरिंजइ।
आमलउ, मालइहि वहुमयरंदिअहिं॥ १९.८॥

ओजे सप्त समे षोडश मकरविलसितम्। यथा—

"जं जाइहि, कित्ति दिअंतरु धवलइ सयलु।
तं जाणेसु, माणिणि महुअरविलसिउ पवलु ॥ १९.९ ॥

ओजे सप्त समे सप्तदश चम्पककुसुमावर्तः। यथा—

"निअइ झुणइं, परिरंभइ चुंवइ महुसुंडउ।
अलि मुज्झइ, चंपयकुसुमावट्टि निवुड्डउ ॥ १९.१० ॥

एवं दश ॥ १९.१० ॥

तथा। ओजे अष्टौ समे नव मणिरत्नप्रभा। यथा—

"मणिरयणपहा-, पयडिअगिरिगुंहु।
साहइ भरहु, सयलु वि दिसिमुहु ॥ १९.११ ॥

ओजे अष्टौ समे दश कुङ्कुमतिलकम्। यथा—

"रेहइ चंदो, नवपयडिअकलओ।
पुव्वदिसाए, किर कुंकुमतिलओ ॥ १९.१२ ॥

ओजे अष्टौ समे एकादश चम्पकशेखरः। यथा—

"अलिरवगीई, कयचंपयसेहरं।
महुसमयसिरी, उंअ जणहु मणोहर ॥ १९.१३ ॥

ओजे अष्टौ समे द्वादश क्रीडनकम्। यथा—

"सहि वट्टुलउ, चंदुल्लउ पडिहाइ।
रयणिवहूए, कीलणगंडुउ नाई ॥ १९.१४ ॥

ओजे अष्टौ समे त्रयोदश बकुलामोदः। यथा—

"मन्नावि प्रिउ, जइ वि हु सो कयदुन्नउ।
जं महमहइ, दुसहउ बउलामोअउ ॥ १९.१५ ॥

---

1) जं जाइहिमित्यत्र। यत् जातिः कीर्त्या (जातेः कीर्तिः?) धवलीकरोति। किम्। दिगन्तरम्। तत् हे मानिनि मानय भ्रमरविलसितम्। अत्र अन्योक्तिः स्वप्रथा तस्या गौणकथनम्। 2) निअइ झुणइ इत्यत्र हे मित्र पश्य। शौण्ड इव शौण्डो मद्यपः। मत्तश्चासौ शौण्डश्च मत्तशौण्डोऽलिर्निरीक्षते ध्वनति परिरम्भति उपगूहति चुम्बति चम्पककुसुमावर्ते निमग्नः सन्मुह्यति मोहं भजति। 3) मणिरयणेत्यत्र मणिरत्नप्रभाभिः प्रकटिता गिरिगुम्फा यस्मात् स तथा। एवंविधो भरतः साधयति सकलमपि दिङ्मुखम्। 4) रेहइ चंदो इत्यत्र राजते चन्द्रः नूतना प्रकटिता कला येन सः। किलेति उत्प्रेक्षते। पूर्वदिशः कुङ्कुमतिलकः। 5) अलिरवेत्यत्र अलिरव एव गीतिर्गानं यस्याः सा कृतचम्पक एव शेखरो यया सा। अयं क्षीधर्मः। एवंविधां जनानां मनोहरां मधुसमयश्रीं(श्रियं) पश्य विलोकयेत्यर्थः। 6) सहि वट्टुलउ इत्यत्र हे सखि वृत्तश्चन्द्रः प्रतिभाति। नाइ इति उत्प्रेक्षते। रजनीवध्वाः क्रीडागेन्दुकः। 7) मन्नावि इत्यत्र हे सखि यद्यपि कृतदुर्नयः प्रियो वर्तते तथापि। मन्नावीति—आत्मसात्कुरु। यस्मान्महमहेति इति गन्धं भजते। कः। दुःसहो बकुलामोदः। यस्तवागमसूचनमिति।

---

१ दिअंतरु N; दिगंतरु A. २ जाणिसु B; माणसु K; ३ विलसिअ A. ४ पवलु A. ५ जझुणइ A; झुणइ N; झणइ B. ६ निवुड्डओ N. ७ गिरिगुह BP. ८ भरहो P. ९ सिहर N. १० ओअ N. ११ वहुलओ N. १२ गेंडउ P; गंडुओ N. १३ ताइ N. १४ प्रिओ—दुमओ N. १५ मोअओ N.

ओजे अष्टौ समे चतुर्दश मन्मथतिलकम् । यथा—

[1]निम्मलि गयणि, समुग्गउ चंदु विहावइ ।
रइए रइउ, वम्महतिलउ नवु नावइ ॥ १९.१६ ॥

ओजे अष्टौ समे पञ्चदश मालाविलसितम् । यथा—

[2]कमलिणिपासि, अलिमाला विलसिअ संपइ ।
कलरवमिसिण, किर मित्तसमागमु जंपइ ॥ १९.१७ ॥

ओजे अष्टौ समे षोडश पुण्यामलकम् । यथा—

[3]मइं असरण तुहु, अइनिद्दय नडसि कुसुमाउह ।
जं किर पुण्णा, मलयसमीरिण सयल वि कउहं ॥ १९.१८ ॥

ओजे अष्टौ समे सप्तदश नवकुसुमितपल्लवः । यथा—

[4]कंपिअ निअवि, नवकुसुमिअपल्लव सललिअ लय ।
संभरि दइअ, पथिअसत्थ तक्खणि गय विलय ॥ १९.१९ ॥

एवं नव ॥ १९.१९ ॥

तथा । ओजे नव समे दश मलयमारुतः । यथा—

[5]देक्खिवि वेल्लडी, मलयमारुअधुआ ।
सुमरिवि गोरडी, पथिअसत्थ मुआ ॥ १९.२० ॥

ओजे नव समे एकादश मदनावासः । यथा—

[6]जं धणलोअण, झसझय चल दीसहिं ।
मयणावासउ, तं थणगुडरि सइं ॥ १९.२१ ॥

---

1) निम्मलि गयणीत्यत्र निर्मले गगने समुद्गतश्चन्द्रो विभाति । नावइ इति इवार्थे । विभाव्यते रत्या रचितो मन्मथतिलक इव । 2) कमलिणिपासीत्यत्र कमलिनीपार्श्वे साम्प्रत अलिमाला विलसति । किलेति सभाव्यते । कलरवमिषेण मित्रस्य सूर्यस्य समागम जपति कथयति । 3) मइ असरण इत्यत्र तस्मात्कारणात् हे कुसुमायुध मां अशरणा खेदयसि यस्मान्मलयसमीरणेन सकला अपि ककुभ पूर्णा । 4) कंपिअ निअवीत्यत्र कम्पिता । निअवीति—दृष्ट्वा । कुसुमितपल्लवा सलीला लता । स्मृत्वा च दयिता पथिकसार्थ-विलय मरण प्राप्त । 5) देक्खिवीत्यत्र दृष्ट्वा । का । मलयमारुतधुता वल्ली । ततो गौरीः स्मृत्वा । ता अपि चञ्चलरूपा भवन्ति । पथिकसार्थो मृत । 6) ज धण इत्यत्र यत् धन्याया लोचनान्येव झषध्वजा मत्स्यकेतवश्चला दृश्यन्ते । लोचनानि हि चपलत्वात् मीनरूपाणि वर्ण्यन्ते । तत् ज्ञायते मदनावासाः स्तनप्रदेशे सन्तीति ।

---

१ निम्मलग० A २ समुग्गओ BN ३ रइप० N ४ तिलओ N ५ विसल्लसिअ N, विलसइ E ६ मेत० गसु B, मित्तसमागम A ७ अइनिद्दय N ८ कुसुमहि उह N ९ पुप्फा V, पुन्ना P. १० कओह S. ११ सत्थ E १२ दिक्खिवि E १३ मुअ BP १४ मुअ BP १५ दीसइ P १६ थणगुहिर N, थणगुहिर AO, थणगुहरि S.

ओजे नव समे द्वादश माङ्गलिका। यथा—

[1]प्रिअमहुसंगमि, [2]उअ मंगलिअइं करइं।
किंसुअरूविण, वणसिरि घट्टइं धरइ॥ १९.२२॥

ओजे नव समे त्रयोदश अभिसारिका। यथा—

[3]काली रत्तडी, घणिहिं नहंगणु रुद्धेउ।
तो वि न वट्टहिं, अहिसारिअजणु खुद्धेउ॥ १९.२३॥

ओजे नव समे चतुर्दश कुसुमनिरन्तरः। यथा—

[4]सिद्धत्थ पुलय, कुसुम निरन्तरु हसिउ सिउ।
नवदइआगमि, अंगि जि मंगलु धणइ किउं॥ १९.२४॥

ओजे नव समे पञ्चदश मदनोदकम्। यथा—

[5]घणरव दूसहा, दूहवइ मयणोदउ हिअउ।
पिअदूरट्ठिआ, पवसिअरमणिअणु कह जिअउ॥ १९.२५॥

ओजे नव समे षोडश चन्द्रोद्द्योतः। यथा—

[6]कोइलकलरवु, चंदणु चंदुज्जोअविलासु।
वल्लहसंगमि, अमयरसु विरहि जलिउ हुआसु॥ १९.२६॥

ओजे नव समे सप्तदश रत्नावली। यथा—

[7]मालइमालहिं, अलि सहहिं नवमयरंदसइण्ह।
[8]नं रयणावलि, नीलमय पाउसदइइंण दिण्ण॥ १९.२७॥

एवमष्ट॥ १९.२७॥

तथा। ओजे दश समे एकादश भ्रूवंक्रणकम्। यथा—

[9]रेहइ तरुणिअणु, भूवंकणचंगउ।
आणावइ नाइ, तिहुअणजइं अंगउ॥ १९.२८॥

---

1) प्रियमधुसंगमीत्यत्र उभत्ति—पश्य। वनश्रीः प्रियो वल्लभो यो मधुर्वसन्तस्तस्य सगमे सबन्धे माङ्गलिकानि करोति। किंशुकरूपेण घट्टयुगलं दधाति। घटो घाटडीति प्रसिद्धा। 2) काली रत्तेत्यत्र रात्रिः कृष्णा तथा गगनाङ्गणं घनैः रुद्धं तथापि मार्गे अभिसारिकाजनो न क्षुब्धः। भीरुभाव इत्यर्थः। 3) सिद्धत्थेत्यत्र पुलका एव सिद्धार्थाः। सितं हसितं कुसुमानि। निरन्तर नवदयितसंगमे अङ्गे मङ्गलं भार्यया कृतम्। 4) घणरव दूसहेत्यत्र घनानां रवा दुःसहाः। दुनोति मदनोदयो हृदयम्। प्रियदूरस्थितः दूरस्थितधनिकः। प्रोषितानां रमणीजनः कथं जीवति। 5) कोइलकलेत्यत्र कोकिलकलरवः चन्दनं चन्द्रोद्द्योतविलासः एतान्येव वल्लभसंगमे अमृततमः। विरहे सति तान्येव ज्वलितो हुताशः। 6) मालइमालहिं इत्यत्र मालतीमालायां अलयः शोभन्ते। कीदृशा अलयः। नवमकरन्दसदृष्णाः। किंमित्यभ्याहारः। प्रावृड्-दयितेन दत्ता नीलेन्द्रमयी रत्नावलीव। णं इति उपमानार्थः। 7) रेहइ इत्यत्र राजते तरुणीजनः भ्रूचक्रेण चङ्गः। इव उत्प्रेक्षते। त्रिभुवनजयी अनङ्गः आज्ञापयति जनानामिति शेषः।

---

१ ओअ DS. २ पट्टय P. ३ रुद्धउं D; रुद्धओ N. ४ रुद्धओ N. ५ किसउ D. ६ कहि B. ७ सयण्ह P. ८ णं K; तं E; न N. ९ पाउसदयण B, पाओसदइसदा S १० दिण A. ११ भूचक• DKN; १२ तरुणिअण S. १३ भूचंकणचंगओ DN. १४ जवि A.

ओजे दश समे द्वादश मुक्ताफलमाला। यथा—

[1]"तारावलि भणि मा, भणि मुत्ताहलमाली।
रइकलहिण त्रुट्टी, ससिरयणिहिं सुविसाली॥ १९.२९॥

ओजे दश समे त्रयोदश कोकिलावली। यथा—

[2]"कोइलावलिकए, संगीअइ नच्चावउ।
नवलयविलयाओ, मलयानिलु नट्टावउ॥ १९.३०॥

ओजे दश समे चतुर्दश मधुकरवृन्दम्। यथा—

[3]"फुल्लिअलय निअवि, महुअरेवंद्रिण गीउ तह।
वाहोल्लयनयण, पयमवि पहिअ न दिंति जह॥ १९.३१॥

ओजे दश समे पञ्चदश केतकीकुसुमम्। यथा—

[4]"विंवालिउ भुवणु, नवकेअइकुसुमपराइण।
नं अहिवासिअउं, मयरद्धयकम्मणजोइण॥ १९.३२॥

ओजे दश समे षोडश नवविद्युन्माला। यथा—

[5]"ओ चलचलंतिआ, विप्फुरेइ नवविज्जुमालिआ।
मेहरक्खसस्स, जीहिअव्व दीहरकरालिआ॥ १९.३३॥

ओजे दश समे सप्तदश त्रिवलीतरङ्गकम्। यथा—

[6]"दीहरच्छिआए, पेच्छे सहए तिवलीतरंगयं।
कयतिहुअणविजए, लीहतिअं पिय कामिण कड्ढिअं[7]"॥ १९.३४॥

एवं सप्त॥ १९.३४॥

तथा। ओजे एकादश समे द्वादश अरविन्दकम्। यथा—

[8]"प्रिअहि" मुहु अरविंदु, चलनयण इंदिदिरु।
दंतकंति केसरु, लच्छिविलासमंदिरु॥ १९.३५॥

---

1) तारावलीत्यत्र हे सुभग तारावली मा भण। किं तर्हि मुक्ताफलमालां भण। रतिकलहेन त्रुटितां शशिरजन्योः सुविशालाम्। 2) कोइलावलीत्यत्र कोकिलावलीकृते संगीतके नर्तयतु नवलतावनितां कर्म। मलयानिल एव नर्तकः। 3) फुल्लिअलयेत्यत्र पुष्पितलताः निरीक्ष्य दृष्ट्वा मधुकरवृन्देन तथा गीतं यथा बाष्पार्द्रितनयनाः पथिका पदमपि न ददति। के। पथिकाः। 4) विंवालिउ इत्यत्र। नूतनकेतकीपरागेण भुवनं विंवालितमिति—व्याप्तम्। नमिति—उत्प्रेक्षायाम्। मकरध्वजकार्मणयोगेनाधिवासितमिव। 5) ओ चलेत्यत्र विस्फुरति नवविद्युन्मालिका। इयमुत्प्रेक्षते। मेघराक्षसस्य दीर्घा कराला जिह्वेव। 6) दीहरच्छिआए इत्यत्र दीर्घेक्षणाः पश्य राम्ते त्रिवलीपरिवृतं त्रिभुवनविजये कृते कामेन रेखात्रिकमिव कर्षितम्। न मन्मथो भुवनत्रये कोऽपि जयतीति भावः। 7) प्रिअहि मुहु इत्यत्र प्रियायाः मुखं कमलं वर्तते चलनेत्रौ(त्रे) भ्रमरौ दन्तकान्तिः केसराणि लक्ष्मीविलासमन्दिरम्।

---

१ रयणिहिं CDS; २ सुविसालि N. ३ वलिलयाओ A. ४ मलयानिल D. ५ वंदिण S; वइण C. ६ वहुनयन० B. ७ पराइन D. ८ महर० A. ९ जोइनन्त N. १० दीहरच्छीआए AN. ११ पिच्छ E. १२ लिहुअन A. १३ कीअं N. १४ प्रियहि AB; प्रियहि E. १५ केसर A. १६ लिलासिनं० B. लिलसनदिरु A.

ओजे एकादश समे त्रयोदश विभ्रमविलसितवदनम्। यथा—

"कुइ धन्नु जुआणउ, विअसिअदीहरनयणिए।
माणिज्जइ तरुणिए, विब्भमविलसिअवयणिए॥ १९.३६॥

ओजे एकादश समे चतुर्दश नवपुष्पन्धयम्। यथा—

"सहि पंकोप्पन्नु वि, कमलु तं सलहिउ बुहसइहिं।
जं रसउद्दुसिअहिं, पिज्जइ नवफुल्लंधुअहिं॥ १९.३७॥

ओजे एकादश समे पञ्चदश किन्नरमिथुनविलासः। यथा—

"अविरहिअहं मुइअहं, हरिणहं जि रइसुहु सलीसए।
पर एम्वइ केम्वइ, जसु किन्नरमिहुणविलासए॥ १९.३८॥

ओजे एकादश समे षोडश विद्याधरलीला। यथा—

"मुद्धइ गिज्जंतउ, तुहुं कण्णरसायणु गीउ सुणि।
जिण ओहामिज्जइ, विज्जाहरलीलागीइसुणि॥ १९.३९॥

ओजे एकादश समे सप्तदश सारङ्गः। यथा—

"भीरु वि चंदट्ठिओ, वरि परिसुणिअनाउ सारंगओ।
सीहु न सलहिज्जइ, जइ वि हु दलिअमत्तमायंगओ॥ १९.४०॥

एवं षट्॥ १९.४०॥

तथा। ओजे द्वादश समे त्रयोदश कामिनीहासः। यथा—

"भणहरु तुहुं मुहसररुहु, रयणीअरविब्भमु धरइ।
कामिणि हासविलासु वि, जोण्हापसरहु अणुहरई॥ १९.४१॥

---

1) कुइ धन्नु इत्यत्र कोऽपि धन्यो युवा विकसितदीर्घनयनया तरुण्या मान्यते। कीदृश्या। विभ्रमविलसितवदनया। तस्याः रूपोत्कर्षः। 2) सहि पंकोप्पन्नु वीत्यत्र हे सखि तत्कमलं बुधशतैः सलहितं श्लाघितं यत् रसोद्भुसितैः पुष्पंधयैः पीयते। पङ्कोत्पन्नमिति निन्दा। 3) अविरहिअहं इत्यत्र अविरहितानां मुदितानां हरिणानामेव रतिसुखं क्षिप्यति भवतीति। परमेवमेव कथमपि यशः किन्नरमिथुनविलासे। दम्पत्योः प्रीत्युपरि तस्योपमानात्। 4) मुद्धइ गिज्जंतउ इत्यत्र मुग्धया गीयमानं त्वं कर्णरसायनं गीतं शृणु। येन गीतेन विद्याधरलीलागीतिः पराभूयते निराक्रियते इत्यर्थः। 5) भीरु वीत्यत्र भीरुरपि चन्द्रस्थितः वरः प्रधानः। कः। विख्यातनामा सारङ्गो हरिणः। परं सिंहो न श्लाघ्यते यद्यपि दलितमत्तमातङ्गः। 6) मणहरु तुहेत्यत्र हे सुभगे तव मुखसरोरुहं रजनीकरविभ्रमं धरति। हे कामिनि तव हास्य ज्योत्स्नाप्रसर अनुहरति तच्छीलं भजतीत्यर्थः।

---

१ धण्णु A. १९.३६ is dropped in D. २ नयणीए AS. ३ वयणीए AS. ४ पंकुप्पनु वि AB. ५ लसहिओ N. ६ उद्धुसिएहिं S. ७ कीम्वइ ABDN, काम्वइ S. ८ नमु S ९ कम ACDNP. १० द्विरगउ-गउ BE. ११ नामु AC; नाउं P; नाम्वु DS. १२ सलहिज्जउ P. १३ मणहर C. १४ तुहु ACDN. १५ सररुह AN. १६ हासुवि० P. १७ पसरइ P, पसरहो B. १८ अणुसरहु A.

ओजे द्वादश समे चतुर्दश अपदोहकः। यथा—

[1]एत्थु करिमि भणि काइं, प्रिउ[2] न गणइ लग्गी पाइ।
छड्डेविणु[3] हउं मुक्की, अवदोहय जिम्व किर गोवि॥ १९.४२॥

ओजे द्वादश समे पञ्चदश प्रेमविलासः। यथा—

[4]कित्तिउं[5] वण्णउं मयणु, किअउ जिण सो वि नारायणु[6]।
तहुं[7] गोवालीअणहु, घणपिम्मविलासपरायणु॥ १९.४३॥

ओजे द्वादश समे षोडश काञ्चनमाला। यथा—

[8]दीसइ सुरधणुलट्ठी, सामलगोरवण्णसोहिल्ली।
मरगयकंचणमाली, णं घणलच्छिहि कंठि नवल्ली॥ १९.४४॥

ओजे द्वादश समे सप्तदश जलधरविलसिता। यथा—

[9]पेक्खिऊंण[10] गयणयलि, नवजलहरविलसिअ चलविज्जुल।
संभरंति निअपिअंहं[11], पहिअदइअ गलिअंसुअकज्जल॥ १९.४५॥

एवं पञ्च॥ १९.४५॥

तथा। ओजे त्रयोदश समे चतुर्दश अभिनवमृगाङ्कलेखा। यथा—

[12]नहयलवराहदाढिआ, वारुणिवहूइ णिडालिआ।
अहिणवमिअंकलेहिआ[13], उप्पई[14] पीइं निहालिअ[15]॥ १९.४६॥

ओजे त्रयोदश समे पञ्चदश सहकारकुसुममञ्जरी। यथा—

[16]वणलच्छिकणयरसणिआ[17], कुसुमाउहविजयपडाइआ।
सहयारकुसुममंजरी, उअह[18] महुसमएण पयडिआ॥ १९.४७॥

---

1) इत्थु करिमि भणीत्यत्र हे सखि अत्रार्थे किं करोमि। भण कथय। प्रियो न गणयति। मामिति शेषः। किम्। पादपतितामप्यहं त्यक्त्वा(क्ता)। मुक्ताऽपदोहका दोहविहीना यथा गौर्मुच्यते। 2) कित्तिउं वण्णउं इत्यत्र मदनं कियद्वर्णयामि। येन सोऽपि नारायणः तथा कृतः। तथेति कथम्। गोपालिकानां घनप्रेमपरायणः। तत्परः इत्यर्थः। 3) दीसइ सुरेत्यत्र दृश्यते सुरधनुर्यष्टिः श्यामलगौरवर्णेन शोभनशीला। णमिति इवोत्प्रेक्षते। मरकतकाञ्चनमाला घनलक्ष्म्याः कण्ठे नूतना। 4) पेक्खिऊणेत्यत्र प्रेक्ष्य गगनतले नवजलधरविलसितं चलविद्युत् स्मरन्ति निजप्रियान् स्वकीयप्रियान् पथिकदयिताः गलिताश्रुकज्जलाः। 5) नहयलेत्यत्र अभिनवमृगाङ्कलेखा निभालिता दृष्टा सती प्रीतिमर्पयति। इयं किं नभस्तलवराहदाढिका अथवा वारुणीदिग्वध्याः ललाटिका तिलकिका इत्यर्थः। 6) वणलच्छिकणयेत्यत्र हे सुभगे जनह पश्य त्वम्। मधुसमयेन सहकारमञ्जरीः प्रकटिताः। इत्युत्प्रेक्षते। वनलक्ष्मीकनकमेखला अथवा कुसुमायुधविजयपताकिका।

---

१ इत्थु BKP. २ पिउ A. ३ छड्डेविणु NS. ४ गाइ ABP. ५ कित्तिओ M. ६ नरायणु S. ७ तह P. ८ पेम्म० BP; पिम्मविलासुप० A. ९ गोरवण N; गोरवन्न ABP. १० पिक्खि० GDNS. ११ प्रियहं A. १२ मयंगले० A. १३ अम्पइ KP; उप्पहि S. १४ निडालिआ B. १५ रमणिआ M. १६ ओअहु A; ओअह M.

ओजे त्रयोदश समे षोडश कामिनीक्रीडनकम् । यथा–

[1]नहलच्छिभालतिलअओ, दिसिकामिणिकीलणगंडुअओ ।
रेहइ पुण्णिमयंकओ, मयणाहिसेअअमयकलसओ ॥ १९.४८ ॥

ओजे त्रयोदश समे सप्तदश कामिनीकङ्कणहस्तकः । यथा–

[2]कवणु सु धन्नउ जिण विणु, कामिणिकंकण हत्थेउ विअलहिं ।
अन्न कि एम्वइ ससिमुहि, हिंडइ उन्नमिईहिं करकमलिहिं ॥ १९.४९ ॥

एवं चत्वारः १९.४९ ॥

तथा । ओजे चतुर्दश समे पञ्चदश मुखपालनतिलकः । यथा–

[3]इह माहवि वम्महनिलय, मलयानिलहल्लिरकिसलय ।
ओ दीसहिं कुसुमाउलय, कामिणिहुं[4] मुहवालण तिलय ॥ १९.५० ॥

ओजे चतुर्दश समे षोडश वसन्तलेखा । यथा–

[5]कुविदो मयणो महाभडो, वणलच्छी अ वसंतरेहिआ ।
कह जीवेउ मामि विरहिणी, मिउमलयानिलफंसमोहिआ ॥ १९.५१ ॥

ओजे चतुर्दश समे सप्तदश मधुरालापिनीहस्तः । यथा–

[6]सुन्दरु तं किउ एंहु सहि, पिउ जं मन्निउ विणयनिसण्णउ ।
तसु अवराहहं सव्वहं वि, महुरालावि हत्थु विइण्णउ ॥ १९.५२ ॥

एवं त्रयः ॥ १९.५२ ॥

---

1) नहलच्छिभालेत्यत्र पूर्णमृगाङ्कः शोभते । इवोत्प्रेक्षते । नभस्तललक्ष्मीभालतिलकं दिक्कामिनीक्रीडनगेन्दुकः दडउ (?) इति प्रतीतम् । अथवा मदनाभिषेकायामृतकलशः । 2) कवणु सु धन्नउ इत्यत्र कः स धन्यो येन विना कामिन्याः कङ्कणानि हस्ताद्विगलन्ति । अन्याः मुग्धाः हे शशिमुखि हिण्डन्ते उन्नमिति– ऊर्ध्वीकृतैः करकमलैः? अपि तु न काप्येवं हिण्डते । त्वं तु ऊर्ध्वीकृतकरकमला हिण्डसे । तेन ज्ञायते तव करकङ्कणानि गलन्ति हस्तयोः । 3) इह माहवि वम्महेत्यत्र इह माधवे वसन्ते मन्मथनिलयमलयानिलचलत्किसलयाः दृश्यन्ते कुसुमाकुलकाः कामिनीनां मुखवालनाः तिलका वृक्षाः । कामिनीनां मुखवालना इति कोऽर्थः । गच्छन्त्योऽपि मुखं पश्चादभिमुखं कृत्वा निरीक्षन्ते । 4) कुविदो मयणो इत्यत्र दुर्विदो मदनो महाभटः । च पुनः । वनलक्ष्मीर्वसन्तेन रेखिता शोभिता । मामीति मन्ये । इदानीं मृदुमलयानिलस्पर्शमोहिता विरहिणी कथं जीवतु । अपि तु नेति 5) सुन्दरु तमित्यत्र सुन्दरं एतत्कृतं तत्सत्यं यत्प्रियो मानितो विनयनिपण्णोऽनतः सन् । तस्य प्रियस्य सर्वेषामप्यपराधानां मधुरालापेन इत्थं वितीर्णः । कृतजलाञ्जलिरित्यर्थः ।

---

१ तिलयउ B. २ कामिणी C. ३ गिंडुअओ P; कंदुअओ A; गंदुअओ N; गेंदुअउ B. ४ पुण्ण• N; पुण्णमयंगओ A; पुण्णमईकओ P. ५ हत्थओ AN. ६ अनु वि A; ७ हिंडहि P. ८ उन्नमिअहिं P. ९ कुसुमाओलय N. १० कामिणिहिं BE. ११ जीवइ A. १२ मउम• BE. १३ फुस• A. १४ किओ एहु N. १५ मण्णिउ N8; मण्णिउ CD. १६ विणयनिसणउ A; विणयनिसन्नउ P. विणयनिसण्णओ N. १७ ज्ञाविण P. १८ हत्थ A. १९ विइण्णओ N, विइन्नओ P.

तथा । ओजे पञ्चदश समे षोडश मुखपङ्क्तिः । यथा—

[1]"परनरमुहपेच्छणविरयेण, पयनहमणिपडिबिंबिअ जि परि ।
दहमुहमुहपंति पलोइआ, सीअँइ भयविम्हयहासकरि ॥ १९.५३ ॥

ओजे पञ्चदश समे सप्तदश कुसुमलतागृहम् । यथा—

[2]"जलइ जइ वि कुसुमलयाहरु, तवइ चंदु जँह गिम्हि दिवायरु ।
तुवि ईसाँभरपरितरलिअ, पिअसहिवयणु न मन्नइ वालिअ ॥ १९.५४ ॥

एवं द्वे १९.५४ ॥

ओजे षोडश समे सप्तदश रत्नमाला । यथा—

[3]"करवालपहारिण उच्छलिअँ, करिसिरमुत्ताहलरयणमालं ।
रेहइ समरंगणि जयसिरिए[4]", उक्खिविअ नाइ सयंवरमाल ॥ १९.५५ ॥

अत्रैकः । एवं पञ्चपञ्चाशद्भेदाः ॥ १९.५५ ॥

व्यत्यये सुमनोरमा-पङ्कज-कुञ्जर-मदनातुर-भ्रमरावली-पङ्कजश्री-किङ्किणी-कुङ्कुमलता-शशिशेखर-लीलालयाः (१०)। चन्द्रहास-गोरोचना-कुसुमबाण-मालतीकुसुम-नागकेसर-नवचम्पकमाला-विद्याधर-कुञ्जककुसुम-कुसुमास्तरणाः (९)। मधुकरीसंलाप-सुखावास-कुङ्कुमलेखा-कुवलयदाम-कलहंस-सन्ध्यावली-कुञ्जरललिता-कुसुमावल्यः (८)। विद्युल्लता-पञ्चाननललिता-मरकतमाला-अभिनववसन्तश्री-मनोहरा-क्षिप्तिका-किन्नरलीलाः (७)। मकरध्वजहास-कुसुमाकुलमधुकर-भ्रमरविलास-मदनविलास-विद्याधरहास-कुसुमायुधशेखराः[11] (६)। उपदोहक-दोहक-चन्द्रलेखिका-सुतालिङ्गन-कङ्केल्लिलतागृहभवनानि[12] (५)। कुसुमित-केतकीहस्त-कुञ्जरविलसित-राजहंस-अशोकपल्लवच्छायाः (४)। अनङ्गललिता-मन्मथविलसित-ओहुल्लणकानि (३)। कज्जललेखा-"किलिकिञ्चिते (२)। शशिविम्बितं चेति (१)। तावद्वा ॥ २० ॥

---

1) परनरमुहेत्यत्र परनरमुखप्रेक्षणविरतया सीतया पदनखमणिप्रतिबिम्बितैव दशमुखमुखपङ्क्तिः परं केवलं प्रलोकिता। नापरा। कथंभूता। भयविस्मयहासकरी। भयं परपुरुषदर्शनात्। विस्मयहासे च बहुमुखत्वेन। 2) जइ जलईत्यत्र यद्यपि कुसुमलतागृहं ज्वलति चन्द्रोऽपि ग्रीष्मे दिवाकरवत् तपति तथापि भर्तुरन्यत्र गत्वागतत्वात् बालिका भर्तृसखीवचनं नाद्रीकुरुते। कोदृशी। ईर्ष्याभरेण परितरला चञ्चला। कोपप्रादुर्भावे चञ्चला भवति। 3) करवालेत्यत्र समराङ्गणे करवालप्रहारात् कौरशीपात् उच्छलिता मुक्ताफलरत्नमाला इह शोभते इत्यपेक्षते। जयश्रिया स्वयंवरमाला उत्क्षिप्ता ऊर्ध्वीकृता। नाइ इवार्थे।

---

१ मुह N. २ विरअए B. ३ पहनह S. ४ सीअए ACDN . ५ जइ A. ६ ईसाभरि BP. ७ उच्छलि N ८ माला ACDNP. ९ समरंगणि c. १० जयसिरिइ DEP. ११ शेषरा P १२ किंकिल्लिभवनानि H; कङ्केलिलतागृहभवनानि G. १३ किलकिञ्चिते H

व्यत्यय इति समे सप्ताद्याः षोडशान्ताः कला ओजे सैकायाः सप्तदशान्ताः प्रत्येकं पूर्ववत्सुमनोरमादिसंज्ञाः चतुष्पद्यो भवन्ति। तत्र समे सप्तकलाः ओजे अष्टौ यत्र भवन्ति सा सुमनोरमा। यथा—

[1]केआरावु, करि मोर मा।
दूरि स गोरी, सुमणोरमा॥ २०.१॥

समे सप्त ओजे नव पङ्कजम्। यथा—

[2]निअवि वयणु तहिं, विब्भमपउं।
[3]नं विहिण खित्तु, द्रहि पंकउ॥ २०.२॥

समे सप्त ओजे दश कुञ्जरः। यथा—

[4]गज्जइ घणमाला, घणघटहड।
[5]नं मयँणनिवइणो, कुंजरघड॥ २०.३॥

समे सप्त ओजे एकादश मदनातुरः। यथा—

[6]खलिअक्खरउं वयणु, मुहुं पंडरु।
तुह अक्खइ सहि मणु, मयणाउरु॥ २०.४॥

समे सप्त ओजे द्वादश भ्रमरावली। यथा—

[7]ओ रणझँणंत भमइ, भमरावलि।
मयणधणुह गुणवल्लि, णं सामलि॥ २०.५॥

समे सप्त ओजे त्रयोदश पङ्कजश्रीः। यथा—

[8]तहि भुमँयहि पडिच्छंदुलो, धणु मयणहु।
नवपंकयसिरि सोअरी, तसु वयणुहु॥ २०.६॥

---

1) केआरावु इत्यत्र हे मयूर त्वं केकारवं मा कुरु। सा गौरी दूरे वर्तते। कीदृशी। अतिशयेन मनोरमा सुन्दरी। 2) निअवि वयणु इत्यत्र दृष्ट्वा वदनं तस्याः विभ्रमो भ्रूमुद्भवो विलासस्तस्य पदम्। नमिवार्थे। विधिना पङ्कजं ह्रदे क्षिप्तम्। तस्या मुखतुलां दधत् ब्रह्मणा जलाशये क्षिप्तमिति भावः। 3) गज्जइ घणमालेत्यत्र घनो निबिडो घडहड-शब्दविशेषो यस्याः सा घनमाला गर्जति। नमिवार्थे। इवोत्प्रेक्षते। मदननृपस्य कुञ्जरघटा। 4) खलिअक्खरउं इत्यत्र हे सखि वचनं स्खलिताक्षरं मुखं च पाण्डुरम्। उभयं कर्तृ मनः कर्म। आख्याति। मनः कीदृशम्। मदनातुरम्। 5) [ओ] रणरणंतेत्यत्र हे सखि पश्य रणरणन्ती शब्दं कुर्वाणा भ्रमरावली भ्रमति। इवोत्प्रेक्षते। श्यामा मदनधनुषः गुणवल्ली। ज्या इति भावः। 6) तहि भुमयहि इत्यत्र तस्या भ्रुवोः प्रतिच्छन्दो धनुर्मदनस्य। तस्या वदनस्य सोदरा नवपङ्कजश्रीः।

---

१ कलाः dropped in A. २ पओ N. ३ न D. ४ खेणु BP. ५ पंकओ ABN. ६ तं B. ७ मइण० BP. ८ महु B. ९ मयणाउर A. १० रणरणंत K; तरुणझणंत A. ११ तहिं भुमयहिं AB; तहि भुमयहि P.

समे सप्त ओजे चतुर्दश किङ्किणी। यथा—

[1]"ससिणा रयणीए रइभरे, उल्लालिआ।
ओ किंकिणिआउ न हु इमा, उडुमालिआ॥ २०.७॥

समे सप्त ओजे पञ्चदश कुङ्कुमलता। यथा—

[2]"गोरडिअहिं उवमिअइ तँ पर, अच्चब्भुअ।
जइ किर हवइ फुल्लिअ फलिअ, कुंकुमलय॥ २०.८॥

समे सप्त ओजे षोडश शशिशेखरः। यथा—

[3]"लंघइ सायँर गिरि आरुहइ, तुह अहंग।
ससिसेहरहसिउज्जल नईखी, कित्तिगंग॥ २०.९॥

समे सप्त ओजे सप्तदश लीलालयः। यथा—

[4]"जं सहि कोइल कलु पुकारइ, फुल्लु तिलँउ।
तं पत्तु वँसंतु मासु कामहु, लीलालउ॥ २०.१०॥

एवं दश॥ २०.१०॥

तथा समेऽष्टावोजे नव चन्द्रहासः। यथा—

[5]"रेहइ तुह करि, चंदहासउ।
नं रिउसिरीए, केसपासँउ॥ २०.११॥

समेऽष्टावोजे दश गोरोचना। यथा—

[6]"गोरोअणगोरी, तुज्झ कओलँ।
पडिमाइ चुंबइ, ससहरु लोलु॥ २०.१२॥

समेऽष्टावोजे एकादश कुसुमबाणः। यथा—



---

1) ससिणा रयणीए इत्यत्र शशिना रजन्या रतिभरे क्रीडासमये उल्लालिताः किङ्किणिका घुर्घुरिकाः। न खलु इमाः उडुमालाः नक्षत्रमालाः। 2) गोरडीत्यत्र परं केवलं कुङ्कुमलतया तदा गौर्यः उपमीयन्ते यदि किल भवति सा पुष्पिता फलिता सती अत्यद्भुता। तस्या धर्मेदयं कविभनेन वर्ण्यते इति। 3) लंघइ सायर इत्यत्र हे राजन् तव कीर्तिगङ्गा अपूर्वं वर्तते। यतः सागरं लङ्घते गिरीनारोहति। कीदृशी। शशिशेखरहसितोज्ज्वला। अभङ्गा अप्रतिहतेत्यर्थः। 4) जं सहि कोइलेत्यत्र हे सखि यत्कोकिला मधुरं व्याहरति यच्च [फुल्लितः] तिलकवृक्षः वसन्तमास. प्राप्त इत्यर्थः। 5) रेहइ तुह इत्यत्र तव करे चन्द्रहासः शोभते। इयमेवेक्षते। रिपुश्रियः केशपाशो वेणीदण्डः। 6) गोरोअणेत्यत्र हे गोरोचनागौरि तव कपोलं प्रतिमया प्रतिबिम्बेन चुम्बति शशधरश्चन्द्रः। कीदृशः। लोलश्चञ्चलः।

---

१ रयणीए० B. २ उल्लालिअ ABCDN; उल्लालिय P. ३ उडुमालिय P. ४ न N. ५ सायर A.P. ६ नइखी ABCDN. ७ तिलओ-लालओ N. ८ चवंउ P. ९ किर A. १० हालओ—पालओ M. ११ तुज्झ N. १२ कवउउ B.

[1]जसु लोहचक्किण वि, न दलिउ झाणु[3]।
तहिं [4]वीरि किं करउ, सें कुसुमबाणु ॥ २०.१३ ॥

समेऽष्टावोजे द्वादश मालतीकुसुमम्। यथा—

[5]मालइ[6]कुसुमु न लेइ, चंदणु चयइ।
तुह [7]दंसणउम्माही, मग्गु जि निअइ ॥ २०.१४ ॥

समेऽष्टावोजे त्रयोदश नागकेसरः। यथा—

[8]दीसइ उववणि फुल्लिओ, नायकेसरो।
नं माहविण वणसिरिहि, दिण्णु सेहरो ॥ २०.१५ ॥

समेऽष्टावोजे चतुर्दश नवचम्पकमाला। यथा—

[9]तणु नवचंपयमाल जिण, करकम कमल।
सहि तुहुं माहवलच्छि तिण, परिमलबहल ॥ २०.१६ ॥

समेऽष्टावोजे पञ्चदश विद्याधरः। यथा—

[10]मुहि करिवि मयलंछणु गुलिअ[11], गुलिआसिद्धिं।
विज्जाहरिण जिम्व वम्महिण, जगु जिउ बुद्धिं ॥ २०.१७ ॥

समेऽष्टावोजे षोडश कुब्जककुसुमम्। यथा—

[12]पेच्छंतहुं[13] नवमालइ ललिअ, परिमलअसम।
भमरहुं[14] किम्व मणु रंजहि णवरि[15], कुज्जय[16]कुसुम ॥ २०.१८ ॥

समेऽष्टावोजे सप्तदश कुसुमास्तरणम्। यथा—

[17]मलयानिलु मलयजरसु ससहरु, कुसुमत्थरणु।
विरहानलजलिअहि तसु सव्वुं वि, तणुसंतवणु ॥ २०.१९ ॥
एवं नव ॥ २०.१९ ॥

---

1) जसु लोहचक्किण वीत्यत्र यस्य भगवतः लोहचक्रेणापि सगमाधमसुरेनापि ध्यानं न दलितं तस्मिन्वीरे किं करोति स कुसुमायुधः। अपि तु न किमपीत्यर्थः। 2) मालइकुसुमेत्यत्र हे सुभग तव दर्शनोत्कण्ठिता बाला मालतीकुसुमं न लाति न गृह्णाति। चन्दनं त्यजति। परं केवलं मार्गमेव [पश्यति]। 3) दीसइ उववणीत्यत्र दृश्यते उपवनं वनप्रदेशं लक्ष्मीकृत्य पुष्पितो नागकेशरः। इवोत्प्रेक्ष्यते। माधवेन वसन्तेन वनश्रियो दत्तः शेखरः 4) तणु नवचंपयेत्यत्र तनुः शरीरं नवचम्पकमाला येन कारणेन करकम(मा:) कमलानि हे सखि तेन कारणेन माधवलक्ष्मीरसन्तश्रीः वर्तसे। कीदृशी। परिमलबहुला। 5) मुहि करीत्यत्र मुखे कृत्वा मृगालाञ्छनगुटिकां मन्मथेन बुद्धया जगज्जितम्। केनेव। गुटिकासिद्धेन विद्याधरेणेव 6) पेच्छंतहु इत्यत्र प्रेक्षमाणानां नवमालतीं ललितां परिमलेनानन्यतुल्यां भ्रमराणां कथं मनो रञ्जयसि केवलं कुब्जककुसुमानि 7) मलयानिलेत्यत्र मलयानिलो मलयजरसः शशधरः कुसुमास्तरणं विरहानलज्वालितायास्तस्याः सर्वमप्येतत्तनुसंतापनं भवति।

---

१ वक्किण वि S. २ दलिओ N. ३ ज्झाणु P. ४ वीरी S. ५ मु P. ६ कुसुम BDP. ७ दंसणु S. ८ दिसु P; दिण्ण ACN. ९ कम dropped in कमल ACDN. १० मयलंछण AB; मयलंछणु N. ११ गुलिआ S. १२ पेच्छं नहु N; पेच्छंहु S; पेच्छंतह ABP. १३ भमरह ABP. १४ नवरि P. १५ सुज्जक्कु० B; सुज्जयकुसुम P. १६ सव्व वि B; सबु वि AS.

तथा समे नव ओजे दश मधुकरीसंलापः । यथा—

[1]निसुणिअ माइंद[1], महु[2]अरिसंलावु ।
[3]ओ पवसिअतरुणिहिं, पत्थुअउ[4] पलावु ॥ २०.२० ॥

समे नव ओजे एकादश सुखावासः । यथा—

[5]जइ वम्महु गोरडी, भलइं निहालसि[6] ।
तुह सुहँआवास[7]णी, तो किं जालसि ॥ २०.२१ ॥

समे नव ओजे द्वादश कुङ्कुमलेखा । यथा—

[8]फेडवि कुंकुमलेह, रिउवहुवयणहं[9] ।
पंकलेह निम्मविअ, पइं महिसयणहं ॥ २०.२२ ॥

समे नव ओजे त्रयोदश कुवलयदाम । यथा—

[10]जहिं घल्लइ उप्फुल्लिअ, घण चलनयणइं ।
तहिं नवकुवलयदामइं, तक्खणि निवडइं ॥ २०.२३ ॥

समे नव ओजे चतुर्दश कलहंसः । यथा—

[11]कामिणिहिअयसरोवरहं, तुहुं[12] जि कलहंसु ।
प्रिय[13] रूविण मयणहु किअउ, तइं जि[14] परहंसु ॥ २०.२४ ॥

समे नव ओजे पञ्चदश सन्ध्यावली । यथा—

[15]सिंदूरिअ[16] गुरुकुंभत्थल, गयघड तुहुं[17] वलि ।
अंगालि[18] नराहिव उत्थरिअ, किरि[19] संझावलि[20] ॥ २०.२५ ॥

समे नव ओजे षोडश कुञ्जरललिता । यथा—

[21]तोडिअगुंडमुहवडसंनाह, छड्डिअंकुसगयं[22] ।
निंदहिं पहु कुंजरललिअगइ, तुह अरि भग्गयं[23] ॥ २०.२६ ॥

---

1) निसुणिअ माइंद इत्यत्र श्रुत्वा माकन्दे मधुकरीसंलापं पश्य प्रोषितरमणीभिः प्रलापः रोदनं प्रस्तुतः प्रारब्धः । 2) जइ वम्महेत्यत्र यदि हे मन्मथ गौरीं भव्यां निभालयसि तदा तव सुखावासनीं किं ज्वालयसि । 3) फेडवि कुंकुमलेहेत्यत्र स्फेटयित्वा कुङ्कुमलेखां पद्मवलीं रिपुवधूवदनानां पङ्कलेखा निर्मिता त्वया वासाम् । कीदशां महीशयनानाम् 4) जहिं घल्लइत्यत्र यत्र क्षिपसि उत्फुल्ले प्रिया चलनयने तत्र नवकुवलयदामानि तत्क्षणं पतन्ति । श्यामकान्तिपातात् सर्वत्र श्यामीभवनादित्यर्थः 5) कामिणिहिमि(इ)त्यत्र कामिन्या हृदयसरोवरस्य त्वमेव राजहंसः । हे प्रिय त्वयैव मदनस्य पराभवः कृतः 6) सिंदूरिअ इत्यत्र हे नराधिप तव बले गजघटाः सन्ति । कीदृशाः(दृयः) । सिन्दूरितगुरुकुम्भस्थलाः । किलेति संभावनायाम् । अकाले सन्ध्यावलिरुल्लसिता । 7) तोडिअगुंडेत्यत्र गुंडा गजप्रभ्रष्टा । मुखपटाः हस्तिहयादीनां मुखाभरणानि । निन्दन्ति हे प्रभो कुञ्जरललितगतिम् । भग्ना अरयो मुक्तखड्गाः । नश्यन्त इति शेषः ।

---

१ माइंद BP. २ महुअरीसं० A. ३ उअ ABP; उ D. ४ तरुणि तिं N. ५ पल्लुअओ N. ६ निहालिसि BP. ७ सुह० C. ८ ना किं N. ९ वहूवयणह D; वहुयणहु A. १० तुह जि A. ११ पियम्० B. १२ ज B. १३ सिंदुरिअ N. १४ तुह A. १५ अकालि BP; अगलि NS. १६ किरि D. १७ संझावलि N. १८ गुज्जु० N. १९ छड्डिअ N. २० खगया N; खग्गइ S. २१ भग्गया CDNS.

समे नव ओजे सप्तदश कुसुमावली। यथा—

[1]निच्छइं पिअसहि वम्महरायहु, आणु[2] जु भंजइ।
कुसुमावलिठि[3]अछप्पयसद्दिहिं[4], तं महु तज्जइ ॥ २०.२७ ॥

एवमष्ट ॥ २० ॥ २७ ॥

तथा। समे दश ओजे एकादश विद्युल्लता। यथा—

[5]विज्जु[6]ल मेहमज्झि, अंधारइ गोरी।
कवण स हत्थभल्लि, कुसुमाउह तोरी ॥ २०.२८ ॥

समे दश ओजे द्वादश पञ्चाननललिता। यथा—

[7]संतट्ठहं मयगलहं, चिक्कारिहिं[8] कलिअ[9]।
रण्णाइं वि वज्जरहिं, पंचाणणललिअ ॥ २०.२९ ॥

समे दश ओजे त्रयोदश मरकतमाला। यथा—

[10]फुल्लधुअधोरणीउ, लयावणगोच्छि[11]हिं।
नवमरगयमालिआउ, नाइ महु[12]लच्छिहिं ॥ २०.३० ॥

समे दश ओजे चतुर्दश अभिनववसन्तश्रीः। यथा—

[13]कर असोअदल मुहु कमलु, हसिउ नवमल्लिअ।
अहिणववसंतसिरि एह, मोहणछइल्लि[14]अ ॥ २०.३१ ॥

समे दश ओजे पञ्चदश मनोहरा। यथा—

[15]तु[16]हुं गुण अणुदिणु सु[17]मरंतिहि, विरहकरालिअहि।
मयणमणोहर तणुअंगिहि, दय करि वालि[18]अहि ॥ २०.३२ ॥

---

1) निच्छइ पिअसहि इत्यत्र निश्चयेन हे प्रियसखि मदनराजः आज्ञां यो भनक्ति षट्पदस्वनैर्लं मधुर्वसन्तः तर्जयति। 2) विज्जुल मेहेत्यत्र अन्धकारे मेघमध्ये गौरि विद्युद् दृश्यते। का सान्या। हे कुसुमायुध त्वदीया हस्तभल्ली। भल्लीव भल्ली विरहिणां दुःखजनकत्वात्। 3) सतट्ठहमित्यत्र सप्तस्थानां मदकलानां चि(ची)त्कारारण्यान्यपि किल निश्चयेन पञ्चाननललितानि कथयन्ति। 4) फुल्लधयधोरणीत्यत्र लतावनगुच्छेषु पुष्पंधयधोरणयो भान्ति। उत्प्रेक्षते। मधुलक्ष्म्याः मरकतमालाः। मरकतमणिरत्नमित्यर्थः। 5) कर असोअ इत्यत्र करौ हस्तौ अशोकदलानि मुखं कमलं हसितं नवमल्लिका। अभिनववसन्तश्रीरेषा कामिनी। मोहने छेका निपुणा। 6) तुह गुण अणुदिणु इत्यत्र हे सुभग हे मदनमनोहर। तव गुणाननुदिनं स्मरन्तीषु विरहकरालितासु तन्वङ्गीषु दयां कुरु।

---

१ आण BDP. २ जुं N. ३ ट्ठिअ N. ४ लप्पय N. ५ सद्दह B; सद्दहिं AP. ६ विज्जुलय SN. ७ विक्कारिहिं AS. ८ कलिआ—कलिआ S. ९ रत्ताइं वि P. १० धोरणीय BP; धोरणीओ CD. ११ गुच्छिहिं ABP. १२ मालियाओ C १३ मुहुल० N. १४ ठइल्लिअ N. १५ मनोरमा A. १६ तुहु A. १७ सनरतिहि N १८ वालिअहिं BCD, वालिअहि A.

समे दश ओजे षोडश क्षिप्तिका। यथा—

[1]हिंडइ सा धण जाम्व गहिल्ली, विरहिण आखित्ती।
देक्खवि वल्लहु ता आणंदी, जणु अमइंण सित्ती ॥ २०.३३ ॥

समे दश ओजे सप्तदश किन्नरलीला। यथा—

[2]ओ भडकबंधु नच्चंतु समरि, असिपहा(ह)रुट्टिएँ।
किन्नरलील कलइ तुरयसिरिण, तक्खेंणचहुट्टिएँ ॥ २०.३४ ॥

एवं सप्त ॥ २०.३४ ॥

तथा समे एकादश ओजे द्वादश मकरध्वजहासः। यथा—

[3]सो जलिअंउ मयणग्गि, जु कुसुमिअंउ पलासु।
जा पप्फुल्लिअ मल्ली, सु मयरद्धयहासु ॥ २०.३५ ॥

समे एकादश ओजे त्रयोदश कुसुमाकुलमधुकरः। यथा—

[4]पत्तउ एहु वसंतउ, कुसुमाउलमहुअरु।
माणिणि मंणु मलंतउ, कुसुमाउहसहयरु ॥ २०.३६ ॥

समे एकादश ओजे चतुर्दश भ्रमरविलासः। यथा—

[5]अलि मालइपरिमललुद्धु, न अन्नहिं रइ करइ।
सा भमरविलासविअड्ढु, न अन्नहिं मणु धरइ ॥ २०.३७ ॥

समे एकादश ओजे पञ्चदश मदनविलासः। यथा—

[6]मयणविलासगिरिव्व सहेइ, मुद्धहि थणमंडलु।
तहिं रेहइ तरलहारलय, निज्झरु किर निम्मलु ॥ २०.३८ ॥

समे एकादश ओजे षोडश विद्याधरहासः यथा—

[7]नासंतिहिं समरागमसमइ, परिचत्तगइंदिहिं।
दिवि विज्जाहर हासिअ सयल, तुंह वेरिनरिंदिहिं ॥ २०.३९ ॥

---

1) हिंडइ सा धणेत्यत्र सा प्रिया यावद्विरहेण आक्षिप्ता सती महिला परिभ्रमति तावत् वल्लभं दृष्ट्वा आनन्दिता अमृतेन सिक्ता भवति 2) ओ भडकबंधु इत्यत्र पदम् भटकबन्धः समरे नृत्यन्। असिप्रहारत्रुटितेन तत्कबन्धोहित्वात् तच्छत्रे विलग्नेनाधशिरसा किन्नरलीला कलयति। तुरङ्गवदनत्वात्। 3) सो जलिअउ इत्यत्र पत्पलाशः पुष्पितो तन्मदनाग्निः प्रज्वलितः। यच्च मल्लिका प्रोत्फुल्ला तन्मकरध्वजहासम्। 4) पत्तउ एहु इत्यत्र एष वसन्तः प्राप्तः। कीदृशः। कुसुमेषु आकुलाः मधुकराः यत्र। पुनः कीदृशः। कुसुमायुधसहचरः। ततः हे मानिनि मानेनालं कृतम्। तत्रेत्यध्याहारः। [मानिनीमानं मर्दयन् P.]। 5) अलि मालइ इत्यत्र अलिर्भ्रमरः मालतीपरिमललुब्धो नान्यत्र रतिं करोति। सापि मालती भ्रमरविलासविदग्धा नान्यत्र मनो दधाति। तस्मिन्नेव चित्तं धरतीत्यर्थः। 6) मयणविलासेत्यत्र मदनविलासगिरिवत् शोभते मुग्धायाः स्तनमण्डलम्। तत्र राजते तरलहारलता निर्झरः किल निर्मलः। 7) नासंतिहिमित्यत्र नश्यद्भिः समरागमसमये परित्यक्तगजेन्द्रैर्दिवि विद्याधरा हासिताः सकलास्तव वैरिनरेन्द्रैः।

---

१ गहिल्लि N. २ अमयण D. ३ सित्ती N. ४ तरिण NB. ५ तक्खणि A. ६ बहुरिण N. ७ जलिओ NB. ८ मयणग्गी K. ९ पत्तलिउ A १० नाण AC, माण G ११ मिलंतउ A. १२ उदउ D. K. १३ न अन्नहिं DN; ओ अन्नहिं A. १४ मिअर N १५ सहइ P, महेइ N. १६ मुद्धहि A; मुद्धाहं N. १७ थनमण्डु N, थणमण्डु D, थनमण्डु B १८ हारलइ S १९ नासन्तहिं A. २० गयदहिं DP. २१ तुहु CDN. २२ वेरिनरिंदाहं DP.

समे एकादश ओजे सप्तदश कुसुमायुधशेखरः। यथा—

[1]"घोलिरनवपल्लवु परिफुल्लिउ, रेहइ असोअतरु।
विरइउ रम्मु नाइ महुमासिण, कुसुमाउहसेहरु॥ २०.४०॥

एवं षट्॥ २०.४०॥

तथा समे द्वादश ओजे त्रयोदश उपदोहकः। यथा—

[2]"महु कतिण रणि मुक्कउ, एकु पहारु अमोहु।
उअ दो हय हय चूरिउ, सदणु सारहि जोहु॥ २०.४१॥

समे द्वादश ओजे चतुर्दश दोहकः। यथा—

[3]"पिअहु पहारिण इक्किण वि, सहि दो हया पडंति।
सन्नद्धउ असवारभडु, अन्नु तुरगु न भंति॥ २०.४२॥

श्रापोग्रहणात्संस्कृतेऽपि। यथा—

[4]"मम तावन्मतमेवदिह, किमपि यदस्ति तदस्तु।
रमणीभ्यो रमणीयतर, अन्यत्किमपि न वस्तु॥ २० ४३॥

[11]अत्र समपादान्ते गुरुद्वयमित्याम्नायः॥ २०.४३॥

समे द्वादश ओजे पञ्चदश चन्द्रलेखिका। यथा—

[5]"तुह विरहिं सा अइदुब्बली, धणि आवंडुरदेह।
अहिमयरकिरणिहिं विक्खविअ, चंदलेह जिम्व एह॥ २०.४४॥

समे द्वादश ओजे षोडश सुतालिङ्गनम्। यथा—

[6]"तुह चडिण भुअदंडिण निवइ, धरमाणिण महिवलंउ।
जलहिसुआलिंगणपहवंसुहु, देउ जणद्दणु कलउ॥ २०.४५॥

---

1) घोलिरनवपल्लवेत्यत्र अशोकतरु राजत। कीदृश। घोलन्नवपल्लव। परि सामस्त्येन पुष्पित। इवोत्प्रेक्षते। मधुमासेन कुसुमायुधशेखरो विरचितो रम्य। 2) महु कतिणेत्यत्र हे सखि पश्य। मम कान्तेन रमणेन। रणे समरे। एक अमोघ प्रहारो मुक्तो येन प्रहारेण द्वौ हयौ हयौ चूरित स्खन्दन सारथिर्योधश्च। 3) पिअहु पहारणेत्यत्र हे सखि प्रियस्य प्रहारेण एकेनापि द्वौ हयौ पतत। सन्नद्ध सन्नद्धवारभट अन्यस्तुरङ्ग। मात्र भ्रान्ति। 4) ममेत्यत्र मम तावदेतन्मत भवति। अन्यदस्तु न वा। किम्। रमणीभ्यो रमणीयक किमपि वस्तु नास्तीति फल्गुनाथ। 5) तुह विरहे इत्यत्र तव विरहे सा प्रिया आपाण्डुरदेहातिदुर्बला। अहिमकर सूर्य तस्य किरणैरीक्षिता एषा चन्द्रलेखा पाण्डुरदेहा भवति। किं च एतद्वृत्त पूर्वमागतमस्तीति। 6) तुह चडिणेत्यत्र तव चण्डेन भुजदण्डेन हे नृपते धरमाणेन महीवलय जलधे सुता लक्ष्मी तस्या आलिङ्गनप्रभव सुखं देवो जनार्दन कलयतु। भजतिति यावद्।

---

१ परिफुल्लिओ V २ विरइओ A, विरएओ N, ३ रम्मउ LP ४ मयओ N5 ५ अमाहु N ६ चुरिओ A, चूरिओ N ७ दक्षण वि A. ८ सनद्धओ N5 ९ असवारभट्ट BEP, असवारभट्ट CD १० अथ A. ११ अत्र च स० P १२ पद्म V १३ आवडुरदेह A. १४ वडओ DV १५ पहु P १६ जणद्दण A

समे द्वादश ओज सप्तदश कङ्केल्लिलताभवनम् । यथा—

[1]कंकेल्लिलयाभवणब्भंतरि, अलिरिंछोलिं सहंति ।
नावइ महुलच्छीविणिवेसिअ, कज्जलहत्थयपंति ॥ २०.४६ ॥

एवं पञ्च ॥ २०.४६ ॥

तथा समे त्रयोदश ओजे चतुर्दश कुसुमितकेतकीहस्तः । यथा—

[2]जगु नीसेसु वि निज्जिणिउ, निरु गव्विरु विसमत्थउ ।
उब्भइ सरलदलंगुलिउ, कुसुमिअकेअइहत्थउ ॥ २०.४७ ॥

समे त्रयोदश ओज पञ्चदश कुञ्जरविलसितम् । यथा—

[3]सल्लइपल्लवकवलप्पणु, रेवानइजलि मज्जणु ।
वं कुंजरविलसिउ सुमरइ, गयविरहिउ करेणुगणु ॥ २०.४८ ॥

समे त्रयोदश ओजे षोडश राजहंसः । यथा—

[4]जइ गंगाजलि धवलि कालइ, जउणाजलि जइ खित्तउ ।
रायहंसि न हु वुड्डु न तुट्टु, सुब्भत्तणु तु वि तेत्तउ ॥ २०.४९ ॥

समे त्रयोदश ओजे सप्तदश अशोकपल्लवच्छाया । यथा—

[5]वयणु सरोजु नयणे कुवलयदल, हासु नवफुल्लिअमल्लि ।
करपाय असोअपल्लवच्छाय, सइ जि कुसुमाउहभल्लि ॥ २०.५० ॥

एवं चत्वारः ॥ २०.५० ॥

समे चतुर्दश ओजे पञ्चदश अनङ्गललिता । यथा—

[6]पलिअ केस चले दसणावलि, जर जज्जरइ सरीरवलु ।
सव्वे वि गलहिं अणंगललिअ, किज्जउ धम्मु महंतफलु ॥ २०.५१ ॥

---

1) कंकेल्लिलतेत्यत्र कङ्केल्लितामवनाभ्यन्तरे भ्रमरश्रेणयो राजन्ते । इत्योत्प्रेक्षते । मधुलक्ष्म्या विनिवेशिताः कज्जलहस्तपङ्क्तयः । 2) जगु नीसेसु वीत्यत्र जगन्निःशेषमपि निर्जित्य निश्चिंतं सगर्वो विषमास्त्रः कामः उच्छ्रयति सरलदलाङ्गुलीः कुसुमितकेतकीहस्तम् । 3 सल्लइपल्लवेत्यत्र करेणुगणः हस्तिनीसमूहः गजेन विरहितः सन् सल्लकीपल्लवकवलार्पणं रेवानदीजले मज्जनं च स्मरति । 4) जइ गंगेत्यत्र यदि च धवले गङ्गाजले यदि च कृष्णे यमुनाजले राजहंसः प्रक्षिप्तः तथापि तस्य शुभ्रत्वं न वर्धितं न च त्रुटितम् । 5) वयणु सरोउ इत्यत्र वदनं सरोजं नयनं उत्पलदले हास्य पुष्पितनवमल्लिका करपादौ अशोकपल्लवच्छायौ । इत्योत्प्रेक्षते । स्वयमेव कुसुमायुधस्य भल्लिका । भल्ली शस्त्रविशेषः । 6) पलिअ केस इत्यत्र केशाः पलिताः । चला दशनावलिः । जरया जर्जरितं शरीरबलम् । सर्वाण्यपि गलन्ति । अनंगललिआई [ललिआई] इति-ललितानि । अतएव महाफलं धर्मं कुरुत भव्याः ।

---

१ भवणब्भिंतरि A. २ रिंछोलि K. ३ लावइ K. ४ तथपंति K. ५ निज्जिनिउ AC. ६ उच्छइ K. ७ इत्थओ C. ८ जलन्ह A. ९ गिल्लओ AK. १० वुडु K. ११ गुणत्तणु DK. १२ वयण D. १३ नच्च K. १४ दंत D. १५ चलिय द० A. १६ सव्व वि C. १७ गलिहिं ACDK.

समे चतुर्दश ओजे षोडश मन्मथविलसितम्। यथा–

[1]मयवस तरुणिविलोअणतरलु, कलेवरु संपइ जीविउ।
मेल्हेहु रमणीअणि सहुं[3] संगु, चयहु हयवम्महविलसिउ॥ २०.५२॥

समे चतुर्दश ओजे सप्तदश ओहुल्लणकम्। यथा–

[2]महुरसु घुंटिउ जेहिं जहिच्छइ, ते अलि दीसंतें[4] भमंत।
मालइओहुल्लणउं करंतिण, किं साहिउं पइं हेमंत॥ २०.५३॥

[3]वारङ्गडीत्यन्ये। एवं त्रयः॥२०.५३॥

समे पञ्चदश ओजे षोडश कज्जललेखा। यथा–

[4]कज्जललेहाविललोअणहं, गलिअंसुजलिण पम्हुट्ठउ[5]।
अहरालत्तयरसु सामरिसु, तुह रिउवहुनयणि पइट्ठउ[6]॥ २०.५४॥

समे पञ्चदश ओजे सप्तदश किलिकिञ्चितम्। यथा–

[5]तरुणीकिलिकिंचिअइं विसट्टहिं, ससिजोण्हसमुज्जल रत्तडी।
मल्लिअफुल्लइं परिमलसारइं, जउ तउ गय सग्गहु[8] वत्तडी॥ २०.५५॥

एवं द्वे॥ २०.५५॥

समे षोडश ओजे सप्तदश शशिविम्बितम्। यथा–

[6]तुह[9] मुहुं[10] लावण्णतरंगिणीए, झलकंतउ कंतिकरंविअंउ[12]।
सोहइ निम्मलवट्टुलमंडलु[13], जलमज्झि नाइ ससि बिंबिअंउ[14]॥ २०.५६॥

अत्रैकः। एवं तावद्वा पञ्चपञ्चाशद्भेदा चतुष्पदी। उभये दशोत्तरशतमन्तरसमाः चतुष्पद्यो वस्तुकानि वा[15]॥

---

1) मयवसेत्यत्र मदवशतरुणीविलोचनवत् तरलं कलेवरं संपत् जीवितं च। मुच्यतां रमणीजनेन सङ्गः। त्यजत हतमन्मथस्य विलसितम्। 2) महुरसु इत्यत्र हे हेमन्त त्वया मालत्याः। ओहुल्लणउं इति–निर्दीक्षित्वं पुष्पादिहीनत्वमिति यावत्। कुर्वता किं साधितम्। यस्माद्यैर्भ्रमरैर्यदृच्छया मधुरसः धुटितः आस्वादितः ते भ्रमराः सांप्रतं पुष्पाभावात् भ्रमन्तः दृश्यन्ते। मधोरनुपलम्भात्। 3) वारङ्गडीति पिङ्गलमते। 4) कज्जललेहेत्यत्र कज्जलरेखाविलत्वं विलोचनानां गलिताश्रुजलेन प्रमृष्टं निरस्तम्। अधरालक्तकरसः सामर्षः सन् तव रिपुवधूनयने प्रविष्टः। रिपुवधूनयनान्यारक्तानि जातानि इति भावः। 5) तरुणीकिलीत्यत्र स्मितहसितभयरोषगर्वदुःखश्रमाभिलाषसंकरः किलिकिंचितम्। तरुणीकिलिकिंचितानि विलसन्ति। शशिज्योत्स्नासमुज्वला रात्रिः। मल्लिकापुष्पाणि परिमलसाराणि। यदि तदा स्वर्गस्य गता वार्ता। स्वर्गाभिधानं न कोपि गृह्णाति इति भावः। 6) तुह मुहेत्यत्र तव लावण्यतरङ्गिण्यां दीप्यमानं कान्तिकरम्बितं शोभते मुखम्। इवोत्प्रेक्षते। निर्मल[वर्तुल]मण्डले जलमध्ये शशी बिम्बितः।

---

१ मइवस D. २ मेल्हहु P. ३ सहुं ABP. ४ दीसति BP. ५ पम्हुट्ठओ N. ६ पइट्ठओ N. ७ जोन्ह A. ८ सग्गह P; मग्गहु N. ९ तुहु ABCDSP. १० मुह ABK. ११ लयण ABCDKPN. १२ करंविअओ AC. १३ निम्मलु A. १४ बिंबिओ A; बिंबिअओ N. १५ च P.

अन्तरसमा एव द्वितीयतृतीयांहिव्यत्ययेऽर्धसमाः ॥ २१ ॥

द्वितीयतृतीयपादयोर्विपर्यये सत्यन्तरसमा एव दशोत्तरशतसंख्या अर्धसमासंज्ञाः। एवग्रहणं सर्वसाम्यार्थम्। तेनासामपि तान्येव चम्पककुसुमादीनि नामानि भवन्ति। तत्रौजे सप्त समेऽष्टेत्यन्तरसमा-चम्पककुसुमम्। तदेव द्वितीयतृतीयांहिविपर्ययेऽर्धसमा-चम्पककुसुमम्। यथा—

[1]गोरी गोट्ठि, दरफुरिउट्ठि।
कलहंसीगइ-, कलहे लग्गइ ॥ २१.१ ॥

[2]मुखपङ्क्तिरर्धसमा यथा—

[3]कुवकण्णकलिंग परद्धिआ, ठिअ नरवइ माणविवज्जि[अ]आ।
न हु कोइ अभिट्ठइ अणिअवहि, कहिं वइरि जयद्दहु कण्ह कहि ॥ २१.२ ॥

इत्यादि।

द्वित्रिचतुर्भिर्लक्षणैर्मिश्रा सङ्कीर्णा ॥ २२ ॥

द्वाभ्यां ध्रुवाया अंहिलक्षणाभ्यां त्रिभिः चतुर्भिर्वा एकत्र मिश्रा संकीर्णा नाम चतुष्पदी। तत्र द्वाभ्यां सङ्कीर्णा। यथा—

[4]चूडल्लउ वाहोहजलु, नयणा कंचुअं वि समर्थेण।
इअ मुंजि रइआ दूहडा, पंच वि कामहु पंचसरं ॥ २२.१ ॥

त्रिभिर्यथा—

[5]वायाला फरुसा विंधणा, गुणिहिं विमुक्का प्राणहर।
जह दुज्जण सज्जणजणपउरि, तेम्व पसरु न लहंति सर ॥ २२.२ ॥

यथा वा—

[6]चूडल्लउ चुण्णी होइसइ, मुद्धिकओलि निहित्तउ।
निद्दडउ सासाणलिण, वाहसलिलसंसित्तउ ॥ २२.३ ॥

---

1) गोरी गोट्ठि इत्यत्र गौरी कर्त्री गोष्ठां दरस्फुरितो ईषत्स्फुरितो ओष्ठो यस्याः सा गोष्ठीदरस्फुरितोष्ठी। कलहंस्या सह यो गतिकलहस्तत्र लगति। गतौ कलहंस्या सह स्पर्धां विपत्ते इत्यर्थः। 2) मुखपङ्क्तिरर्धसमेत्यत्र ओजे पञ्चदश सप्त पोडश पूर्वलक्षणं मुखपङ्क्तिर्नाम छन्दश्चिन्तायामुक्तम्। 3) कुवकण्णेत्यत्र कृपो द्रोणाचार्यः कर्णश्चम्पाधिपतिश्चैते पराजिताः स्थिताः। न च कोऽपि युध्यतेऽनीकपथे सैन्यमार्गे। कुत्र वैरी जयद्रथनामा इति कथय कृष्ण इति पाण्डवाः पृच्छन्ति। 4) चूडल्लउ इत्यत्र चूडेनेति प्रसिद्धः, वाष्पौघजलं, नयनाभ्यां, कञ्चुकः, समस्तैः, एतेषां पञ्चानां अपि दूहकाः मुञ्जेन राज्ञा रचिताः सन्ति। ते पञ्चापि कामशराः। 5) वायाला फरुसेत्यत्र यथा दुर्जनाः सज्जनप्रचुरे स्थाने प्रसरं लभन्ते न तथा शराः। दुर्जनाश्च किंभूताः। वाचालाः परुषाः कठोरा मर्माविधः वेधिनः गुणैर्दयादिभिर्विमुक्ताः। पक्षे शराः कीदृशाः। वाचालाः परुषाः वेधकाः गुणैः प्रत्यञ्चादिभिर्विमुक्ताः। 1) चूडल्लउ इत्यत्र चूडरूपेण भविष्यति मुग्धे कपोले निहिता सन्न निर्दग्धः श्वासानलेन वहतु बाष्पसलिलेन सिक्तः।

---

१ तृतीयांहिव्यत्यये अन्तर- E. २ अत्र P. ३ परिचिआ A. ४ वयरि DP. ५ जयद्दु P; जयद्दु N. ६ कण्ह A. ७ चूडउ A. ८ कंचुएं ACDN; कञ्चुं B. ९ समएण ABEN. १० पंचसए A. ११ गलवत्थरि A. १२ चूडओ CDKSA. १३ निद्दउ CDN. १४ सासानलेण CDN. १५ ण्हो-

चतुर्भिर्यथा—

"तं तेत्तिउ वाहोहजलु, सिहिणंतरि वि न पत्तु।
छिमिछिमिवि[1] गंडत्थलिहिं, सिमिसिमिवि[2] सिमिवि समत्तु ॥ २२.४ ॥

समैः पादैः सर्वसमा ॥ २३ ॥

तुल्यकलैश्चतुर्भिः पादैः सर्वसमा चतुष्पदी ॥ २३ ॥

तद्विशेषानाह—

पचौ ध्रुवकम् ॥ २४ ॥

पञ्चमात्रचतुर्मात्रौ गणौ यस्यां पादे तद् ध्रुवकम्। यथा—

"जइ वि संखु न करि, तुं ध्रुवु मुणिउ हरि।
जं विरहमीअइ, अणुसरिउ सिरिअइ ॥ २४.१ ॥

चौ दः शशाङ्कवदना ॥ २५ ॥

द्वौ चतुर्मात्रौ द्विमात्रश्चैकः शशाङ्कवदना। यथा—

"नवकुवलयनयण, ससंकवयण धण।
कोमलकमलकर, उअ सरयसिरि किर ॥ २५.१ ॥

चपदाश्चातौ वा मारकृतिः ॥ २६ ॥

चतुर्मात्रपञ्चमात्रद्विमात्राः चतुर्मात्रद्वयद्विमात्रौ वा मारकृतिः। यथा—

"तुह मार मारकिदी, क वि एहं[4] नवल्लिअ।
"दूरि स बालेभल्लि, जं हिअंडइ[13] सल्लिअ ॥ २६.१ ॥

पचदाश्चिर्वा महानुभावा ॥ २७ ॥

पण्मात्रचतुर्मात्रद्विमात्रा वा चगणत्रयं वा यत्र सा महानुभावा। यथा—

---

1) तं तेत्तिउ वाहोहेत्यत्र तत्तावद्वाष्पौघजलं स्तनान्तरे न मासम्। तत्तदोहाधुपरि यदि जलबिन्दुः पतति तदा प्रथमं छमिछमिशब्दं करोति पश्चात्सिमिसमीति कृत्वा शुष्यति। कपोलावपि विरहानलेन तप्तौ स्तोऽतस्तत्र समागतम्। इत्येतौ द्वावपि दोषौ 'चूडलउ' 'वाहोहजलसित्तौ' मुञ्जरचितौ। 2) जइ वि संखु नेत्यत्र हे राजन् यद्यपि शङ्खो न धृतः करे तथापि त्वं ध्रुवं निश्चितं ज्ञातो हरिर्विष्णुः। यद्विरहे भीतया श्रिया अनुसृतः आश्रितः। 3) नवकुवलयेत्यत्र नवकुवलयनयना शशाङ्कवदना प्रिया कोमलकमलकरा पश्य शरत्पर्धीः शरल्लक्ष्मीः। किलेति—संभावनायाम्। 4) तुह मारेत्यत्र हे मार काम तव एषा नूतना कापि मारकृतिः। अपूर्वः कोऽप्यसौ मारः इत्यर्थः। सा बाला एव भल्लिर्दूरे यद्यस्मात् कारणाद् हृदये शल्यिता। अन्या भल्ली दूरस्था सती न शल्यकारिणीत्यपूर्वम्।

---

१ तित्तिउ E. २ सिहिणं नरिवि. ३ छिमिवि छिमिवि S. ४ गंडत्थलहिं CDNS. ५ सिमिसिमि सिमिवि समतु EP. ६ यत्र A. ७ तु NS. ८ द्वौ चतुर्मात्रश्चैकः A. ९ कमल dropped in A. १० एवहनवली अ A. ११ दा A. १२ सबाभलि N; सबलिभलि S. १३ हिअइइ CD.

[1]जे निअहिं न परदोस, गुणिहिं जि पयडिअतोस ।
ते जगि महाणुभावा, विरला सरलसहावा ॥ २७ १ ॥

पचताश्चापौ पातौ चाप्सरोविलसितम् ॥ २८ ॥

पण्मात्रचतुर्मात्रित्रिमात्रा वा चतुर्मात्रद्वयपञ्चमात्रौ वा पञ्चमात्रद्वयत्रिमात्रौ वा यत्र तदप्सरोविलसितम् । यथा—

[2]पइ ससिवयणिए विब्भमि, हसिअं अच्छरविलसिअइं ।
भुमईहि किउं पाइक्कउ, मयणु मोहिअजणमणइ ॥ २८ १ ॥

पचचाश्चिदौ वा गन्धोदकधारा ॥ २९ ॥

पण्मात्रश्चतुर्मात्रद्वयं यदि वा चतुर्मात्रत्रयं द्विमात्रश्च सा गन्धोदकधारा । यथा—

[3]रमणिकवोलकुरंगमय-, पत्तलयाविलअसुभवि ।
घणगंधोदयधारभरि, वइरिअ तुह ण्हायति सवि ॥ २९ १ ॥

चितौ पचपा वा पारणकम् ॥ ३० ॥

चतुर्मात्रत्रयं त्रिमात्रश्च यदि वा पण्मात्रचतुर्मात्रपञ्चमात्राः पारणकम् । यथा—

[4]कइअहिं होएसइ त दिवसु, आणदसुहारसपावणउ ।
होही प्रियमुहससिचदिमइ, जहिं नयणचउ(ओ)रह पारणउं ॥ ३० १ ॥

चीः पद्धडिका ॥ ३१ ॥

चगणचतुष्कं पद्धडिका । यथा—

[5]परगुणगहणु सदोसपयासणु, महुमहुरक्खरहिअमिअभासणु ।
उवयारिण पडिकिउ वेरिअणह, इअ पद्धडी मणोहर सुअणह ॥ ३१ १ ॥

---

1) जे निअहिं नेत्यत्र ये सत्पुरुषा परदोषान् न पश्यन्ति किं तु गुणैरेव प्रकटितसोषा त एव जगति महानुभावाः । विरला स्तोका । कीदृशा । सरलस्वभावा । 2) पइ ससिवयणिए इत्यत्र त्वया शशिवदनिके विभ्रमेण विलासेन हसितानि अप्सरोविलसितानि । भ्रुवा कृतोऽल्पपदातिर्मदन काम । किंविशिष्टया भूत्वा । मोहितजनमनसा । 3) रमणिकवोलेत्यत्र रमणीकपोलेषु या कुरङ्गमदपत्रलता कस्तूरीपत्रवल्लयस्ताभिरा विलानि श्यामीकृतानि यान्यघूर्णि तेभ्यो भव उ पश्चात्तस्मिन् ग धोदकधाराभरे वैरिणस्तव स्नान्ति स्नान कुर्वन्ति सर्वे । 4) कइत्ति—कदा भविष्यति स दिवस । आनन्दसुधारसप्रापण आनन्दसुधारसपावन पवित्रो वा भविष्यति प्रियमुखशशिचन्द्रिकाया यत्र ननयनचकोरयो पारणकम् । 5) परगुणत्यत्र परेषा गुणाना ग्रहण स्वकीय दोषप्रकाशन च । मधुवन्मधुराक्षराणि यत्र । एतद्विध हित मित भाषण च । उपकारेण प्रतीकारो वैरिजनानाम् । वैरिणामप्युपकारकरणमित्यर्थ । एषा पद्धतिर्मार्गा मनोहरा सुजनानाम् । अन्योऽपि हि वैरिणो द्रोहेण प्रतीकार करोति सुजनस्तूपकारेणत्यर्थ ।

---

१ निअहि A २ पयडीयतोस A ३ भाव सहाव BFP ४ ससिवयणिइ BP ससिवयणीए A ससिवयणिविब्भमि C ५ असिअ ४ ६ भुमयहिं S ७ कउ A ८ मोहिउज० A ९ कइअहि C १० होइसइ BP ११ पावणउ ACV १२ चदिमइ A १३ नयणचउरह BP नयणचउरह ACDN १४ पारणओ CVS १५ चचतुग्य E १६ महु dropped in A महुमहुरक्खरअमियभा० B १७ पडिकिओ N, पडिकउ F १८ वेरिणह E १९ पद्धडिय BP

अजादिर्यौ स्तोऽन्ते प्राक्सदृशौ(३.७३) इह त्वविशेष इति विशेषः ॥ ३१.१ ॥

पिषौ पगाता वा रगडाभुवकम् ॥ ३२ ॥

पगणत्रयं पगणश्च यदि वा पञ्चमचतुर्मात्रद्वयं विनाश्च यस्य पादे तद्रगडाभुवकम्। यथा—

"अइचंगेत्थं मोरइं वलहेइ, जइ पुणु रूपमहङ्कर भग्गय।
काइं व एम्वहिं मइ विरएप्पिणु, मइं पम्हट्ठ रगडं भुवु लग्गय ॥ ३२.१ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ
षट्पदीचतुष्पदीशासनः षष्ठोऽध्यायः समाप्तः ॥ ६ ॥
ग्रन्थाग्रं ३२२; उभयं २६०६।

* *
*

---

1) अइचंगेत्यत्र अतिचङ्गेन मदीयेन वल्लभेन यदि तव रूपाहंकारो भग्नः किं तद् एवमेव तस्य विरहक्षणे मन्मथ रगडा भुवं लग्ना। रगडं विगोपनम्। यदि मम वल्लभेन काम त्वं पराभूतस्तर्हि मां किं विगोपयसीत्यर्थः।

इति छन्दोऽनुशासने षष्ठाध्यायविषमपदविवरणम् ॥

---

१ तुह A. २ मह A. ३ रगडा भुउ BP; रगडा भुवु ABK.

अथ सप्तमोऽध्यायः ।

द्विपदी ॥ १ ॥

इतः परं द्विपद्योऽधिक्रियन्ते ॥ १ ॥

दाचदालदाचदालि कर्पूरो णैः ॥ २ ॥

द्वौ द्विमात्रौ चतुर्मात्रो द्वौ द्विमात्रौ लघुर्द्वौ द्विमात्रौ चतुर्मात्रो द्वौ द्विमात्रौ लघुत्रयं च कर्पूरः । णैरिति पञ्चदशभिर्मात्राभिर्यतिः । च इति सिद्धे दगणद्वयनिर्देशो जगणनिरासार्थः । यथा—

कप्पूलधवलगुण अज्जिणिअ, आजम्मु वि निवचक्कवइ पइं ।
कित्ति काइं उल्लालिकरि, घल्लिअ चउसायर परइ ॥ २.१ ॥

सोऽन्त्यलोनः कुङ्कुमः ॥ ३ ॥

स एव कर्पूरः अन्त्येलघुना ऊनः कुङ्कुमः । यथा—

"घणसारु मेल्लि कुंकुमु चयहि, परइ करहि मयनाहि वि ।
विणु पिअयमिं इहु सउं निप्फलउं, मणु रइ करइ न कत्थ वि ॥ ३.१ ॥

एतावुल्लालकौ मागधानाम् ॥ ३.१ ॥

केचिल्लघ्वष्टकादारभ्य लघुद्वयद्वयवृद्ध्या "वाहादीन् भेदानाहुः । यथाह—

वाहो वेहो वग्गो वंधू वाणो वओ चरो वेसो ।
वेणू वेणो चरिट्ठो विवुहो वलिओ वेलो विहओ ३.२ ॥
वामो वुहो विसालो विंदो विहुरो विहू वसू विरहो ।
विलओ तहा य विसंओ उल्लाला पंचविंसत्ति ॥ ३.३ ॥
अट्ठलहुविरइआओ पढमा उल्लालयाउ छंदम्मि ।
लहुएहिं दोहिं दोहिं अ हुंति इमे वड्ढमाणेहिं ॥ ३.४ ॥

एते च कोटीसंख्यग्रस्तारान्तर्भूता इति पृथक् नोक्ताः ॥ ३.४ ॥

---

1) कप्पूरधवलेत्यत्र कर्पूरधवलान्गुणान् अर्जयित्वा (-धवलगुणा अर्जिता P.) आजन्मापि नृपचक्रपते त्वया कीर्तिः कस्मादुल्लालयित्वा क्षिप्ता चतुःसागरेभ्यः परतः । 2) घणसारेत्यत्र घनसारं कर्पूरं मुञ्च । कुङ्कुमं त्यज । परतः मृगनाभिमपि कुरु । तेन विना प्रियतमेन भर्त्रा इह सर्वं निष्फलं निःसारम् । मनो रतिं क्वापि न संधत्ते । 3) वाहादीन् भेदानित्यत्र यस्मिन् अष्टौ लघवो भवन्ति स प्रथमो वाहः । दशभिर्वोह इत्यादि द्विकवृद्ध्या द्रष्टव्यमिति ।

---

१ दद्वयनिर्देशो जगणनिरासार्थः P. २ कप्पूर० ADKP. ३ पत्तिअ S; पत्तिअ D; पत्तिअ N. ४ अन्त्येन लघुना DP. The whole sentence repeated in D. ५ पिअयमिं हुअ सउ CDN; पिअमे इहु सउं E; पिअयमें इहु सउ BP; पिअयमिइ हुअ सहु A. ६ निप्फलओ N. ७ कत्थवि A. ८ वोहा DN. ९ गओ AS. १० वण्णो विरहो P. ११ वलिओ D; वलिय N. १२ वरो BP. १३ विलासो P. १४ विसरओ N. १५ अन्तर्भूतत्वादिति A. १६ पृथक् is dropped in P.

चू लयः ॥ ४ ॥

चू इति लुप्तविभक्तिको निर्देशः। सप्त चगणा लयो नाम द्विपदी। यथा—

[1]किउ उरि लच्छिहिं निलउ करिण कलिउ[2] चक्कु महिअलु धरिउ।
बलिनाम्बु सहिउ न हु कहँ वि हु पहु तुहुं पुरिसोत्तिमचरिउ ॥ ४.१ ॥

स भ्रमरपदं भजैः ॥ ५ ॥

स लयः भजैर्दशभिरष्टभिश्च कलाभिर्यतिश्चेत्तदा भ्रमरपदम्। यथा—

[2]ललिअविलासोचिअ तवि[3]ण किलेसहि सहि किं तणु अप्पणु।
मालइकुसुमु सहइ भमरपँउ न उण खरसउणिझडप्पणु ॥ ५.१ ॥

पचुदा उपात् ॥ ६ ॥

एकः षण्मात्रः पञ्च चतुर्मात्राः द्विमात्रश्चैको यदि तदा उपात्परं भ्रमरपदमुपभ्रमरपदमित्यर्थः। भजैरिति वर्त्तते। यथा—

[3]तहि मुद्धहि नेहंधहि किम्व किवणेय तुंहं[4] खलिउ पयट्टु।
उअ भमरपएण वि भज्जइ मालइनवकुसुमु विसट्टु ॥ ६.१ ॥

चूपौ गरुडपदम् ॥ ७ ॥

षट् चगणाः षगणश्चैको गरुडपदम्। यथा—

[4]जसु पारु लहंति कया वि न वि सुरगुरुभिउनंदणपमुह।
अरिपन्नगगरुड पयंपिअइ सयलु वि गुणगणु सु किम्व तुंह ॥ ७.१ ॥

पचुता उपात् ॥ ८ ॥

एकः षण्मात्रः पञ्च चतुर्मात्राः एकस्त्रिमात्रो यदि स्यात्तदोपात्परं गरुडपदम्। उपगरुडपदमित्यर्थः। यथा—

---

1) किउ उरि इत्यत्र कृतः उरसि लक्ष्म्या निलय। करेण कलितं चक्रम्। देवः महीतलं धृतम्। बलिनां राज्ञां नाम न सोढं कथमपि। हे पुरुषोत्तमचरितोऽसि। तस्मात्पुरसि श्रीर्निलयं करोति। सोऽपि करे चक्रं कलयति। महीतलं धरति। बलेर्दानवस्य नाम न सहते। 2) ललितेत्यत्र ललितविलासोचितां तपसा क्लेशयसि हे सखि किं तनुमात्मनः। मालतीकुसुमं भ्रमरपदं सहते। न पुनः खरशकुनिस्पर्शनम्। 3) तहीत्यत्र तस्या मुग्धायाः स्नेहान्धायाः कथं कृपण। लक्षणया हे अज्ञान। तव स्खलितं प्रवृत्तम्। कुत इत्याह—पश्य भ्रमरपदेनापि भज्यते मालतीकुसुमं विकसितम्। 4) जसु पारु इत्यत्र यस्य गुणगणस्य पारं न लभन्ते कदापि सुरगुरुभृगुनन्दनप्रमुखाः हे अरिपन्नगगरुड स तव सकलोऽपि गुणगणः कथं प्रकाश्यते। अपि तु न प्रकाश्यते इत्यर्थः।

---

१ उवरि D. २ कलिअ D; कलिओ A. ३ बलिनालिनाम्बु D; बलिनाउं BP. ४ कहि P. ५ पुरिसोत्तम० A. ६ तुहुम A. ७ भमरपओ CNS, भमरपउं BE. ८ किंव ABP; किम D. ९ किविणय S. १० तुहुं P. ११ ओ B. १२ पार A. १३ तुहु S.

हणिअदुजीहप्पसरणु पिअपुरिसोत्तमु विणयाणंदणु ।
[1]उअ गरुडपयम्मि निबद्धरइ नरवइ हरइ न कासु मणु ॥ ८.१ ॥

चृदौ हरिणीकुलं ठजैः ॥ ९ ॥

चतुर्मात्रसप्तकं द्विमात्रश्चैकः ठजैरिति द्वादशभिरष्टाभिश्च यतिश्चेत्तदा हरिणीकुलम्। यथा—

[2]तुहुं उज्जाणि म वच्चसु जइ वि हु विलसइ मयणूसवु पवलु ।
गइनयणिहिं लज्जीहइ तुहु हंसीउलु सहि तह हरिणिउलु ॥ ९.१ ॥

तद्गीतिसमं भजैः ॥ १० ॥

तद्धरिणीकुलं भजैरिति दशभिरष्टाभिश्च यतिश्चेत्तदा गीत्या समत्वाद् गीतिसमम्। यथा—

[4]नचिरु किसलयकरिहिं कुडपयडिअपुलउग्गमु मउलावलिहिं ।
उववणु नाइं मुइउ कयगीइ[11] समं चिअ तरलिहिं[12] अलिउलिहिं ॥ १०.१ ॥

पुर्भ्रमररुतम् ॥ ११ ॥

भजरिति वर्त्तते। पञ्च पण्मात्राश्चेद् भ्रमररुतम्। यथा—

[5]वरजाइ सरंतहु भमरु[13] रुअंतहु तुहु चिरु सुहु परिदीसइ ।
मायंगि मयंधइ[14] तुज्झु[15] रमंतहु कण्णचवेड[16] जि होसइ ॥ ११.१ ॥

पश्चूर्हरिणीपदम् ॥ १२ ॥

एकः पण्मात्रश्चतुर्मात्रपट्कं हरिणीपदम्। यथा—

---

1) उअ गरुडेत्यत्र हतं द्विजिह्वानां दुर्जनानां प्रसरणं येन। पक्षे द्विजिह्वाः सर्पाः। प्रियाः पुरुषोत्तमाः सन्तो यस्य। पक्षे पुरुषोत्तमो नारायणः। विनयेन विनतानां प्रणतानां वा आनन्दनः। पक्षे विनतायाः आनन्दनः पुत्रश्च। उअ पश्य। नरपतिः कस्य मनो न हरति। गरुडपदे गरुडव्यापारे निबद्धरतिः। 2) च इत्यत्र सप्तमस्वरान्वितत्वात् चरणानां सप्तकं ग्राह्यम्। 3) तुहुं उज्जाणेत्यत्र त्वमुद्याने मा व्रज। यद्यपि विलसति मदनोत्सवः प्रबलः। गतिनयनाभ्यां लज्जिष्यति हंसीकुलं हे सखि तथा हरिणीकुलं च। गत्या हंसीकुलं नयनाभ्यां हरिणीकुलं च लज्जिष्यतीति भावः। 4) नचिरेत्यत्र उत्प्रेक्षते। उपवनं मुदितमिव दृश्यते। कथंभूतम्। किसलयकरैर्नृत्यादिव। कुड्मलावलिभिः कुड्मलश्रेणीभिः स्फुटप्रकटितकुसुमपुलकोद्गममेव। तथा सममेव समकालमेव तरुणैरलिकुलैः कृतगीति कृतगानमित्यर्थः। 5) वरजाईत्यत्र हे भ्रमर तव वरजातिकुसुमे स्मरतः शब्दं कुर्वतश्चिरं सुखं परिदृश्यते। मातङ्गे मदान्धे तत्र रममाणस्य कर्णचपेटैव भविष्यति। अन्योऽपि यो वरजातिं कुलीनपुरुषं सेवते स सुखी स्यात्। यस्तु मातङ्गे चण्डाले रमते स दुःखी स्यादित्यर्थः।

---

१ दुजीहपसरणु A. २ पुरिसोत्तम BE. ३ नेदणु AE. ४ कीसु S. ५ मयणूसव A. ६ गयनय० B. ७ हरिणीउल AS; हरिउल N. ८ पुलउग्गमु N. पुलउगम S. ९ ताइ N. १० मुइओ NS; मुईओ A. ११ कयगाइं N. १२ तरलिअलिलिहिं N. १३ भमर P. १४ मयंधइं S; मयंधिइं C. १५ तुज्झु ACN. १६ कण्णचवेडि ABP.

[1]एत्तहे गब्भमरालस हरिणी पउ न हु एक्को वि संचरइ।
एत्तहे कण्णारोविअसरु हयलुद्धउ भण मिउ किं करइ॥ १२.१॥

पीचताः कमलाकरम्॥ १३॥

षण्मात्रचतुष्कं चतुर्मात्रत्रिमात्रौ च कमलाकरम्। यथा—

[2]सयलु वि दिणु संनिहिअहं खेलंतहं चक्कवायमिहुणहं निअवि।
विरहदुक्खं मित्तत्थवणि नाइ दुक्खिअ मउलिहिं कमलायँर वि॥ १३.१॥

चृतौ कुङ्कुमतिलकावली॥ १४॥

चतुर्मात्रसप्तकं त्रिमात्रश्च कुङ्कुमतिलकावली। यथा—

[3]महु दूसहविरहकरालिअहि मयण मेल्लसु जणु मणवंछिउ।
पइं पडिम ठवेविणु करिसु सामि कुंकुमतिलयावलिलंछिउ॥ १४.१॥

ते रत्नकण्ठिके ठजैः॥ १५॥

ते कमलाकरकुङ्कुमतिलकावल्यौ ठजैर्द्वादशभिरष्टाभिश्च यतिश्चेत्तदा रत्नकण्ठिके। यथा—

[4]जइ न हससि न च कुप्पसि न लवसि ता तुहु सहइ रयणकंठिआ।
अन्नह फुरिआहरदरदीसंत णयँर सहइ दसणपंतिआ॥ १५.१॥

[5]पडिहअबहुविहनरवइकुंजरसँइ परसाहिज्जविवज्जिउ।
मँहिअलि निरुवमविक्कमु [6]तुहुं रायरेंयण कंठीरवु निच्छिउ॥ १५.२॥

पचुपाः शिखा॥ १६॥

ठजैरित्यनुवर्त्तते। एकः षण्मात्रः पञ्च चतुर्मात्राः पञ्चमात्रश्च शिखा। यथा—

---

1) एत्तहेत्यत्र इतो मद(गर्व)भरालसा हरिणी न एकमपि पदं संचरति। इतः कर्णोत्पिताशरो हतलुब्धको वर्तते। भण मृगः किं करोति। यदि हरिणीमपेक्षते तदा लुब्धकेन विनश्यते। यदि लुब्धकाद् त्रस्तो भवति तदा हरिणी विनश्यति। 2) सयलु वीत्यत्र सकलमपि दिनं संनिहितानां समीपस्थानां सदा खेलतां चक्रमिथुनानां दृष्ट्वा विरहदौस्थ्यं मित्रस्य सूर्यस्यास्तमने दुःखिता इव मुकुलयन्ति कमलाकरा अपि। 3) महु इत्यत्र हे मदन मम मनोवाञ्छितं जनं त्रिभुवनमेलय दुःसहविरहव्याकुलितायाः। हे स्वामिन् अहं त्वां प्रतिमायां स्थापयित्वा कुङ्कुमतिलकावलीलाञ्छितं करिष्ये। 4) जइ न इत्यत्र यदि न हससि न कुप्यसि न लपसि तदा तव राजते रत्नकण्ठिका। अन्यथा यदि हसनादिकं किमपि करोषि तदा नरं केवलं दशनपङ्क्तिरेव राजते। किंविशिष्टा। स्फुरिताधरेण ओष्ठेन दशनाना। रत्नकण्ठिका तावद्राजते यावन्नखपङ्क्तिं दधते। यदि दन्तपङ्क्तिरेषा तर्हि रत्नकण्ठिका जाता निर्भर्त्सते भावः। 5) प्रतिहतबहुविधनरपतिकुञ्जरतया परसाह्यविवर्जितः महीतले निरुपमविक्रमत्वं राजते कण्ठीरवो सिंहस्त्वम्।

---

१ कथा- ABP; कण्णरो- S. २ हयलेद्धओ CD; हयलेद्धउ AD. ३ मिओ S. ४ दुहु BP. दुल्लु S. ५ कमलायर वि S. ६ तिमहिं CD. ७ मेल्लसु A. ८ करिसु S. ९ संठिउं B. १० नयर ABP. ११ तव BP. १२ महीयलि A. १३ दुहं S; दुहु ACDN. १४ राजराज D, राजत्व N.

[1]जसु अतुलिअगयंवलभरि कंपहिं कुलमहिहेर सवि सवसुंधर।
निअकुलनहयलससहर वीरसिहामणि जयमज्झि तुहुं जि पर॥ १६.१॥

चूतौ छड्डणिका जजैः॥ १७॥

सप्त चतुर्मात्राः त्रिमात्रश्च। जजैरिति दशभिरष्टाभिश्च यतिश्चेत्तदा छड्डणिका।

यथा—

[2]जा किन्नरमिहुणिहिं तुहे पुहईसर पत्थुअ सुचरिअपद्धडिअ।
ता गिरिगुहसंधिहिं[3] कायर तक्खणि हुअ रिउघोरणि[4] छड्डणिअ॥ १७.१॥

चूः स्कन्धकसमम्॥ १८॥

जजैरिति वर्त्तते। अष्ट चतुर्मात्राश्चेत्तदा स्कन्धकसमम्। यथा—

[5][6]णारिहुं वयणुल्लइं सरि खंधयसमजलेहिं मज्झि मज्जंतिअहं।
ओ गिण्हेहिं[7] विब्भमु[8] मणहरअहिणवविअसिअसररुहपंतिअहं॥ १८.१॥

तत् मौक्तिकदाम ठजैः॥ १९॥

ठजैरिति द्वादशभिरष्टभिश्च यतिश्चेत्तदा तदेव स्कन्धकसमं मौक्तिकदाम। यथा—

[9]जइ तुहु पवयणु सामिअ हिअइ ठविज्जइ छणससहरकरनिम्मलु।
ता निच्चउ अहिरामहु मुत्तिअदामहु तरलहु संगहु निप्फलु॥ १९.१॥

नवकदलीपत्रं ढजैः॥ २०॥

ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेव स्कन्धकसमं नवकदलीपत्रम्।

यथा—

---

1) जसु इत्यत्र यस्य तवातुलितगजबलभरे सति कम्पन्ते। के। कुलमहीधराः पर्वताः सर्वसुन्धराः। हे निजकुलनभस्तलशशधर। वीरशिखामणिर्जगन्मध्ये परं केवल त्वमेव। 2) जा किन्नरेत्यत्र यावत्किन्नरमिथुनैः तव हे पृथ्वीधर मस्तुता सुचरितपद्धतिस्तावद्रिपुघोरणयो गिरिगुहासन्धीनां त्वरिका भूताः कातराः सत्यः। 3) नारीत्यत्र नारीणां वदनान्येवेति विगृह्य 'स्वार्थे कश्च वा' (सि० है० ८.२.१६४) इति डुलः प्रत्ययः। वदनानि सरसि स्कन्धकसमजलस्य मध्ये निमज्जन्तीनां मनोहराभिनवविकसितसरोरुहपङ्क्तीनां विभ्रमं गृह्णन्ति। 4) जइ तुहेत्यत्र हे वीतराग यदि तव प्रवचनं हृदये संस्थाप्यते। कीदृक्। क्षणशशधरो राकेन्दुस्तद्वन्निर्मलम्। तदा अभिरामस्य मौक्तिकदामः संग्रहो सत्कीकरणं निष्फलमेव।

---

१ गयवन्त A. २ महिधर C. ३ तुहं जि BD. ४ एत्तिअ N. ५ तुहु A. ६ पद्धईसर A. ७ पत्थुअ BD. ८ तो A. ९ संधिहिं ABP. १० रिउधारणि A. ११ एत्तिअ N. १२ नारिहिं AB. १३ जलहु BNP. १४ मज्जंतिअहिं K; मज्जंतिअह N. १५ गिन्हिहि BDS; गेन्हहिं P. १६ विब्भमह A. १७ सिवहिनयहरह A. १८ सामिअ ABP. १९ पवित्तइ NS. २० पत्त NS. २१ निम्मलु A. २२ अहिरामह B. २३ निप्फलु D.

[1]"नवकयलीपत्तेहिं वीअणु पत्थुवं कमलेहिं विरइउ सत्थरउ।
तह वि हु दाहु पवड्ढइ मज्झे सीउ उवयरणु पिअसहि संवरउ ॥ २०.१ ॥

पचूदैः कृतेष्वेषु स्त्रीत्वम् ॥ २१ ॥

षण्मात्रश्चतुर्मात्रषट्कं द्विमात्रश्चेत्येभिर्मात्रागणैः कृतेष्वेषु स्कन्धकसमादिषु त्रिषु स्त्रीत्वं स्त्रीलिङ्गशब्दाभिधेयत्वम्। स्कन्धकसमा, मौक्तिकदाम्नी, नवकदलीपत्रा चेत्यर्थः। यतिः सैव। स्कन्धकसमा यथा—

[2]"गयपत्तपरिग्गह सुमणसविरहिअ फलवज्जिअ तरुखंधसम।
कंदयपरिवारिअ गिरिकंदरगय तुह रिउ वसहिं विमुक्कम ॥ २१.१ ॥

एवमितरयोरप्युदाहार्यम् ॥ २१.१ ॥

चूपावायामकम् ॥ २२ ॥

सप्त चतुर्मात्राः पञ्चमात्रश्चैक आयामकम्। यथा—

[3]"आयामयधवलत्तणगुणकलिए पेच्छवि केअइदलि अलि विलसिरु।
संभरि पिअनयणइं विरहज्जरजज्जरिअंगमणु मुज्झइ पहिउ चिरु ॥ २२.१ ॥

तत्काञ्चीदाम भजैः ॥ २३ ॥

भजैरिति दशभिरष्टाभिश्च चेद्यतिस्तदा तदायामकं काञ्चीदाम। यथा—

[4]"अंगय फुडिअ तुडिअ नवकंचुअंगुण दलिउ[10] कंचिदामु सनिअंसणु।
तहिं तुह गुणसवणि ऊससिअंगिहिं[11] अप्पटिहयसासणु हूं मयणु॥२३.१॥

रसनादाम ठजैः ॥ २४ ॥

ठजैरिति द्वादशभिरष्टाभिश्च यतिश्चेत्तदा तदायामकं रसनादाम। यथा—

---

1) नवकेत्यत्र नवकदलीपत्रैर्वीजनं प्रस्तुतम्। कमलैरिरचितः सस्तरः। तथापि दाहः प्रवर्तते। (प्रवर्धते P) मम शीतोपचयकरणं शीतोपचारं संवृणु। 2) गयपत्तेत्यत्र हे राजन् विमुक्तक्रमा गिरिकन्दरगतास्तव रिपवः सन्ति। कथंभूताः तरुस्कन्धसमाः। यथा हि तरुस्कन्धाः गिरिकन्दरगताः वसन्ति तथा रिपवोऽपि। कथंभूताः। गजा हस्तिनः पत्राणि वाहनानि परिग्रहः कलत्रं सुमनसः साधवस्तै रहिताः। फलेन गजादीनां उपभोगेन वर्जिताः। कण्टकैः खड्गैः परिवारिताः। तरुस्कन्धपक्षे गतः पत्रपरिग्रहो येषाम्। सुमनोभिः पुष्पैर्विरहिताः फलवर्जिताः कण्टकैः परिवारिताः। 3) आयामेत्यत्र आयतत्वधवलत्वगुणकलिते केतकीदले विलसन्तं अलिं प्रेक्ष्य प्रियानयने स्मृत्वा विरहज्वरजर्जरागमनः मुह्यति पथिकश्चिरम्। 4) अंगेत्यत्र अङ्गानि स्फुटितानि। रोमाञ्चः उत्पन्नः इत्यर्थः। त्रुटिता नवकचुकस्य गुणास्तन्तवः। दलितं खण्डनं परिधानवस्त्रखण्डैर्वं काञ्चिदाम कटिमेखला। तस्याश्च गुणश्रवणेन उच्छ्वसिताङ्गायाः अप्रतिहतशासनो भूतो मदनः।

---

1 पत्तहिं CN. 2 पत्तओ SS; पत्तओ BC. 3 कम्बलिहिं CDE. 4 पवड्ढइ P. 5 मह सीयत्तव° B; मह सीयंतय° P. 6 धवलगुणु° A. 7 पेच्छिवि CD. 8 जरियमणु A. 9 संवरु° K. 10 दलिअ K. 11 उससिअंगगहिं AP. 12 हुउ BP; हु C. 13 रसना° FH.

"तुह दंसणतूरंतिए[1] सुंदर मुद्धए मुणि जं किउ पच्चल्लिउ।
हारु निअंवि निवेसिउ रसणादामु वि थणसिहरोवरि घल्लिउ॥ २४.१॥

चूडामणिर्ढजैः॥ २५॥

ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदायामकं चूडामणिः। यथा—

"बहुविहसमरंगणि सैंगिण नवनव जयसिरि जं पइं परिणिज्जइ।
निवचूडामणि तुह कित्तिहिं मंगलकारणि तं जगु धवलिज्जइ॥ २५.१॥

पचूतैः कृतान्यायामकादीन्युपात्॥ २६॥

षण्मात्रेण चतुर्मात्रपट्केन त्रिमात्रेण कृतान्यायामकादीनि चत्वार्यपि उपात्पराणि भवन्ति। उपायामकं, उपकाञ्चीदाम, उपरसनादाम, उपचूडामणिरित्यर्थः। यतिरपि सैव। तत्रोपायामकम्। यथा—

"तणुअंगिहिं लोअणनलिणिहिं उअ आयामिण केअइदलु निज्जिउ।
वयणुल्लइं कंतिकडप्पिण तह मयलंछणमंटलु अपहत्थिउ॥ २६.१॥

एवमन्यान्यप्युदाहरणीयानि॥ २६.१॥

चूदौ स्वप्नकम्॥ २७॥

अष्टौ चतुर्मात्रा द्विमात्रश्च स्वप्नकम्। यथा—

"पिउ आइउ निवडिउं पईहिं सपणयवयणिहिं अणुणिवि माणु मुआविअ।
इअ सिविणयभरि आलिंगिमि जाम्वहिं ताम्वहिं सहि हयदुंकुडि रडिअ॥ २७.१॥

तद् भुजङ्गविक्रान्तं ठजैः॥ २८॥

ठजैरिति द्वादशभिरष्टभिश्च चेद्यतिस्तदा तदेव स्वप्नकं भुजङ्गविक्रान्तम्। यथा—

"तुह रणि नट्ठ रसावलि गय अरि कोंरणि इणि किर भुअंग विकंतय।
ताहं विलासभवणि पुरि लीलावलि परिभंचहिं निवसहिं चिरु गयमय॥२८.१॥

---

1) तुहेत्यत्र हे मुग्धे तव दर्शनत्वरमाणया मुग्धया मुनि यत्कृतम्। प्रत्युत हारो नितम्बे निवेशितः। रसनादामापि स्तनशिखरोपरि क्षिप्तम्। सम्भ्रमयोगादित्यर्थः। 2) बहुविहेत्यत्र बहुविधसमराङ्गणे सह नवनवया जयश्रीर्यत्परिणीयते तथा। हे नृपचूडामणे तव कीर्तिभिः मङ्गलकारणे महोत्सवे जगद्विश्वं धवल्यते धवलीक्रियते इत्यर्थः। 3) तणुअंगिहि इत्यत्र उन्नम्रता लोचननलिनाभ्यां पदयोर्दैर्घ्येण कदलीदलं विनिर्जितम्। तथा वदनेन कान्तिसमूहेन मृगलाञ्छनमण्डलं चन्द्रबिम्बं अपहस्तितं निराकृतमित्यर्थः। 4) पिउ आइउत्यत्र प्रिय आयातः। निर्वर्णितः पादयोः। स्वप्नवचनैः स्वप्नेवचनैरनुनीय मान मोचितः। इत्यनुना प्रकारेण स्वप्नभरेण आश्लेषान्ते यावत्तावत् इतुकुरुत रटितम्। 5) तुह रणीत्यत्र तवारण्ये रणे महान् रसावलः गजः क्षिप्त। अनेन कारणेन भुजंगा विक्रान्तास्ते विक्रान्तभवने पुरो लीलावने पर्यटन्ति निरवद्यं। तेषु तादृशेषु सत्सु तेषां स्वप्नस्थाने भुजङ्गः सम्भाषितम इत्यर्थः।

---

१ तोरेर A. २ पच्चल्लिउ A.P. ३ सम्भव S. ४ रसु P. ५ सिंहिभो S3. ६ हत्थिभो S3. ७ सिविण P. ८ पयाइं P.P. ९ दुकुरिअ P. १० रडिअ P; इयुर इदुकुरिअ A. ११ रतेवि P.

ताराध्रुवकं ढजैः ॥ २९ ॥

ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेव सप्तकं ताराध्रुवकम्। यथा—

"तुह रिउ वणाय दिसिमोहिअ ताराधुव अवलोअंहिं जाम्वहिं अवहिअ।
वाहजलाविलनयण निअहिं न हु ताम्वहिं हुअ हिअडइ मरणासंकिअ ॥२९.१॥

नवरङ्गकं तजैः ॥ ३० ॥

तजैरिति षोडशभिरष्टाभिश्च यतिश्चेत्तदा तदेव सप्तकं नवरङ्गकम्। यथा—

"दहिअक्खयघणचंदणमालिअनवनवरंगयवावडं निअवि पिअ।
गाढोकंठासरलिअभुअजुउ अवरुंटइ रइरसभरकंदलिअ ॥ ३०.१ ॥

पिश्चीः स्थविरासनकम् ॥ ३१ ॥

तजैरिति वर्त्तते। षण्मात्रत्रयं चतुर्मात्रचतुष्टयं च तजैर्यतिश्चेत्तदा स्थविरासनकम्।

यथा—

"दारविवज्जिअ विसयपरंमुह खलिअगइकम अइपसरिअवेविअ।
वेरग्गिण तवसित्तु पवज्जिवि ठिअं थेरासणि तुह वरुण वि वेरिअं ॥३१.१॥

वृषौ सुभगम् ॥ ३२ ॥

तजैरिति वर्तते। सप्त चतुर्मात्राः षण्मात्रश्च सुभगम्। यथा—

जलइ सरोवरि नीलुप्पलवणु वणि लय फुल्लिअ नहयलि हिमकिरणु।
विरहरहक्कइं तुह तणुअंगिहिं "सुहय विणिम्मिउ जलु थलु नहु जलणु ॥ ३२.१ ॥

---

1) तुह रिउ इत्यत्र तव रिपवो वनं गताः। दिक्मूढाः ताराध्रुवं च अवलोकयन्ति। यावद्वहिताः सावधानाः बाष्पजलाविलनयनाः न पश्यन्ति तावद् भूताः सजाताः हृदये मरणाशङ्किताः। यतो 'यो ध्रुवादि न पश्यति स अचिरेण प्राणत्यागं करोति' इति निमित्तशास्त्रे। 2) दहिअक्खेति दध्यक्षतघनचन्दनमालिकाः नवनवरङ्गकाः वर्णकाश्च तेषु व्यापृतां निरीक्ष्य प्रियां कश्चिदालिङ्गति। कीदृग्। गाढोत्कण्ठया सरलितौ लम्बितौ भुजौ येन सः। तथा रतिरसभरेण कन्दलितः रोमाञ्चितः। 3) दारेत्यत्र तस्या अपि तव वैरिणः स्थविरासने स्थिताः। वृद्धा हे निश्चलासने स्थिता भवन्ति। कीदृशाः वृद्धा वैरिणश्च। दारैर्विवर्जिताः विषयपराङ्मुखाः। विषयाः शब्दाद्याः पक्षे देशाश्च। स्खलितः गतिक्रमो येषां ते। उभयत्र समानं विशेषणम्। अतिप्रसृतं वेपितं येषां ते। वि० समानम्। किं कृत्वा स्थिताः। प्रतिपद्य तपस्वित्वं वैराग्यत्वम्। पक्षे तपःकारित्वम्। केन। वैराग्येण पक्षे विगतरागत्वेन। 4) सुहयेत्यत्र हे सुभग सरोवरे नीलोत्पलवनं ज्वलति। वने पुष्पिता लताः। नभस्तले हिमकिरणः ज्वलति। तव विरहोद्रेकेण तन्वङ्ग्याः जलं स्थलं नभः ज्वलनशीलं निर्मितम्।

---

१ अवलोवहिं BP. २ वावउ N. ३ सरलअभुयभुअ A; -भुयजुउ BP; -भुअजुओ N. ४ अवरुह ACDN; अवकडइ S. ५ तदा dropped in DP. ६ ट्ठिअ N. ७ विरिअ N. ८ तणुअंगहिं C. ९ विणिम्मिओ AS; विगम्मउ P.

पचीपचदाः पवनध्रुवकं ढजैः ॥ ३३ ॥

पण्मात्रश्चतुर्मात्रचतुष्टयं पण्मात्रचतुर्मात्रद्विमात्राः पवनध्रुवकम् । ढजैरिति चतुर्दशभिरष्टभिश्च यतिः । यथा—

[1]बहुहयखरखुरखंडिअमहिउट्ठिअरइं रिउवहुनीसासपवणधुंइं ।
जसु पयाणछणि अच्छिजुअलअणिमिसनयणत्तणु सुरसुंदरि निंदहिं ॥ ३३.१ ॥

पचापचिदाः कुमुदं अजैः ॥ ३४ ॥

पण्मात्रश्चतुर्मात्रद्वयं पण्मात्रश्चतुर्मात्रत्रयं द्विमात्रश्च कुमुदम् । अजैरिति दशभिरष्टाभिश्च यतिः । यथा—

[2]नरु लच्छिविवज्जिउ मुचइ लोइण सव्वु वि ईसरकयअणुसरणु ।
मउलिअ कमलायर निसि अलि मेल्लिवि सेवहिं विअसंतउं कुमुअवणु ॥ ३४.१ ॥

तद्भाराक्रान्तं ठजैः ॥ ३५ ॥

ठजैरिति द्वादशभिरष्टभिश्च चेद्यतिस्तदा तदेव कुमुदं भाराक्रान्तम् । यथा—

[3]कंचणभूसण छड्डिअं खंडिवि वसणु वि लहुइउ तुरिअ पलाइरिहिं ।
तु वि किच्छिण रमणत्थलभारकंतिहिं गम्मइ तुह रिउसुंदरिहिं ॥ ३५.१ ॥

चूतौ कन्दोट्टम् ॥ ३६ ॥

अष्टौ चतुर्मात्राः त्रिमात्रश्च कन्दोट्टम् । यथा—

[4]किं झाईउ तिण अविचलचित्तिण किं निम्मलु तवु किउ समरिउमित्तिण ।
जं तुह मुहविब्भमहरु कंदोट्टं विसंट्ट तरुणि चुंविज्जइ भमरिण ॥ ३६.१ ॥

पाचुता भ्रमरद्रुतं अजैः ॥ ३७ ॥

पण्मात्रद्वयं चतुर्मात्रपञ्चकं त्रिमात्रश्च भ्रमरद्रुतम् । अजैरिति दशभिरष्टभिश्च यतिः । यथा—

---

1) बहुहयेत्यत्र बहुहयखरखुरखण्डितमहुत्थितरजसा रिपुवधूनिःश्वासपवनधुतेन यस्य प्रयाणक्षणे सुरसुन्दर्योऽक्षियुगलस्यानिमिषनयनत्वं निन्दन्ति । तासां विकसितत्वात् लोचनेषु रेणुपातादित्यर्थः । 2) नरु लच्छीत्यत्र नरो लक्ष्म्या विवर्जितो लोकेन मुच्यते । यतः सर्वोऽपि जनः ईश्वरकृतानुश(स)रणः । ऋद्धिमन्तं पुरुषमनुसरतीति भावः । यतोऽलयो भ्रमराः मुकुलितान्संकुचितान् [कमलाकरान्] सन्ध्यान्ते त्यक्त्वा रात्रौ कुमुदवनं सेवन्ते विकसत् । 3) कंचणभूसणेत्यत्र काञ्चनभूषणानि त्यक्त्वा वसनमपि खण्डयित्वा लघूकृतम् । अलघु लघूकृतमित्यर्थः । भूषणादिभारनिरासात् । तथापि कृच्छ्रेण रमणस्थलभाराक्रान्ताभिर्गम्यते भारमुद्वोढुमशक्यत्वात् तव रिपुसुन्दरीभिः । 4) किं झाईत्यत्र किं ध्यानं तेन अविचलचित्तेन । किं निर्मलं तपः कृतं तेन समरिपुमित्रेण सता । यत् हे तरुणि भ्रमरेण तव मुखविभ्रमहरं विकसितपद्मं चुम्ब्यते आश्लिष्यते । तस्याः सौभाग्यातिशयवर्णनमित्यर्थः ।

---

१ धुइ ACNS. २ तइ CN. ३ विवज्जउ P. ४ सव्ववि CDN. ५ कमलायर P. ६ मेल्लवि P. ७ छंडिअ A; छड्डिअ N. ८ झाईउ A; झाइओ B. ९ कंदोट्टु BEPS. १० विसट्टु BEP.

"कुसुमुग्गमु अज्जुणरुक्खकुडंगेहं पेच्छिवि कह वि हु न हु एइ मटहिं[1]।
नवपाउसि सपइ पईसतइ जो जोइ निअत भमर द्रुउ[6] हिंडहिं ॥ ३७.१ ॥

तत्सुरक्रीडितं तजैः ॥ ३८ ॥

तजैरिति द्वादशभिरष्टभिश्च यतिश्चेत्तदा तद् भ्रमरद्रुतं सुरक्रीडितम्। यथा—

"सग्गु पहुचिहिं तुंद परिपथिहि किउ अइसकडु पुहईसर निच्छउ।
सच्छरगण सुर कीलिउं सपहिं नोहिं ति नदणवणपरिसरि इच्छउ ॥ ३८.१ ॥

सिंहविक्रान्तं दजैः ॥ ३९ ॥

दजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेव भ्रमरद्रुतं सिंहविक्रान्तम्। यथा—

" अच्छउ ता उब्भटभुअबलु चक्खुक्खेविण विहडयंतु रिउभडहिअउ।
सुरनरसीहविक्कंतचरिउ लधेविणु ठिउ रेहइ पुहईसरतिलउ ॥ ३९.१ ॥

कुङ्कुमकेसरं तजैः ॥ ४० ॥

तजैरिति षोडशभिरष्टभिश्च यतिश्चेत्तदा तदेव भ्रमरद्रुतं कुङ्कुमकेसरम्। यथा—

"नयणविलासिण निज्जिअ कुवलय कतिकडप्पिण कुंकुमकेसरनिअरु।
दसणझलकइ हीरय "विनडिअ ससहरु वयणिण काइ न मुद्धहि पवरु ॥ ४० १ ॥

चल् बालभुजङ्गमललितम् ॥ ४१ ॥

चल् इति लुप्तविभक्तिको निर्देशः। नर चतुर्मात्रा बालभुजङ्गमललितम्। यथा—

---

1) कुसुमुग्गमेति [अत्र] भ्रमरा अर्जुनवृक्षकुटजानां कुसुमोद्गमं दृष्ट्वापि यदि न मण्डयन्ति सम्प्रति नवप्रावृषि प्रविशन्त्याम्। प्रावृषि जातिपुष्पाणि न भवन्ति तेन जाति पश्यन्त सन्तो द्रुत शीघ्र हिण्डन्ते भ्रमन्ति इत्यर्थ। 2) सग्गु पेत्यत्र हे पृथ्वीश्वर निश्चित तव रिपु[परि]पन्थिभि स्वर्गं गतैरतिसंकट कृतम्। ततः साप्सरोगणा देवा नन्दनवनपरिसरे ईप्सित यथा भवति तथा एव क्रीडितु न शक्नुवन्ति न समर्था भवन्ति। दारग्रहणोत्थभयादित्यर्थ। 3) अच्छउ तेत्यत्र आस्तां तावदुद्भटभुजबल अर्थात्त्वदीयम्। पृथ्वीश्वरतिलक चक्षु क्षेपेणापि रिपुभटहृदय विघटयन् तत्करसिंहविक्रान्त लङ्घित्वा राजते। 4) नयनेत्यत्र नयनविलासेन निर्जितानि कुवलयानि। कान्तिसमूहेन कुङ्कुमकेसरे निर्जिते। दसणझलक्केन दशनकान्त्या हीरका विनटिता। शशधरो वदनेन विनटित। मुग्धाया किं न प्रवर अपि तु [सर्वं] प्रवर वर्तते इत्यर्थं।

---

१ कुडयह AON २ पेच्छवि AB, पेच्छेवि P ३ मडुहिं S ४ पइसतसतइ A ५ जाय B ६ द्रुउ S, हुअ A, हुओ N ७ तुहु P ८ पुहइसर ANS ९ नोहिं ति N, नो तिहिं A १० वण dropped in AODNS ११ विहडयतु N १२ हिअओ C १३ द्विउ BNPS १४ पुहरइसरतिलओ N १५ निज्जिउ A १६ कुवलअ N १७ कडप्पणिं S १८ दसण K १९ विनिडिय ABC २० मुद्धइं P २१ गमविलसित A.

[1]दुर्दमरिउमहिपालभुअंगमललिअइडप्पणि तुहु निच्छइ गरुडोवमु ।
ज पुण पुरिसोत्तिमसिरिचूडामणि वुचसि पुहईवल्लह त निरुत्तमु ॥ ४१ १ ॥

पिचीदा उपगन्धर्वं ठजैः ॥ ४२ ॥

पण्मात्रत्रयं चतुर्मात्रचतुष्टयं द्विमात्रश्चोपगन्धर्वम् । ठजैरिति द्वादशभिरष्टभिश्च यतिः । यथा—

[2]गयघड-तुरयघट्ट-रहवूह-महाभटनिवेह रयणभंडार समिद्धु वि ।
उव गंधव्वनयरसमु पुहइवइत्तणु तिणुं जिम्व चयहिं विवेअवत कि वि ॥ ४२ १ ॥

तत्सङ्गीतं ढजैः ॥ ४३ ॥

ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेवोपगन्धर्वं सङ्गीतम् । यथा—

[3]वज्जहिं गज्जिरघणमद्दल नच्चहिं नहयलअगणि नंव चचलविज्जुल ।
गायहिं सिहि इंअ संगीअउ पाउसलच्छिहिं करइ जुआणह मैंण आउल ॥ ४३ १ ॥

उपगीतं तजैः ॥ ४४ ॥

तजैरिति षोडशभिरष्टभिश्च यतिश्चेत्तदा तदेवोपगन्धर्वमुपगीतम् । यथा—

[4]जसु भुअचलु हेलुद्धरिअधरणि निसुणिवि वणयरगणउवगीउ सुविक्कमु ।
अज्ज वि हरिसिअं नवदब्भकुरदभिण पर्यटहिं कुलमहिहर पुलउग्गमु ॥ ४४ १ ॥

चूपौ गोन्दलम् ॥ ४५ ॥

[5]अष्टौ चतुर्मात्राः पञ्चमात्रश्च गोन्दलम् । यथा—

[6]सइ विज्जुलअविउत्तउ तुहु जलहर करि गुंदलु निट्ठ न जाणसि विरहिअंह ।
इअ भणि चिंतिवि[7] किपि अमगलु दइअंहु असुपवाहु पलट्टउ पथिअह ॥ ४५ १ ॥

---

1) दुर्दमेत्यत्र दुर्दमरिपुमहीपालभुजंगमललितविनाशने त्व निश्चयेन गरुडोपम । यत्पुन पुरुषोत्तमस्य नारायणस्य शिरश्चूडामणिरुच्यसे हे पृथ्वीवल्लभ तच्चिरन्तनम् । द्वितीयपक्षे पुरुषोत्तमा पुरुषप्रधाना । 2) गजगडेत्यत्र गजघटा-तुरङ्गमघटा-रथव्यूह महाभटनिवह-रत्नभाण्डागार समृद्धमपि गन्धर्वनगरसमानम् । आकाशे हि गन्धर्वनगरं क्षणदृष्टनष्टस्वरूप भवति। तत्समान पृथ्वीपतित्व तृणमिव कृपि विवेकवन्तस्त्यजन्ति । 3) वज्रहीत्यत्र गर्जनशीला घना एव मर्दला वाद्यन्त । नभस्तलाङ्गण नृत्यच्चला विद्युतो नृत्यन्ति । गायन्ति शिखिनो मयूरा । इति प्रकारान्तरेण प्रावृट्लक्ष्म्या सगीतक प्रेक्षणक यूनां मनासि आकुलानि करोति । 4) जसु इत्यत्र यस्य भुजबल श्रुत्वा । किंविशिष्टम् । हेलया उद्धृता धरणी येन तत् । पुन किम् । वनचरगणगीतम्। पुन किम्। सुविक्रमम्। अद्यापि हरिता कुलमहीधरा नवदर्भाङ्कुरदम्भेन पुलकोद्गम प्रकटयन्ति रोमाञ्चमुद्वहन्ति । 5) सइत्यत्र स्वय विद्युदुक्तया अविद्युक्तस्त्व हे जलधर कुरु गुन्दल पर्वलम् (यादा-ब्दम्!) । अथवा गुन्दल मर्दलध्वनिं गम्भीरत्वनिमित्तम् । अनिष्टां पीडां न जानासि विरहिजनानाम्। इत्यु पालम्भ श्रुत्वा लज्जयेवा किमप्यनङ्गल मृत्युप्रभृत चिन्तयित्वा पथिकानां अश्रुप्रवाह पर्यन्त पतित ।

---

१ दुरुम D २ उत्तरपाद P ३ तुह V ४ तिरच्छ० P ५ निवहु B ६ ओ BDP ७ जिम्व A, तणु BP ८ नयु DP ९ इह V १० मनु आउल A. ११ हरसिअ B; हरिसिय A १२ पयडिहं DP १३ The sentence is dropped in D १४ विरहिआह A. १५ चिंतवि CDA १६ दइअहं A

पचृता रथ्यावर्णकं ठजैः ॥ ४६ ॥

षण्मात्रश्चतुर्मात्रसप्तकं त्रिमात्रश्च रथ्यावर्णकम्। ठजैरिति द्वादशभिरष्टभिश्च यतिः। यथा—

[1]"विरहरहक्कई सुहय न जंपइ न हसइ जीवइ केवलु पिअपच्चासइ।
अहवा किंचिइं रत्थावण्णणु करिसहुं निच्छेइं मरिसेहु तुहुं जसु नासइ ॥ ४६.१ ॥

तच्चरी ढजैः ॥ ४७ ॥

ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेव रथ्यावर्णकं चच्चरी। यथा—

[2]"चच्चरि चारु चवहिं अच्छर कि वि रासउ खेल्लहिं कि वि कि वि गायहिं वरधवल।
रेयहिं रयणसत्थिअ कि वि दहिअक्खय गिण्हहिं कि वि जम्मूसवि तुइ जिणधवल ॥४७.१॥

अभिनवं तजैः ॥ ४८ ॥

तजैरिति षोडशभिरष्टभिर्यतिश्चेत्तदा तदेव रथ्यावर्णकमभिनवम्। यथा—

[3]"किं अज्ज वि माणंसिणिमाणसि मोणु विसट्टइ माणइ न पयाणउ रमणु।
इअ संजाइण कोविण णावइ आरत्तयतणु अहिणवउग्गमि हिमकिरणु ॥ ४८.१ ॥

चूपचताश्चपलम् ॥ ४९ ॥

तजैरिति वर्त्तते। चतुर्मात्रपट्कं षण्मात्रश्चतुर्मात्रत्रिमात्राश्चपलम्। यथा—

[4]"सुरसरितुंगतरंगसहोअर कित्ति चवल तुह ठाणेंट्ठिउ जगु धवलइ।
पुट्ठि भमंतिहु रिउअवकित्तिहुं कालत्तणु न हु निवचूलामणि कवलेइ ॥ ४९.१ ॥

चूपौ चावमृतम् ॥ ५० ॥

तजैरिति वर्त्तते। चतुर्मात्रपट्कं षण्मात्रश्चतुर्मात्रद्वयं चामृतम्। यथा—

---

1) विरहेत्यत्र विरहोद्रेकेण हे सुभग न जल्पति न हसति केवलं प्रियप्रत्याशया जीवति। अथवा किंचिद् रथ्यावर्णनं शून्यवर्णनं करिष्यामः। निश्चयेन सा म्रियते। तव यशो नश्यति। 2) चच्चरीत्यत्र हे जिनधवल हे जिनवृषभ तव जन्मोत्सवे चच्चरीं कथयन्ति अप्सरसः। काः अपि रासकान् खेलन्ति। काः अपि वरधवलानि गायन्ति। काः अपि वर(रत्न-?)स्वस्तिकान् रचयन्ति। काः अपि दध्यक्षतानि गृह्णन्ति। 3) किमित्यत्र किमद्यापि मनस्विनीनामसे चित्ते मानोऽहंकारो विसर्पति। कस्मात्पादावनतं चरणलग्नं रमणं प्रियं न मानयति। इति संजातेन कोपेनेव आरक्ततनुरभिनवोद्गमे नवोदये हिमकिरणः शीतांशुः। 4) सुरसरीत्यत्र सुरसरिद् गङ्गा। तस्यास्तरङ्गाः कल्लोलाः। तेषां सहोदरा तव चपला कीर्तिः स्थानस्थितमपि जगद् धवलयति। पृष्ठे भ्रमन्तीनामपि वैरिकुकीर्तीनां कालत्वं हे नृपचूडामणे न कलयति नाश्रयति।

---

१ किंतिउ N; केत्तिउ BP. २ निच्छउ P. ३ स मरइ BEP. ४ तुह O. ५ खिल्लहिं P. ६ वरधवलु ABCDN. ७ रेयहि A. ८ च यति dropped in D. ९ मणु AN, १० ठाणठिउ N; ठाणठिउ D. ११ भमंतिहिं B; भमंतिहि P. १२ कित्तिहिं B; कित्तिहि P. १३ कवलइं AN.

"उण्हयं अमयमऊहमऊह वि दूसहु चंदणपंकु वि जलइ लयाहरु वि।
इअ तुह विरहिण तहि तणुअंगिहि सुहय सुहाइ न किंपि[1] वि पसिअँहि दय करिवि ॥५०.१॥

चत्वारौ सिंहपदम् ॥ ५१ ॥

तजैरिति वर्त्तते। नव चतुर्मात्रा द्विमात्रश्च सिंहपदम्। यथा—

"जावयरसरंजिअवरकामिणिपयपडिविंबिहिं लंछिइँ जइ किँर आसि सइ।
संपइ हयवणगयरुहिरारुणसीहपयंकिअ तुह रिउघरइं ति पिच्छिअँहि ॥ ५१.१ ॥

तद्दीर्घकं ढजैः ॥ ५२ ॥

ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेव सिंहपदं दीर्घकम्। यथा—

"दीहरभुअदंडविडंबिअसुरसिंधुरकरु उरयडतुलिअविसालसिलायलु।
उब्भडकोअंडपयंडिमहसिअधणंजउ पिउँ एक्कंगिण जिणइ वेरिवलु॥ ५२.१ ॥

पचूः कलकण्ठीरुतम् ॥ ५३ ॥

ढजैरिति वर्त्तते। षण्मात्रश्चतुर्मात्राष्टकं च कलकण्ठीरुतम्। यथा—

"मिउ मलयसमीरणु अंगिहिं अहिणवपल्लव दिट्ठिहिं कलयंठीरुउ कण्णेहिं।
विसकंदलिसंनिह मुद्धेहे दूसहँ खणि खणि पाणंतिउ मुच्छाभरु अप्पहिं ॥ ५३.१ ॥

पाचूदाः शतपत्रम् ॥ ५४ ॥

ढजैरिति वर्त्तते। षण्मात्रद्वयं चतुर्मात्रषट्कं द्विमात्रश्च शतपत्रम्। यथा—

"एक्कु पसारइ जइ दिअवइ कर तु वि मउलइ सयवत्तु निरारिउँ आउलेउं।
पहु तुहुँ पुण करसरसीरुहु दिअवइलक्खि वि दिट्ठइ फुडु विअसइ अगलेउं ॥५४.१॥

---

1) उन्हयेत्यत्र अमृतमयूखमयूखा अपि चन्द्रकिरणा अपि उष्णकाः। चन्दनपङ्कोऽपि दुःसहः। ज्वलति लतागृहमपि। इति तव विरहेण तस्याः तन्वङ्ग्याः हे सुभग न किमपि सुखायते। प्रसीद प्रसादं कुरु। अनुग्रहं कुरु दयां कुरु। 2) जावयेत्यत्र यावकरसरञ्जितवरकामिनीपदप्रतिबिम्बितैर्लाञ्छितानि यानि किलासन् सदा सम्प्रति हतवनगजरुधिरारुणसिंहपदाङ्कितानि तव रिपुगृहाणि तानि दृश्यन्ते। शून्यत्वात् वनश्वापदानां निवासः। 3) दीहरेत्यत्र दीर्घभुजदण्डविडम्बितसुरसिन्धुरकरः उर स्थलतुलितविशालशिलातलः उद्भटकोदण्डप्रचण्डमहसितधनंजयोऽर्जुनः प्रियः एकाङ्गेन न परसाहाय्येन वैरिबलं जयति। एक एवेत्यर्थः। 4) मिउमेत्यत्र मृदुमलयसमीरणः मन्दैषु। विभक्तिविपरिणामः। विषकन्दलीसन्निभः इति सर्वत्र योज्यम्। अभिनवपल्लवाः दृष्ट्योर्विषसन्निभाः। कलकण्ठीरुतं कर्णयोर्विषकन्दलीसन्निभं विरहात्। विरह- प्राणिनां दुःखकारणं भवतीत्यर्थः। 5) एक्कुपेत्यत्र यदि एकोऽपि प्रसारयति द्विजपतिः करं ततोऽपि मुकुलयति शतपत्रम्। निरालउत्ति निश्चितम्। आउल[उ]त्ति आकुलम्। हे प्रभो तव पुनः करसरसीरुहं हस्तकमलं द्विजपतिलक्षेऽपि दृष्टे स्फुटं प्रकटं अगलेउं यथा भवति तथा विकसति। एकदा द्विजपतिरन्योऽन्यदा प्राक्षपक्षः।

---

१ उन्हय K. २ सुहाइं D. ३ किंचिवि ABP. ४ पडीअहि A. ५ लछिय BP. ६ किरि B. ७ वेरिअहिं BP. ८ भुअदंड A. ९ कोदंड A. १० पिओ BO, पिउ dropped in A. ११ एकगिण A. १२ कलकंठीरउ B. १३ कविहिं BP; कपहिं DN. १४ कंदल- A. १५ मुद्धहि BD. १६ दूसहु BD. १७ मिम- रइ D. १८ निरालिउ CN; निरालिउ BP; निरालउ K. १९ आओलं N. २० मुहु P. २१ अगलगलं K. २१ ओ-

चलतावतिदीर्घे ढजैः ॥ ५५ ॥

चतुर्मात्रनवकं त्रिमात्रश्चातिदीर्घम्। ढजैरिति चतुर्दशभिरष्टभिश्च यतिः।

यथा—

[1]"जइ जाहिं सुरसरिअ जइ गिरिनिज्झर सेवहिं[1]' जइ पइसहि काणणतरुसंडय।
रिउ नियं तुवि नवि छुट्टहिं पहु तुज्झु[2] पयावहु कालहु अइदीहर[3] भुअदंडय ॥५५.१॥

पाचूता मत्तमातङ्गविजृम्भितम् ॥ ५६ ॥

ढजैरिति वर्त्तते। षण्मात्रद्वयं चतुर्मात्रषट्कं त्रिमात्रश्च मत्तमातङ्गविजृम्भितम्।

यथा—

[2]"पयडिअलंछणमयलेहिण उल्लासिअकरदंडिण ताराहरणिण निसिअरिण।
उअ नीसंकिण भउ विरहिणिजणहु जणिज्जइ असमु मत्तमायंगविअंभिइण[4] ॥५६.१॥

चत्वारिंशत्कला एकद्व्यधिका वा मालाध्रुवकम् ॥ ५७ ॥

चत्वारिंशन्मात्रा यद्वा एकद्व्यधिका इति एकचत्वारिंशद् द्विचत्वारिंशद्वा मालाध्रुवकं नाम द्विपदी। यथा—

[3]"तुंह पुहईसरसेहर किंत्ति अकित्तिम सुरहिअदिसिमुह जाम्वहिं सग्गि पइट्ठिअ।
ताम्वहिं तक्खणि सुरसुंदरिलोअहुं सुरतरुकुसुममाल ध्रुवुं हुअ मणउव्विट्ठिअं[5] ॥ ५७.१ ॥

एवमेकद्व्यधिकयोरप्युदाहार्यम्। एवं द्विपदीध्रुवा चतुःषष्टिः ॥ ५७.१ ॥

अयं चात्र विवेकः—

सिंहावलोकितार्येषु विज्ञप्तौ संविधानके।
मङ्गले चैव ध्रुवा प्रोक्ता द्विपद्यन्यत्र[6] कीर्त्यते ॥ ५७.२ ॥ इति ॥

---

1) तुङ्गेत्यत्र तव हे पृथ्वीश्वरशेखर कीर्तिरकृत्रिमा सुरभितदिङ्मुखा यावत्स्वर्गे प्रतिष्ठिता तावत्क्षणे सुरसुन्दरीलोकस्य सुरतरुकुसुममाला ध्रुवं संजाता मनोऽभिप्रिया अवछभेत्यर्थः। 2) जइत्यत्र हे बतिदीर्घभुजदण्ड यद्यपि हे नृपवर तव वैरिणः सुरसरितं गङ्गां प्रतियान्ति यदि च गिरिनिर्झराणि सेवन्ते यदि कान्तारतरुषण्डेषु प्रविशन्ति तथापि काल इव कालात्तव प्रतापाद्न च्युवन्ति। 3) पयडिअेत्यत्र पश्य। निशाकरेण विरहिणीजनस्य असमं भयं जन्यते। कथंभूतेन मत्तमातङ्गवद्विजृम्भितं यस्य सः तेन। प्रकटिता छाम्बनमेव मदलेखा येन सः [तेन]। उल्लासितकरदण्डेन। तारा एवाभरणानि यस्य स तथा [तेन]। मत्तमातङ्गोऽपि मदलेखां प्रकटयति, करदण्डमुल्लासयति, ताराणि दीप्राणि आभरणानि धत्ते बिभर्ति।

---

१ सेवइ S; सेवहिं D. २ तुज्झ ACP. ३ अइदीहिर- N. ४ पडिअ A. ५ उअ S. ६ विअभिइण A; विअंभिइअ C, विअंभिइण BP. ७ तह DN. ८ किंत्तिय किंत्तिय A. ९ लोअह P; लोअहं B. १० ध्रुव S. ११ उच्चिट्ठिअ N. १२ व ANS. १३ द्विपदान्यत्र N.

प्रकारान्तरेण द्विपदीराह ।

चौ विजया ॥ ५८ ॥

एकश्चतुर्मात्रः पादे चेद्विजया नाम द्विपदी । यथा—

[1]सजया, विजया ॥ ५८.१ ॥

पौ रेवका ॥ ५९ ॥

पञ्चमात्रौ रेवका ।

[2]बहुवया, रेवया ॥ ५९.१ ॥

पौ गणद्विपदी ॥ ६० ॥

षण्मात्रौ गणद्विपदी । यथा—

[3]निअ जुवई, गणदु वई ॥ ६०.१ ॥

चतौ स्वरद्विपदी ॥ ६१ ॥

चतुर्मात्रत्रिमात्रौ स्वरद्विपदी । यथा—

[4]पसरदु वेई, अवलिअगई ॥ ६१.१ ॥

पदावप्सराः ॥ ६२ ॥

पञ्चमात्रद्विमात्रौ अप्सराः । यथा—

[5]उअ अच्छरा, गयमच्छरा ॥ ६२.१ ॥

अष्टौ कला वसुद्विपदी ॥ ६३ ॥

यथा—

[6]सु तव सुदु वई, जयेइ नरवई ॥ ६३.१ ॥

चौ करिमकरभुजा ॥ ६४ ॥

चतुर्मात्रद्वयं करिमकरभुजा । यथा—

[7]करिमयरभुओ, उव्वहुअभुओ ॥ ६४.१ ॥

---

1) अथ प्रकारान्तरेण द्विपदीराहेत्यत्र सजया विजयेत्यत्र सजया जयवती विजयादेवी । 2) बहुवया रेवया इत्यत्र बहुवका बहुमा वा रेवया रेवानदी । 3) निअजुवईत्यत्र निजयुवतिं पतिर्गणयतु मानयतित्यर्थः । 4) पसरेत्यत्र प्रसरतु पतिः अस्तलिअगतिः । 5) उअ एत्यत्र पश्य अप्सरसो गतनश्वराः सन्ति । 6) सु तवेत्यत्र । स तव सुतो वि[ज]तः पतिः । यो जयति नरपतिः । 7) करिमेत्यत्र करिमकरभुइ ऊ(औ)वहुअभुइ ।

---

१ These three words are dropped in P. २ पई B, पइ P. ३ उअअच्छरा A. ४ The line is dropped in B.

चलदलाश्चन्द्रलेखा ॥ ६५ ॥

चतुर्मात्रो लघुर्द्विमात्रो लघुश्च चन्द्रलेखा। यथा—

[1]"नवचंदलेह, जिम्व मुद्ध एह ॥ ६५.१ ॥

पतौ मदनविलसिता ॥ ६६ ॥

पञ्चमात्रस्त्रिमात्रश्च मदनविलसिता। यथा—

[2]"मयणविलसिअं, पाववसिअं ॥ ६६.१ ॥

चपौ जम्भेट्टिका[3] ॥ ६७ ॥

चतुर्मात्रपञ्चमात्रौ जम्भेट्टिका[4]। यथा—

[3]"सा तसु वेट्टिआ[5], सुट्ठु जं भेट्टिआ[6] ॥ ६७.१ ॥

पचौ लवली ॥ ६८ ॥

पञ्चमात्रचतुर्मात्रौ लवली। यथा—

[4]"उअ वणावलिआ, फुल्लिअलवलिआ ॥ ६८.१ ॥

सप्त कला दलौ चामरपुरसुन्दरी ॥ ६९ ॥

आदौ सप्तकलास्ततो द्विमात्रो लघुश्चामरपुरसुन्दरी। यथा—

[5]"अमरपुरसुंदरिहिं, भड वरिअ सयंवरिहिं ॥ ६९.१ ॥

पचौ काञ्चनलेखा ॥ ७० ॥

पण्मात्रचतुर्मात्रौ काञ्चनलेखा। यथा—

[6]"मणिकंचणरेहिअ, सुरसुंदरि जेहिअ ॥ ७०.१ ॥

पौ चारुः ॥ ७१ ॥

द्वौ पञ्चमात्रौ चारुः। यथा—

[7]"चारुचंपयरुई, उअं सोहँइ जुअई[8] ॥ ७१.१ ॥

तपताः पुष्पमाला ॥ ७२ ॥

त्रिमात्रपण्मात्रत्रिमात्राः पुष्पमाला। यथा—

---

1) नवेत्यत्र मुग्धा राजते इति क्रियारोपः। यथा नूतनचन्द्रलेखेह। 2) मयणेत्यत्र मदनविलसितं पापम्यवसितम्। 3) सा तेत्यत्र सा तस्या. बेटी मुद्ध भेटिका यद्। 4) उअ वेत्यत्र पश्य वनावली पुष्पितलवलिका। 5) अमरेत्यत्र अमरपुरसुन्दरीभिः भटाः वृताः स्वयंवरे। 6) मणीत्यत्र मणिकाञ्चनरा-जिता सुरसुन्दरी यथा। 7) चारीत्यत्र चारु युवतिः शोभते। त्वं पश्य। [चम्पकरुचिः]।

---

१ जिम O. २ जंनेदिका N. ३ वेट्टिआ N; वेठिआ A. ४ ट्टु BKS. ५ भेट्टिआ N. ६ ओ AD. ७ चारुह A. ८ जुवई A.

[1]एह ललिअदेह बाल । नाइ जाइफुल्लमाल ॥ ७२.१ ॥

तोमरमित्यन्ये ॥ ७२.१ ॥

एवमन्या अपि त्रिंशन्मात्रापर्यन्ता अभ्यूह्याः । अप्रसिद्धाभिधानत्वात्तु नोक्ताः ।

यदाह—

चतुर्मात्रादिकत्रिंशत्प्रान्तैरंद्व्यृगैः पुनः ।
एकानेकैरन्तवर्णैर्यमके द्विपदीं विदुः ॥ ७२.२ ॥[1]

द्विपदीप्रकरणम् ॥

गाथात्रानुक्तम् ॥ ७३ ॥

अत्र शास्त्रे यन्नोक्तं छन्दस्तद् गाथासंज्ञम् ॥ यथा—

दश धर्मं न जानन्ति धृतराष्ट्र निबोधनात्[2] ।
मत्तः प्रमत्त उन्मत्तः क्रुद्धः श्रान्तो बुभुक्षितः ॥
त्वरमाणश्च भीरुश्च लुब्धः कामीति ते दश ॥ ७३.१ ॥

अत्र त्रिभिः षड्भिर्वा पादैः श्लोकः ॥ ७३.१ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ द्विपदीव्यावर्णनो नाम सप्तमोऽध्यायः ॥

ग्रं० १९७; उ० २८०३ ।

* *
*

1) एतेषाम् एषा ललितदेहा बाला भ्रायते जातिपुष्पमालेव ।

सप्तमोऽध्यायः समाप्तः ।

१ पुस्तकात् A. २ निबोध तान् P; निबोधि तान् B.

अथ अष्टमोऽध्यायः ।

अथ प्रस्तारादयः षट् प्रत्ययाः ॥ १ ॥

प्रस्तार्यत इति प्रस्तारो वृत्तानां विस्तरतो विन्यासः । स आदिर्येषां प्रत्ययानां ते प्रस्तारादयः । प्रतीतिजननात्प्रत्ययास्तेऽधिक्रियन्ते । ते च षट् । यदाहुः –

प्रस्तारो नष्टमुद्दिष्टं सर्वैकादिगलक्रिया[1] ।
संख्या चैवाध्वयोगश्च षडेते प्रत्ययाः स्मृताः ॥ १.१ ॥

तत्र प्रस्तारमाह –

प्राक्कल्पाद्यगोऽधो लः परमुपरिसमं प्राक्
पूर्वविधिरिति समयभेदकृद्वर्जं प्रस्तारः ॥ २ ॥

तत्रायं क्रमः । पादे अर्धे छन्दसि वा यावन्तो वर्णास्तावन्तो गुरवः प्रथमविकल्पे स्थाप्याः । यथा – समवृत्तस्य त्र्यक्षरे पादे गुरुत्रयं ऽ ऽ ऽ; ततोऽस्य प्राक्कल्पस्याधो यो गुरुस्तस्याधो लघुः स्थाप्यः । ततः परमुपरिसमं स्थाप्यम् । यत्रोपरि गुरुस्तत्राधस्तादपि गुरुः यत्रोपरि लघुस्तत्राधस्तादपि लघुः । यथा – ऽ ऽ ऽ, । ऽ ऽ; पुनः प्राक्कल्पाद्यगुरोरधो लघुः स्थाप्यः । परमुपरिसममिति वचनात् ततः परं गुरुः स्थाप्यः । ततः स्थापितलघोः प्राक् पृष्ठे पूर्वविधिरिति पूर्वस्य प्रथमविकल्पस्य सर्वगुरोर्विधिर्विधानम् । प्रथमविकल्पे यो वर्णः स चेह गुरुरेव । यथा[3] – ऽ ऽ ऽ, । ऽ ऽ, ऽ । ऽ, एवं सर्वलघुविकल्पं यावदयं विधिः करणीयः । यथा – ऽ ऽ ऽ, । ऽ ऽ, ऽ । ऽ, । । ऽ, ऽ ऽ ।, । ऽ ।, ऽ । ।, । । ।. समयभेदकृद्वर्जमिति - समयोऽभ्युपगमस्तद्भेदकारी विकल्पः[2] प्रस्तारक्रमायातोऽपि वर्जनीयः । संख्यायां न गणनीय इत्यर्थः । अस्य चार्धसमादावुपयोगः ॥ २ ॥

इति समवृत्तप्रस्तारः ।

अर्धसमप्रस्तारे त्वर्धस्य प्रस्तारः कार्यः । यथा – व्यक्षरपादद्वयस्य सर्वगुरोः ऽ ऽ; ऽ ऽ. आद्यगुरोरधो लघुः । ततः परमुपरिसममिति परतो गुरुत्रयं स्थाप्यम् । ऽ; ऽ ऽ. पुनः प्राक्कल्पाद्यगोऽधो ल इति प्रथमपादद्वितीयगुर्वक्षरस्याधो लघुः । परतस्तु परमुपरिसममिति गुरुद्वयम् । ततः प्राक्पूर्वविधिरित्यादौ गुरुः स्थाप्यः ऽ ।; ऽ ऽ. अनया रीत्या सर्वलघुं यावत् षोडश भेदाः –

अथ अष्टमोऽध्यायः

1) सर्वैकादीत्यत्र एक आदौ येषां ते एकादयः ते च ते गताश्च एकादिगलाः सर्वे च ते गलाश्च तेषां क्रिया । 2) तद्भेदकारी विकल्पेत्यत्र अर्धसमादीनां यः प्रस्तुतः प्रस्तारः तस्य भेदस्तात्कर्यापादकः ।

---

१ ततोऽप्यस्य D. २ पृष्टे ABCDP. ३ The following table is dropped in K.

ऽ ऽ ऽ ऽ	ऽ ऽ । ऽ	ऽ ऽ ऽ ।	ऽ ऽ । ।
। ऽ ऽ ऽ	। ऽ । ऽ	। ऽ ऽ ।	। ऽ । ।
ऽ । ऽ ऽ	ऽ । । ऽ	ऽ । ऽ ।	ऽ । । ।
। । ऽ ऽ	। । । ऽ	। । ऽ ।	। । । ।

एषु प्रथम-षष्ठ-एकादश-षोडशाः समवृत्तभेदत्वेन अभ्युपगतार्धसमवृत्तभेदकारित्वाद्वर्जनीयाः । ततः शेषाः द्वादश शुद्धार्धसमभेदाः । विषमप्रस्तारे तु पादचतुष्टयस्य प्रस्तारः कार्यः । यथा—अक्षरपादचतुष्टयस्य सर्वगुरोः (ऽऽ ऽऽ ऽऽ ऽऽ) प्राक्कल्पाद्यगोऽधो ल इत्याद्यगुरोरधो लघुः स्थाप्यः । ततः परमुपरिसममिति परतो गुरुसप्तकं स्थाप्यम् (। ऽ ऽ ऽ ऽ ऽ ऽ ऽ) । पुनः प्रथमपादद्वितीयगुर्वक्षरस्याधो लघुः परमुपरिसममिति परतो गुरुषट्कम् । ततः प्राक् पूर्वविधिरित्यादौ गुरुः स्थाप्यः (ऽ । ऽऽ ऽऽ ऽऽ) । अनया रीत्या सर्वलघुं यावत् षट्पञ्चाशदधिकं शतद्वयं भेदाः । तेषां मध्यात् समार्धसमरूपत्वेन अभ्युपगतविषमप्रस्तारभेदकारित्वात् [1]प्रथमो, द्वितीयात्सप्तदशः सप्तदशः, अन्त्यभेदं यावद्वर्जनीयः । ते च समुदिताः षोडश । तद्यथा—

स्थापना चेयम् ।

ऽ ऽ ऽ ऽ	ऽ ऽ ऽ ऽ	१	ऽ ऽ ऽ ।	ऽ ऽ ऽ ।	१३७
। ऽ ऽ ऽ.	। ऽ ऽ ऽ	१८	। ऽ ऽ ।	। ऽ ऽ ।	१५४
ऽ । ऽ ऽ	ऽ । ऽ ऽ	३५	ऽ । ऽ ।	ऽ । ऽ ।	१७१
। । ऽ ऽ	। । ऽ ऽ	५२	। । ऽ ।	। । ऽ ।	१८८
ऽ ऽ । ऽ	ऽ ऽ । ऽ	६९	ऽ ऽ । ।	ऽ ऽ । ।	२०५
। ऽ । ऽ	। ऽ । ऽ	८६	। ऽ । ।	। ऽ । ।	२२२
ऽ । । ऽ	ऽ । । ऽ	१०३	ऽ । । ।	ऽ । । ।	२३९
। । । ऽ	। । । ऽ	१२०	। । । ।	। । । ।	२५५

[2]अमीषां मध्ये प्रथमषष्ठैकादशषोडशाः समभेदाः । अन्ये अर्धसमभेदाः ।

---

1) प्रथमो द्वितीयेत्यत्र प्रथमः त्याज्यः । द्वितीयादारभ्य सप्तदशः त्याज्यः । स तु प्रथमापेक्षया अष्टादशः स्यात् । ततोऽपि सप्तदशः त्याज्य इति भावार्थः । 2) अमीषां मध्ये प्रथमेत्यत्र अमीषां मध्ये प्रथमषष्ठैकादशषोडशाः समभेदाः । शेषा द्वादशभेदा अक्षरपादस्यार्धसमस्य पादचतुष्टयत्वेन अभ्युपगताः । अथ यदि अक्षरपादस्य विषमस्य पादचतुष्टये प्रसृते चतुरक्षरपादस्य समस्यैव पादद्वयत्वेन एकैको भेदोऽभ्युपगम्यते तदा एते षोडशापि समवृत्तभेदा भवन्ति । तेषां मध्ये चतुरक्षरपादस्यार्धसमस्य यदि पादद्वयत्वेनैकैको भेदोऽभ्युपगम्य पृथक् क्रियते तदा भेदा बहवो नि सरन्ति । ततो अक्षरविषमप्रस्तारे समार्धसमयोरपि अक्षरमेव पादचतुष्टयं गणनीयम् । न तु पूर्वोक्त्या चतुरक्षरं पादद्वयं गणनीयम् एवं तुल्यं सर्वत्र ।

---

१ शु० समवृत्तभेदाः A. २ विषमविस्तारे B. ३ The word is dropped in BP. ४ सप्तदशसप्तदश. BP. ५ The two words are dropped in DN.

अथ जातिष्वार्यायाः प्रस्तारो यथा–

प्रथमस्यं गणस्य द्विगुरोः (ऽ ऽ) आद्यस्य गुरोरधो लघुः स्याप्यः। ततः परमुपरिसममिति परगुरुसहितद्वितीयादिगणानामधो गुरवः स्याप्याः। प्राक्पूर्वविधिरिति यावत्यः प्रथमगणे मात्रास्तावत्यो गुरुलघुक्रमेण पूरणीयाः। ततश्चतुर्मात्रत्वात्पूर्वगणस्य एका मात्रा प्राक्[4] न्यसनीया। तेन द्वितीयभेदे प्रथमगणो गुर्वन्तः (।। ऽ), अन्ये तु गुर्वात्मकाः। पुनराद्यगुरोरधो लघुस्ततः परमुपरिसममिति अन्ये गणा गुर्वात्मकाः। प्राक्पूर्वविधिरिति मात्रात्रये प्रथमगणसंबन्धिन्यवशिष्टे यदि लघुपूर्वो गुरुर्दीयते तदा नौजे जः इति वचनात् समयभेदः स्यात्। ततो गुरुपूर्वो लघुर्दीयते इति तृतीयभेदे गुर्वादिः (ऽ।।) प्रथमो गणः। शेषाश्च तथैव[1]। पुनराद्यगुरोरधो लघुस्ततः परमुपरिसममिति द्वौ लघू शेषाश्च गणा गुर्वात्मकाः। प्राक्पूर्वविधिरिति एका मात्रा प्रथमगणे अवशिष्यते। सा प्राक् न्यस्येति चतुर्थे भेदे सर्वलघुः प्रथमो गणः (।।।।), शेषाश्च तथैव। पुनर्द्वितीयगण-प्रथमगुरोरधो लघुः। ततः परमुपरिसममिति द्वितीयगणद्वितीयगुरुत आरभ्य सर्वे गुरवः। प्राक् पूर्वविधिरिति यदि लघुपूर्वं गुरुद्वयं दीयते तदा गणनाशात्समयभेदः स्यात्। तदेतन्मा भूदिति द्वितीयगणापेक्षयैव द्वितीयगणलघोः पूर्वो लघुर्देयः। "प्रथमश्च गणः सर्वगुरुरिति पूर्वविधिना गुर्वात्मक इति द्विगुरुर्गुर्वन्तश्च पञ्चमे भेदे प्रथमद्वितीयौ गणौ। ततः षष्ठसप्तमाष्टमेषु भेदेषु क्रमेण द्वितीयतृतीयचतुर्थभेदतुल्यः प्रथमो गणो द्वितीयश्च गुर्वन्त एव। ततो नवमे भेदे द्वितीयगणगुरोरधो लघुः। ततः प्राक्पूर्वविधि-रिति लघुपूर्वो गुरुः प्राग् देयः। तेन जगणस्तत्र संपन्नः। "प्रथमश्च गुर्वात्मकः। उपरि-तुल्यत्वं पुनः "परेषां स्थितमेव। यावद्विंशतितमे भेदे गणद्वयं लघुरूपं संपन्नमिति "द्वितीयो गणो विंशत्या निष्ठितः। तृतीयगणः "चतुर्भेदः एकैको "विंशतिकृत्वोऽशीत्या निष्ठितः। चतुर्थगणः "पञ्चभेदः एकैकोऽशीतिकृत्वः चतुःशत्या निष्ठितः। पञ्चमगणश्चतुर्भेदः एकैकः चतुःशतीकृत्वः षोडशशत्या निष्ठितः। षष्ठगणो द्विभेदः एकैकः षोडशशतीकृत्वो

---

1) तथैव पुनरित्यत्र यथाक्रम न्यस्ता गुर्वात्मका अन्ये इति। 2) प्रथमश्च गणेत्यत्र गणस्य चतुर्मात्रिकतया नाशो गणनाशः। तथा हि यदि पूर्वं गुरुद्वयं दीयते तदा प्रथमो गणश्चिमात्रो द्वितीयः पञ्चमात्रः प्रथमश्चिमात्रो वा स्यात्। गणस्तु चतुर्मात्र एव स्याप्य इति समयः। 3) प्रथम पाश्चात्यः 4) परेषां स्थितेत्यत्र अमेतनानाम्। तथाविधमेव सर्वगुरुरूपम्। 5) चतुर्भेद इत्यत्र जगणरहितत्वात्। 6) विंशतिकृत्वो इत्यत्र विंशतिश्चतुर्भिर्गुणिताशीतिः। 7) पञ्चभेदेत्यत्र जगणसहितत्वात्।

---

१ प्रथमगणस्य BP. २ आद्यगुरो° A ३ अनेका मात्रा O; अनेकमात्रा BP. ४ प्राक् dropped in A. ५ प्रथमो गणो ABCP. ६ गुर्वादि AN ७ अवशेष्यते AO. ८ सा च BP. ९ चतुर्भेदे N, चतुर्थभेदे O. १० द्वितीयगण dropped in A. ११ लघुपूर्वोकगुरु A. १२ गणद्वयलघु° O. १३ द्वितीयगणो O. १४ अशीत्या P. १५ चतुर्थगणपञ्चभेद एकैकशीतिकृत्व A.

द्वात्रिंशच्छत्या निष्ठितः । सप्तमगणश्चतुर्भेदः एकैको द्वात्रिंशच्छतीकृत्वो द्वादशभिः सहस्रैः अष्टशत्युत्तरैर्निष्ठितः । अन्त्यो गुरुरेक एव । एकेन गुणितं तदेवेति तावद्भिरेव निष्ठितः । एवं निश्चितं पूर्वार्धम् । परार्धमपि गणविकल्पान्निश्चित्य प्रस्तारयेत् । एवमन्येष्वपि मात्राछन्दःसु प्रस्तारो ज्ञेयः इति ॥ २ ॥

समवृत्तानां प्रकारान्तरेण प्रस्तारमाह—

ग्लावधोऽधो द्विर्द्विरतः ॥ ३ ॥

समवृत्तानां प्रस्तारे चिकीर्षिते प्रथमपङ्क्तौ यावत्संख्यापरिमाणमेकान्तरितावधोऽधो गुरुलघू स्थाप्यौ । अतः परं द्वितीयादिपङ्क्तिषु द्विगुणद्विगुणा गुरवो लघवश्च अधोऽधः स्थाप्याः । यथा—त्र्यक्षरे छन्दसि प्रथमपङ्क्तौ एकान्तरिताः गुरुलघवः अष्टसंख्या यावत् स्थाप्याः । द्वितीयपङ्क्तौ द्वौ द्वौ । तृतीयपङ्क्तौ चत्वारश्चत्वारः ।

इति प्रस्तार उक्तः ॥ ३ ॥

समवृत्तानां नष्टमाह—

नष्टेऽङ्कस्य दले लः सैकस्य गः ॥ ४ ॥

किंचिद्वृत्तं नष्टं चतुर्थं पञ्चमं वा । तत् समं यदि भवति तदा दलेऽर्धे कृते ल इति लघुर्लभ्यते । पुनर्दले लघवो लभ्यन्ते । अथ वैषम्यात् संख्या अर्धं न ददाति तदा सैकस्य गः इति सैकस्याङ्कस्य दले कृते गुरुर्लभ्यते । पुनस्तथेति नष्टवृत्तमुत्पद्यते । यथा—अत्रैव त्र्यक्षरे छन्दसि पञ्चमं वृत्तं नष्टम् । पञ्च अर्धं न ददतीति सैकाः षट् तदर्धे गुरुः । पुनस्त्रयोऽर्धं न ददति । सैकाश्चत्वारः तदर्धे गुरुः । द्वयोरर्धमेक इति लघुरिति द्वौ गावेको लः ईदृशं पञ्चमं वृत्तं (ऽ ऽ ।) इति ॥ ४ ॥

समवृत्तनष्टविधिरुक्तः । जातीनां नष्टविधिरुच्यते—

नष्टाङ्के गणैर्हृते शेपसंख्यो गणो देयो
राशिशेषे लब्धं सैकम् ॥ ५ ॥

नष्टस्य वृत्तस्याङ्के स्थापिते गणैर्गणविकल्पैर्हृते यच्छेषं तत्संख्यो गणो देयः । यत्र तु राशिशेषं भवति तत्र लब्धं सैकं कार्यम् । ततः पुनस्तस्मिन्नुत्तरगणविकल्पैर्हृते शेपसंख्यो गणो देयः । यथा—आर्याप्रस्तारे एका कोटिरेकविंशतिर्लक्षाः एकविंशतिः सहस्राः द्वे शते द्वादशोत्तरे इत्येतावत्संख्यं वृत्तं नष्टं कीदृशमिति पृष्टे प्रथमगणश्चतुर्विकल्प इति चतुर्भिर्नष्टाङ्कं हरेत् । लब्धं त्रिंशल्लक्षास्त्रिंशत्सहस्रास्त्रीणि शतानि त्र्युत्तराणि शेषं चत्वारि[1]

1) शेष चत्वारीत्यत्र अत्र नष्टाङ्कराशिर्निःशेषो जात । परन्तु चतुर्भिर्भागो हृत । तत शेष चत्वारि ।

---

१ नष्टाङ्कस्य N २ पुनस्तद्वत् N ३ उद्यायते C ४ सैका N, सैकां A ५ त्रयार्धं N ६ ददाति B ७ हृतशेष० N ८ राशिप A ९ गण dropped in A १० चतुर्धाव० N ११० छन्दो०

इति तद्विकल्पेषु चतुर्थं सर्वलघुं न्यसेत् (।।।।)। द्वितीयो गणः पञ्चविकल्प इति पञ्चभिर्हरेत्। लब्धं षट् लक्षाः षट् सहस्राः षष्ट्यधिकाः। राशेश्च हृताः शेषं त्रीणि इति तद्गणविकल्पेषु तृतीयं मध्यगुरुं न्यसेत्। ततो राशिशेषं लब्धं सैकं इति वचनाल्लब्धं सैकं कृत्वा तृतीयगणश्चतुर्विकल्प इति चतुर्भिर्हरेत्। लब्धमेकं लक्षमेकपञ्चाशत्सहस्राः पञ्चशतानि पञ्चदशोत्तराणि। राशिशेषमेक इति तद्विकल्पेषु प्रथमं सर्वगुरुं न्यसेत्। लब्धं सैकं कृत्वा चतुर्थगणस्य पञ्चविकल्पत्वात् पञ्चभिर्हरेत्। लब्धं त्रिंशत्सहस्राः त्रीणि शतानि त्र्युत्तराणि। राशिशेषमेक इति प्रथमविकल्पं सर्वगुरुं न्यसेत्। ततो लब्धं सैकं कृत्वा पञ्चमगणस्य चतुर्विकल्पत्वात् चतुर्भिर्हरेत्। लब्धं पञ्चसप्ततिः शतानि षट् सप्तत्यधिकानि। शेषं चत्वारीति चतुर्थविकल्पं सर्वलघुं न्यसेत्। ततः षष्ठस्य द्विविकल्पत्वात् द्वाभ्यां हरेत्। लब्धं सप्तत्रिंशच्छतानि अष्टाशीत्यधिकानि। शेषं द्वे इति द्वितीयविकल्पं सर्वलघुं न्यसेत्। ततः सप्तमगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत्। लब्धं नव शतानि सप्तचत्वारिंशदधिकानि। शेषं चत्वारीति चतुर्थविकल्पं सर्वलघुं न्यसेत्। अन्ते नित्यविन्यासं गुरुं न्यसेत्। ततः सप्तमगणाल्लब्धं परार्धादिगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत्। लब्धं द्वे शते षट्त्रिंशदधिके। राशिशेषं त्रीणीति तृतीयविकल्पमादिगुरुं न्यसेत्। ततो लब्धं सैकं कृत्वा द्वितीयगणस्य पञ्चविकल्पत्वात् पञ्चभिर्हरेत्। लब्धं सप्तचत्वारिंशत्। राशिशेषं द्वे इति द्वितीयविकल्पमन्तगुरुं न्यसेत्। ततो लब्धं सैकं कृत्वा तृतीयगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत्। लब्धं द्वादश। शेषं चत्वारीति चतुर्थविकल्पं सर्वलघुं न्यसेत्। ततश्चतुर्थगणस्य पञ्चविकल्पत्वात्पञ्चभिर्हरेत्। लब्धं द्वे। राशिशेषं द्वे इति द्वितीयविकल्पमन्तगुरुं न्यसेत्। ततो लब्धं सैकं कृत्वा पञ्चमगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत्। लब्धं शून्यम्। राशिशेषं त्रीणीति तृतीयविकल्पमादिगुरुं न्यसेत्। षष्ठो नित्यविन्यासो लघुरेव। ततो लब्धं सैकं कृत्वा सप्तमगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत्। लब्धं शून्यम्। शेषमेकमिति प्रथमविकल्पं सर्वगुरुं न्यसेत्। अन्ते नित्यविन्यासो गुरुरेव। स्थापना यथा– ।।।।, ।ऽ।, ऽऽ, ऽऽ, ।।।।, ।।।।, ।।।।, ऽ; ऽ।।, ।।ऽ, ।।।।, ।।ऽ, ऽ।।, ।, ऽऽ, ऽ. १२१२१२१२ संख्यतमैषा आर्या।

यदाह–

नष्टाङ्के प्रथमं भक्ते गणाङ्कैश्चतुरादिभिः[6]।
शेषसंख्यो गणो देयो लब्धं कुर्यात्सरूपकम् ॥ ५.१ ॥
पुनर्भजेत्पुनर्लब्धं सरूपं शेषसंख्यया।
गणान्दद्याद्गते शेषे गाथायाः प्राग्गणक्रमः ॥ ५.२ ॥

एवमन्येष्वपि मात्राच्छन्दःसु नष्टविधिर्ज्ञेयः। इति नष्टानयनम् ॥ ५.२ ॥

---

१ चत्वारि A. २ हृतशेषं AD; हृतशेषनीमि C. ३ लब्धं dropped in D. ४ चतुर्विकल्पं A. ५ चतुर्विकल्पं AC. ६ षष्ठमेदत्वात् ABD. ७ स्थापना to आर्या dropped in ABP. ८ चतुरादिकैः DP.

अथोद्दिष्टस्य संख्यापरिज्ञानार्थमाह—

उद्दिष्टेऽन्त्याल्लाद् द्विर्ग्येकं[1] त्यजेत् ॥ ६ ॥

केनचित्प्रस्तारोक्ते वृत्ते कतिथमित्युद्दिष्टे यथा—(ऽऽ।) एवं गलेषु स्थापितेषु अन्त्याल्लादारभ्य अर्थात् [1]पश्चानुपूर्व्या अधो द्विरिति द्विगुणोऽङ्कः कार्यः । ग् चेदेकं त्यजेत् । गुरोरधो द्विगुण एकोनः कार्यः । अयमर्थः—अन्त्यस्य लस्याधो योऽङ्कस्तं द्विर्गुणयेत् । स च निराकारायाः आवृत्तेरसंभवात्प्रथमातिक्रमे कारणाभावादेक एव परिशिष्टो द्विगुणीकृतो द्विको जातस्ततस्तस्मादपनीय तत्पूर्वस्य गुरोरधो निधाय द्विगुणीकृतश्चतुष्कः । स एकोनः कृतस्त्रिकः । पुनस्तत्पूर्वस्य गुरोरधो निधाय द्विगुणीकृतः षट्कः । स एकोनः कृतः पञ्चकः । तदीदृशं पञ्चमं वृत्तमिति ॥ ६ ॥

अथ जातीनामुद्दिष्टमाह—

आद्यमन्त्येन हतं व्यधस्तनम् ॥ ७ ॥

स जयति कुमारपालः श्रीमानवनिपतिश्रुतविनुतचरणः ।
निर्मलयशसा धवलितभुवनश्चक्रधरतुल्यौजाः ॥ ७.१ ॥

केनचिदियमार्या कतिथीति पृष्टे अस्या गणान्संस्थाप्य तदधश्चतुःपञ्चादिकां विकल्पसंख्यां यथासंभवं लिखेत् । ततो गणितक्रमेण आद्यमन्त्येन[2] हत्वा व्यधस्तनमिति तत्र दृष्टविकल्पादधस्तनान् विकल्पान् राशेर्व्यपोह्य[3] संख्यां लब्धामेतावतिथं वृत्तमिति निर्दिशेत्[4] । कथम् । अन्ते न्यस्तस्य अर्धगणस्य[5] अविकल्पत्वात् एकमङ्कं[6] अधो निधाय सप्तमगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हन्यात् । जातानि चत्वारि । इह दृष्टः सर्वगुरुः । तस्याधस्तनान् अन्तगुरु-आदिगुरु-सर्वलघून् त्रीन् असाद्राशेः पातयेत् । शेषमेकम् । षष्ठ्याविकल्पः । [7]पञ्चमे चतुर्भिर्हते अधस्तने चैकस्मिन्सर्वलघौ त्यक्ते त्रीणि । चतुर्थे पञ्चभिर्हतेषु पञ्चदश । [8]अधस्तनेषु त्रिषु त्यक्तेषु द्वादश । [9]तृतीये चतुर्भिर्हतेषु अष्टचत्वारिंशत् । त्याज्यं नास्ति । द्वितीये[10] पञ्चभिर्हतेषु त्रिषु त्यक्तेषु द्वे शते सप्तत्रिंशदधिके । प्रथमे

---

1) पश्चानुपूर्व्या अधो द्विरित्यत्र लघोः प्रान्त्यसम्बन्धिनोऽधो द्विगुणः । यदा प्रान्ते गुरुर्भवति तदा द्विगुणं अङ्कं कृत्वा एकं पातयेत् । 2) अन्त्येन हतं । 3) व्यपोह्य अपनीय । 4) अर्धगणेत्यत्र अर्धगणं हि एकगुरुत्वात् । 4) पञ्चमे चतुर्भिर्हते अधस्तने दले पञ्चमे स्थाने यश्चतुर्लक्षणोऽङ्कः स एकेन अवशिष्यताङ्केन गुण्यः । जाताश्चत्वारः । तदनन्तरमत्र पञ्चमे स्थाने सर्वलघुः पाश्चात्यो गणोऽस्ति अतः प्रान्त्योऽस्याग्रे स्थितः सर्वलघुसम्बन्धी चतुर्णां मध्ये निष्काशनीय । अवशिष्टास्त्रयः । 5) अधस्तनेषु इत्यत्र अत्र प्रान्तगुरस्ति अतो गणसम्बन्धि अङ्कत्रयं पातयेत् ।

---

१ द्विर्ग्येकं B, द्विर्ग्येकD, द्विर्गेकं ADP. २ यथा ISS एवं लगेषु CV, यथा SSI एवं लगेषु A, यथा ISI एवं लगेषु D ३ द्विर्गुणयेत् B. ४ तत्पूर्वगुरो BP. ५ कृत dropped in A ६ एकपङ्क्तिः C ७ कृतः dropped in CD. ८ इदं पञ्चममिति A. ९ अन्तेन ALCDHP. १० अन्तेन ADOH. ११ अधस्तान् N. १२ निर्दिशेत् B. १३ एकमङ्कमन्ते निधाय A; एकमधो निधाय B. १४ तृतीये स्थाने B १५ द्वितीये स्थाने B.

चतुर्भिर्हतेषु एकस्मिन् त्यक्ते नव शतानि सप्तचत्वारिंशदधिकानि । पूर्वार्द्धान्त्यार्यागणश्चाविकल्पः । सप्तमे चतुर्भिर्हतेषु सप्तत्रिंशच्छतान्यष्टाशीत्यधिकानि । त्याज्यं नास्ति । षष्ठे द्वाभ्यां हतेषु पञ्चसप्ततिः शतानि षट्सप्तत्यधिकानि । त्याज्यं नास्ति । पञ्चमे चतुर्भिर्हतेषु त्रिंशत्सहस्राण्येकोनत्रिंशत्सहस्राण्येकोनत्रिंशत्सहस्राण्येकोनत्रिंशत्सहस्राणि शतानि चतुरुत्तराणि । त्याज्यं नास्ति । चतुर्थे पञ्चभिर्हतेषु चतुर्षु त्यक्तेषु लक्षमेकमेकपञ्चाशत्सहस्राः पञ्च शतानि षोडशाधिकानि । तृतीये चतुर्भिर्हतेषु त्रिषु त्यक्तेषु षट् लक्षाः षष्टिशतानि एकषष्ट्यधिकानि । द्वितीये पञ्चभिर्हतेषु द्वयोस्त्यक्तयोस्त्रिंशल्लक्षात्रिंशत्सहस्राण्येकोनत्रिंशत्सहस्राण्येकोनत्रिंशत्सहस्राणि शतानि त्र्युत्तराणि । प्रथमे चतुर्भिर्हतेषु त्याज्याभावादेका कोटिरेकविंशतिर्लक्षाः एकविंशतिः सहस्राः द्वे शते द्वादशोत्तरे एतावतिथीति निर्दिशेत् ।

यदाह—

गणानुद्दिष्टगाथायाः संस्थाप्य तदधो लिखेत् ।
चतुःपञ्चादिकां संख्यां स्थानस्थानोचितां ततः ॥ ७.२ ॥
हत्वा हत्वोद्यमन्त्येन चोपरिस्थंगणादधः ।
"पृथग्धृतगणेभ्योऽथ गणसंख्यां विकल्पयेत्" ॥ ७.३ ॥
हताद्वार्योचितात् तावद्यावदाद्याङ्कसंभवः ।
तत्संख्यामुद्दिशेद्गाथामुद्दिष्टप्रत्यये बुधः ॥ ७.४ ॥

एवमन्यास्वपि जातिषु यथास्वविकल्पं ज्ञेयम् ॥ इत्युद्दिष्टसंख्यानयनम् ॥७॥

अथ सर्वैकादिगलक्रियापरिज्ञानार्थमाह—

वर्णसमानेककान्सैकानुपर्युपरि निक्षिपेन्
मुक्त्वान्त्यं सर्वैकादिगलक्रिया ॥ ८ ॥

वर्णसमान्वर्णतुल्यान् । यावन्तो वर्णास्तावतः एककान् सैकानेकेन सहितान् विन्यस्य उपर्युपरि निक्षिपेदन्त्यं मुक्त्वा । इयं सर्वैकादिगलक्रिया । सर्वगाणां सर्वलाघूनां एकादिगानामेकादिलघूनां च परिज्ञानाय क्रियाकरणमित्यर्थः । यथा चतुरक्षरे छन्दसि पञ्चैकैका उपर्युपरि न्यस्यन्ते ।

१	१	१	१	१	१	ततोऽधस्तनो द्वितीये क्षिप्यते । द्वितीयोऽपि तृतीये ।
१	१	१	४	४	४	तृतीयोऽपि चतुर्थे । मुक्त्वान्त्यमिति वचनादन्त्यो वर्ज्यते ।
१	१	३	३	६	६	पुनरधस्तनो द्वितीये क्षिप्यते द्वितीयोऽपि तृतीये अन्त्यं
१	२	२	२	३	४	मुक्त्वा । पुनरधस्तनो द्वितीये क्षिप्यते । जातम् । (See
१	१	१	१	१	१	the last row in the table). अत्र प्रथममेकं सर्वगुरु

1) पृथग् धृतगणेत्यत्र पृथक् कृतां मण्डितगणेभ्यः । 2) विकल्पयेदित्यत्र पठगणानुसारेण गणसंख्यां विचारयेत् । कोऽर्थः । अवशिष्यमाणगणसंख्याङ्कं हतादङ्कात् पातयेत् ।

१ एतावतिथीमिति AbP. २ चतुष्पञ्चा० CDN. ३ one हत्वा dropped in B. ४ चोपरिष्टगणात् A. ५ वार्योचिता तावत् CN. ६ इत्युद्दिष्टानयनम् A. ७ उपर्युपरि क्षिपेत् CDFGHN. ८ तावन्तः CDF. ९ विन्यस्य B. १० उपर्युपरि क्षिपेत् BCNP. ११ सर्वगानां F. १२ dropped in A. १३ पञ्चैका B. १४ प्रथमके N.

(ऽऽऽऽऽ)। चत्वार्येकलघूनि त्रिगुरूणि (।ऽऽऽ;ऽ।ऽऽ;ऽऽ।ऽ;ऽऽऽ।)। षट् द्विलघूनि द्विगुरूणि (।।ऽऽ;।ऽ।ऽ;ऽ।।ऽ;।ऽऽ।;ऽ।ऽ।;ऽऽ।।)। चत्वारि त्रिलघूनि एकगुरूणि (।।।ऽ;।।ऽ।;।ऽ।।;ऽ।।।)। एवमेकं सर्वलघु (।।।।;)। इयमेव सर्वैकादिगलक्रिया प्रथमपष्ठैकादशषोडशसमवृत्तहान्या द्व्यक्षरार्धसमस्य। यथा—४, ४, ४। अत्र चत्वारः एकलघवश्चत्वारो द्विलघवश्चत्वारस्त्रिलघवः। एवमन्येष्वप्यर्धसमेषु ज्ञेयम्। तथा अष्टाक्षरजातेः सर्वैकादिगलक्रिया द्व्यक्षरसमवृत्तहान्या चतुरक्षरार्धसमहान्या च द्व्यक्षरविषमस्य। यथा—८, २६, ५३, ६६, ५३, २६, ८। एवमन्येष्वपि विषमेषु ज्ञेयम्॥ ८॥

अथ जातीनां सर्वैकादिगलक्रियामाह—

आद्यभेदानधोऽधो न्यस्य परैर्हत्वाग्रे क्षिपेत्॥ ९॥

आर्यायामाद्यगणस्य भेदान् अलघु-द्विलघु-चतुर्लघून् एकं द्वौ एकं च इत्यधः स्थापयित्वा परैर्द्वितीयगणभेदैः अलघु-द्विलघु-चतुर्लघुभिः एक-त्रि-एकसंख्यैः कपाट-सन्धिक्रमेण स्थापितैः। यथा (१, २, ११, ३, १)। पृथक् पृथग् गुणयित्वा अग्रे क्षिपेदिति। एकेन गुणिते जातमग्रतः स्थाप्यम् १, २, १। अत्र त्रिभिर्गुणितं (३, ६, ३) क्षिपेत्। जातं (१, ५, ७, ३)। पुनरेकेन (१, ३, १) गुणितमत्र क्षिपेत्। जातं (१, ५, ८, ५, १)। अत्र एको लघुः पञ्च द्विलघवः अष्टौ चतुर्लघवः पञ्च षट्लघवः एकत्र सर्वलघुरिति। पुनरस्य राशेरनयैव दिशा तृतीयगणविकल्पैर्घाते जातस्य परस्मिन् राशौ क्षेपे जातं (१, ७, १९, २६, १९, ७, १)। पुनरस्य राशेरनयैव दिशा चतुर्थ-गणविकल्पैर्घाते जातस्य परस्मिन्राशौ क्षेपे जातं (१, १०, ४१, ९०, ११६, ९०, ४१, १०, १)॥ ९॥

अथ संख्यामाह—

ते पिण्डिताः संख्या॥ १०॥

ते सर्वैकादिगलाङ्काः पिण्डिताः एकीकृताः संख्या भवन्ति। तद्यथा—अस्मिन्नेव चतुरक्षरे छन्दस्येकं चत्वारि षट् चत्वारि एकमिति षोडश वृत्तानि भवन्ति। एवमर्ध-समेषु विषमेषु मात्राच्छन्दःसु च ज्ञेयम्॥ १०॥

---

१ dropped in A. २ एकेकं CK. ३ इयमेव A. ४ न dropped in A. ५ अष्ट अक्षरजातेः B; अष्टाक्षरजातौ A. ६ लघु-द्विलघु M. ७ सन्धि dropped in B. ८ यथा १,१,११,१,१ A; १,१,११,१,१ BP. ९ गणयित्वा A. १० गुणितेन M. ११ त्रिभिर् क्षिप्ते A; त्रिर्गुणितं तत् क्षिपेत् B. १२ जातं यथा B. १३ चतुर्थस्य A.

अथ प्रकारान्तरेण समवृत्तानां संख्यामाह—

वर्णसमद्विकहतिः समस्य ॥ ११ ॥

समवृत्तस्य पादे यावन्तो वर्णास्तावतां द्विकानामन्योऽन्यघातः समवृत्तानां संख्या। तत्र उक्तायां द्विकस्यान्योऽन्यघातो न संभवतीति द्विभेदैव। अत्युक्ता द्विकद्वयघाते चतुर्भेदा। मध्या द्विकत्रयघाते अष्टभेदा। प्रतिष्ठा द्विकचतुष्टयघाते षोडशभेदा। एवं यावदुत्कृतेः षड्विंशतेः द्विकानामन्योऽन्यघाते षट् कोट्यः एकसप्ततिर्लक्षाः अष्टौ सहस्राण्यष्टौ शतानि चतुःषष्ट्यधिकानि ॥ ११ ॥

ते द्विगुणा द्विहीनाः सर्वे ॥ १२ ॥

ते विवक्षितजातिभेदा द्विगुणा द्विहीनाः उक्तादयो विवक्षितजातिपर्यन्ताः सर्वे भेदा भवन्ति। "यथा उत्कृतिभेदाः एव द्विगुणा द्विहीनाः सर्वजातिभेदास्त्रयोदश कोट्यः द्वाचत्वारिंशल्लक्षाः सप्तदशसहस्राः सप्तशतानि षड्विंशत्यधिकानि भवन्ति। यथा वा गायत्र्यां चतुःषष्टिर्भेदा द्विगुणा द्विहीना गायत्रीपर्यन्ताः षड्विंशत्यधिकं शतमुक्तादिजातिभेदा भवन्ति। एवमन्यास्वपि वाच्यम् ॥ १२ ॥

अथ प्रकारान्तरेण अर्धसमसंख्यामाह—

समकृती राश्यूना अर्धसमस्य ॥ १३ ॥

समामिति समवृत्तसंख्योच्यते। तस्य कृतिर्वर्गः। सा राश्यूना समवृत्तसंख्याहीना। अयमर्थः। समवृत्तसंख्यागुणिता समवृत्तसंख्या राश्यूना अर्धसमस्य संख्या भवति। यथा चतुरक्षरसमवृत्तसंख्या षोडश। तत्कृतिर्द्वे शते षट्पञ्चाशदधिके समार्धसमभेदाः। ते राश्यूनाः शुद्धार्धसमस्य संख्या भवन्ति। द्वे शते चत्वारिंशदधिके ॥१३॥

अथ प्रकारान्तरेण विषमवृत्तसंख्यामाह—

"तत्कृतिर्विषमस्य ॥ १४ ॥

तस्याः समकृतेः कृती राश्यूना विषमवृत्तस्य संख्या। यथा—अस्मिन्नेव चतुरक्षरे छन्दसि समकृतिर्द्वे शते षट्पञ्चाशदधिके। तस्याः कृतिः पञ्चषष्टिः सहस्राः पञ्च शतानि षट्त्रिंशदधिकानि समार्धसमविषमसंख्या। अस्यां समार्धसमराश्यूनायां पञ्चषष्टिः सहस्राः द्वे शते अशीत्यधिके ॥ १४ ॥

1) यथोक्तृतिभेदाः पूर्वत्रैव उत्कृतिभेदाः ६७१०८८६४ द्वाभ्यां गुणने १३४२१७७२८ द्विहीना १३४२१७७२६। 2) तत्कृतिरित्यत्र चतुरक्षरसमराशिः १६ चतुरक्षरार्धसमराशिः २४०; द्वयो राश्योर्मिलितयोः २५६ एष राशिः ६५५३६ एतस्मात् पात्यते। ततः चतुरक्षरपादस्य विषमवृत्तस्य प्रस्तारसंख्या ६५२८० रूपा भवन्ति। सर्वगुरु १ द्विलघु १० चतुर्लघु ४१ षट् लघु ९० अष्टलघु ११६ दशलघु ९० द्वादशलघु ४१ चतुर्दशलघु १० षोडशलघु १। अष्टमोऽध्यायः संपूर्णः ॥ इति छन्दोऽनुशासनस्य छन्दश्चूडामण्यपराह्वयस्य पर्यायाः संपूर्णाः। संवत् १६५९ वर्षे वैशाखसुदि १५ दिने लिखिताः ॥ पं० रत्नचन्द्रगणिभिः।

१ समवृत्तसंख्यामाह B. २ द्विकस्यहति D. ३ द्विगुणद्विहीना N; द्विगुण dropped in A. ४ सर्वभेदाः C. ५ द्विचत्वा० लक्षाः BC; द्वाच० लक्ष्याः A. ६ सप्तदश सहस्राणि A. ७ च A. ८ चतु षष्टिभेदाः BN. ९ अर्धसमसंख्या B १० विषमवृत्तसंख्या A.

अथ मात्रावृत्तानां प्रकारान्तरेण संख्यामाह –

विकल्पहतिर्मात्रावृत्तानाम् ॥ १५ ॥

मात्रावृत्ते या गणविकल्पसंख्या सा अन्योऽन्यहता मात्रावृत्तस्य संख्या भवति । सा च यथास्थानं प्रागेवोदाहृता ॥ १५ ॥

अथ मात्राविकल्पानां संख्यामाह –

अङ्कान्त्योपान्त्ययोगः परे परे मात्राणाम् ॥ १६ ॥

अङ्कानामेकद्यादीनां यौ अन्त्यौपान्त्यौ तयोर्योगः परस्परमीलनं परे परे स्थाने न्यस्ता मात्राणां संख्या भवति । यथा – द्वेकयोरन्त्योपान्त्ययोर्योगे त्रयः परस्थाने न्यस्ता-स्त्रिमात्रस्य विकल्पसंख्या । द्वित्रिकयोर्योगे पञ्च परे स्थाने न्यस्ताश्चतुर्मात्रस्य विकल्प-संख्या । पञ्चकत्रिकयोर्योगेऽष्टौ परे स्थाने न्यस्ताः पञ्चमात्रस्य विकल्पसंख्या । अष्टक-पञ्चकयोर्योगे त्रयोदश परे स्थाने न्यस्ताः षण्मात्रस्य विकल्पसंख्या । त्रयोदशकाष्टकयो-र्योगे एकविंशतिः परे स्थाने न्यस्ताः सप्तमात्रस्य विकल्पसंख्या । एकविंशतित्रयोदशयो-र्योगे चतुस्त्रिंशत्परे स्थाने न्यस्ताः अष्टमात्रस्य विकल्पसंख्या । स्थापना – १ । २ । ३ । ५ । ८ । १३ । २१ । ३४ । एवमुत्तरत्रापि ॥ १६ ॥

अथाध्वयोगमाह –

द्विघ्नैकाध्वयोगः ॥ १७ ॥

द्विघ्ना द्विगुणा एकेन रूपेण हीना संख्या अध्वयोगो भूमिमानं भवति । त्र्यक्षरे छन्दसि अष्टौ प्रस्तारः । ते द्विगुणिताः षोडश । तत एकस्मिन् पतिते पञ्चदश । पञ्च-दशाङ्गुलायां भुवि त्र्यक्षरं छन्दः प्रस्तार्यते । एकमङ्गुलं वर्णेनाष्टभ्यते । एकं चान्तरालं चाप्यमानम् । इह च प्रस्तारसंख्ययोरेवोपयोगो नष्टादयस्त्वयधिगमार्थम् । अध्वयोगस्तु पुरुषेच्छानुविधायित्वेन अनियतः । न च क्षेत्रनियमे फलमस्ति इति निरुपयोगः । प्रायोपानुसरणाच्चम्मानिरुक्तः ॥ १७ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ

प्रस्तारादिव्यावर्णनो नामाष्टमोऽध्यायः समाप्तः ॥ ८ ॥

संपूर्णं छन्दोऽनुशासनमिति ।

ग्रंथाग्रं २०५ ॥ उभयग्रं० श्लोकसंख्या ३००८ ॥

परिशिष्टम् ।

जानाश्रयी-छन्दोग्रन्थान्तर्गत-प्राकृतवृत्तवर्णनम् ।

INTRODUCTORY NOTE

Janaśraya is an old work on Sanskrit metres composed by some Pandit at the court of King Janaśraya, who is generally identified with Madhavavarman I of the Viṣṇukuṇḍin dynasty who ruled over the districts of Krishna and Godavari towards the end of the sixth century A D The work consists of six chapters which respectively deal with the Samjñas, the Viṣama Vṛttas, the Ardhasama Vṛttas, the Sama Vṛttas, the Mātra Vṛttas and the Prakīrṇas such as the Prastāra and others The Mātra Vṛttas in the fifth chapter are defined under four different heads or Prakaraṇas, namely, the Vaitāliya, the Mātrāsamaka, the Āryā, and the miscellaneous Among these the last is the most important one for the history of ancient Prakrit prosody it consists of Sutras 45 to 75, which describe about nineteen metres of which eleven are strophic, the others being single ones These are defined and illustrated as Sanskrit metres, but the commentator tells us that they are 'a few *Jātis current among the people* Many of these metres with their names are found in Virahanka's *Vṛttajātisamuccaya* and ought to leave no doubt that they are old metres which properly belong to the Prakrit prosody In the Āryā Prakaraṇa too, there are two or three new varieties, most important among them is the Gītikā which played a very important part in the construction of strophic metres and had retained its peculiarities for a long period during which it was very popular with the poets (as the diminutive termination *ka* in its name suggests), until Hemacandra formally obliterated the difference between it and the Gīti Hemacandra, as a matter of fact, has treated the Gītikā as a kind of the Gīti, giving different names to its three varieties, probably following his great predecessor Svayambhū in this respect

2 I have published this portion of the *Janāśraya*, namely Sutras 39 to 44 from the Āryā Prakaraṇa and 45 to 75 from the last Prakaraṇa, with an exhaustive introduction in the Sārdhaśatābdī Volume of the Bombay Asiatic Society, Bombay 1957 but I am reproducing it here owing to its importance for the Prakrit metres whose origin and development I have tried to trace in the introduction to the present volume of Hemacandra's *Chandonuśāsana* As said in the abovementioned

article, I have generally followed the Trivandrum edition of the work; but now and then I have adopted the readings mentioned in the foot-notes of that edition and given from the three manuscripts on which the edition is based, designated as *La*, *Lha* and *ga*. Where no help could be obtained either from the readings adopted in the edition or from those noted in the foot-notes, I have suggested emendations, showing the readings of the edition (ed.) or of the manuscripts, as the case may be, in the foot-notes. Words or letters newly added by me to complete the sense are shown in the rectangular brackets.

3. *Jānāśrayī* has made use of eighteen different Mātrā or Varṇa Gaṇas for its definitions of metres, employing a double set of symbols to convey them. I have discussed these along with those employed by another work on Sanskrit metres, namely, the Ratnamañjūṣa, in the introduction, paras 3–5. Here in the following portion, only the following are used:–

आ – आकार (सातवत्) = ऽ।; इ – इकार (विभातिह्) = ।ऽ।; ई – ईकार (धीवराश्) = ऽ।ऽ; ह्र – क्कार (विभातिह्) = ।ऽ।; द् – दकार (नचरनिद्) = ।।।, व् – वकार (तेभ्यो क्वच्) = ऽऽ।; भ् – भकार = ऽ; य् – यकार (कमलिनीय्) = ।।ऽ; स् – सकार (गङ्गास्) = ऽऽ; ह् – हकार = ।.

(। signifies a short letter or one Mātrā; ऽ signifies a long letter or two Mātrās.)

4. At the end of the text I am reproducing also the translation of it from the abovementioned article in the Sārdhaśatābdī Volume owing to the somewhat obscure nature of terms employed here. I am thankful to the authorities of the Society for giving me permission to reproduce the portions of that article here.

जानाश्रयी-छन्दोविचिगत-पञ्चमाध्यायसूत्राणि ३९–७५

वामनिकाद्ये पष्ठो ह्रः ॥ ५.३९ ॥

आर्याया आद्येऽप्यर्धे पष्ठो गणो लघुरेव केवलो भवति चेत्, वामनिका नाम भवति।

यथा–

प्रविततताररुकुमुदे गतमेघे शरदि सौम्ये च।
चन्द्रो विभाति संचरति हंस इव नभःसरस्येषः ॥ ५.३९.१ ॥

गीतिरन्त्ये दि वा ॥ ५.४० ॥

आर्याया अन्त्येऽप्यर्धे पष्ठो गणो दकार इकारो वा भवति चेत्, गीतिर्नाम भवति।

यथा—

भ्रमदलिकुल[कल]विरुतप्रविततकमला विभान्ति कमलिन्यः ।
भासुरमरकतमणिनिभकोमलमृदुचारुवर्णसंछन्नाः ॥ ५.४०.१ ॥

ध्रुवोभयोर्नौ ॥ ५.४१ ॥

सैव गीतिश्चतुर्थे गणे यतिरुभयोरर्धयोर्भवति चेत्, ध्रुवा नाम भवति । यथा—

ललनानंनानि नीलालकानि ललितानि [लोलनयनानि] ।
राजन्ति बन्धुजीवाधराणि रतिभोगसारसहितानि ॥ ५.४१.१ ॥

गीतिका सप्तमो यौ वा ॥ ५.४२ ॥

सैव गीतिर्गीतिका नाम भवति सप्तमो गणो यकार ईकारो वा भवति चेत् । यथा—

त्वामिह धैन्यं मन्ये विचित्रधर्मार्थकामसंश्रयासु ।
यस्य चरितं तव मंतं विद्वज्जनवल्लभासु गीतिकासु ॥ ५.४२.१ ॥

क्वचित् तृतीयश्च, पञ्चमोऽपि ॥ ५.४३ ॥

क्वचित् प्रयोगान्तरे उभयोरप्यर्धयोस्तृतीयश्च पञ्चमश्च गणो यकार ईकारो वा भवति । अपि शब्दादेकस्मिन्नप्यर्धे भवति । प्रयोगे यत्नः कार्यः ॥ ५.४३ ॥

पूर्णार्धार्यागीतिः ॥ ५.४४ ॥

सैव गीतिः पूर्णार्धा आर्यागीतिर्नाम भवति । यथा—

एतत्तद्भुजयुगलं मन्दरगिरिभित्तिघट्टिताङ्गदवलयम् ।
अस्ति तुमुलशरपाटितवर्म रुधिररागसंभृतचर्म ॥ ५.४४.१ ॥

इत्यार्याप्रकरणम् ।

आर्याजातिः सोपजातिरुक्ता । इदानीमन्याश्च काश्चिज्जातयो लोके प्रचरन्त्यो वक्ष्यन्ते ।

प्रतिपादं पञ्चार्धं च गलितम् ॥ ५.४५ ॥

पञ्च गणा गणस्यार्धं च पादे पादे भवन्ति चेत्, गलितं नाम भवति । यथा—

न स्मरसि किं त्वदीरित-शर-भासुर-तानाम्,
अटवीषु चोग्र-केसरि-शरभासु-रतानाम् ।
अथवा वसन्तदृष्ट्या निशातदन्तस्य,
प्रीतयेऽधाय शरत्रिशा तदन्तस्य ॥ ५.४५.१ ॥

चत्वारो निर्धायिका ॥ ५.४६ ॥

चत्वारो गणाः प्रतिपादं भवन्ति चेत्, निर्धायिका नाम भवति ॥ ५.४६ ॥

---

१ मरतक ed. २ ललनावनानि ed. ३ धन्यां ed. ४ मनो ed. ५ अस्ति तुमुलसरपातितकर्म ed; (तन्म for कर्म–कग). ६ वसन्तकस्य दृष्ट्या (कग), अथवान्तकस्य सृष्ट्या–Ratnamañjūsā. ७ प्रीता बोधाय Ratnamañjūsā.

यी वान्त्यः ॥ ५.४७ ॥

अन्त्यो गणश्चतुर्णां पादानां निर्घायिकाया यकारो वा ईकारो वा भवति ॥ ५.४७ ॥

क तृतीयः ॥ ५.४८ ॥

तस्याः निर्घायिकायाः प्रतिपादं तृतीयो गणः प्रायेण ककारो भवति। यथा—

वाले बालेन्दुखण्डधारिणा,
क्रोधाद् दग्धोऽपि मन्मथाधमः।
सकलं लोकं हि चण्डमानसो,
निशितैर्बाणैर्भिनत्ति मर्मसु ॥ ५.४८.१ ॥

पञ्च नर्कुटकम् ॥ ५.४९ ॥

प्रतिपादं पञ्च गणा भवन्ति चेत्, नर्कुटकं नाम भवति।

[यी वा द्वितीयतृतीयौ ॥ ५.५० ॥]

तस्येव नर्कुटकस्य द्वितीयतृतीयगणौ यकार ईकारो वा भवतः ॥ ५.५० ॥

तृतीयो र वा ॥ ५. ५१ ॥

तस्येव नर्कुटकस्य तृतीयो गणो रकारो वा भवति। यथा—

उपरि विधूतभस्मनिकरं प्रवरसुरभितं,
श्रवणभुजङ्गवक्त्रमरुता दहनकणमुचा।
धवलितमिन्दुखण्डकिरणैः क्षरदमृतलवैः,
कपिशमयूखभिन्नतिमिरं नयनमयतु यः ॥ ५.५१.१ ॥

इदं "वरं विजृम्भमाणः कुमुदानन्दः,
स तु नवनीतपिण्डसदृशस्तिमिरविमथनः।
रजनिकरोऽप्युपैति शनकैर्गगनं नीलं",
सरस इव [च सरो] नीलं [मु] विपुलं हंसः ॥ ५.५१.२ ॥

षडधिकाक्षरा ॥ ५.५२ ॥

प्रतिपादं षट् गणा भवन्ति चेत्, अधिकाक्षरा नाम भवति ॥ ५.५२ ॥

युङ् न क् ॥ ५.५३ ॥

तस्या अधिकाक्षरायाः प्रतिपादं युग् गणः ककारो न भवति ॥ ५.५३ ॥

क तृतीयः ॥ ५.५४ ॥

तस्या अधिकाक्षरायाः प्रतिपादं तृतीयो गणः ककार एव भवति ॥ ५.५४ ॥

---

८ नकुटकम् ed; (नकुटक-ख, नर्कुटम्-क). ९ भवो ed. १० नर्कुटक-क, ११ निकरप्रवरसुरभित ed. १२ इदं वर एव [वरं] ed. १३ रजनीशो ed. १४ नील ed.

यी वान्त्यः ॥ ५.५५ ॥

तस्या अधिकाक्षरायाः प्रतिपादमन्त्यो गणो यकार ईकारो वा भवति ॥ ५.५५ ॥

क्वचिदाद्योऽपि ॥ ५.५६ ॥

तस्या अधिकाक्षरायाः क्वचित् प्रयोगान्तरे आद्योऽपि गणो यकार ईकारो वा भवति। यथा—

विकसितनीलोत्पलाचितं[14] मदनबाणदीपनं,
भ्रुवंमधुचषकातिशायिनं[15] दयितमुखसमर्पितम्।
सुतनु निषेवितवतो[ऽधरं] तनुतरंगविह्वलं,
न[16] च वागधिकाक्षरा तथा श्रुतिमनोऽभिनन्दिनी ॥ ५.५६.१ ॥

शीर्षकं गीतिकापरा ॥ ५.५७ ॥

सैवाधिकाक्षरा गीतिकापरा भवति चेत्, शीर्षकं नाम भवति। यथा—

विचरन्ति महेन्द्रगोपका नीलशाद्वलश्रियः,
स्तोकं ग्रहचन्द्रभास्करांश्छादयन्ति नीरदाः।
मेघोदैरचारिणी च विलसति तटित् समन्ततः,
प्रणदन्ति वनस्थलीषु मुदितमनसश्च चातकाः ॥
कुटजकुसुमाधिवासिताः[17] लिलिन्धकन्दलवनान्तसेविनश्च।
वान्ति पवनाः प्रवासिनां कुर्वन्ति च सोत्सुकानि मानसानि ॥ ५.५७.१ ॥

एकैकवृद्ध्या ललित-सुभद्रा-विद्रुम-चंशपत्र[18]-कुञ्जर-पुष्पदन्त-मालाः ॥५.५८॥

इत्येवंनामकानि[19] सप्त शीर्षकाणि भवन्ति। तत्र ललितस्य पादः सप्त गणा भवन्ति, अन्ते गीतिका च। सुभद्राया अष्टौ, अन्ते गीतिका च। एवं शेषाणि शीर्षकाणि एकैकवृद्ध्या ज्ञेयानि ॥ ५.५८ ॥

निर्धायिकामध्यं त्रिकलयम् ॥ ५.५९ ॥

उक्तप्रकारं शीर्षकं निर्धायिकामध्यं भवति चेत्, त्रिकलयं नाम भवति। आदावधिकाक्षरा मध्ये निर्धायिका अन्ते गीतिका एवमेतास्तिसस्त्रिकलयमिति ॥ यथा—

विकसितकुसुमं निशागमे [पूर्ण]चन्द्रबोधितं,
संकोचमुपैति पङ्कजं भ्रमरं वेत्र सोत्सुकः।
विनदन्ति मनोहराणि केदारोदरसंस्थिताः,
कान्तासहिता विचिन्त्य किमपि कलहंससारसाः ॥

शाद्वैर्लरुढैरिवेन्द्रगोपकैः,
पुष्पैर्विभान्ति च बन्धुजीवकाः।
शर्वर्य इव [च] विकीर्णतारका,
विकसितकुसुमा विभान्ति शीर्षकाः।
सैंसच्छदमकरन्दमुद्विहाय कुसुमातिपातिलोलुपानि।
मधुकरकुलानि सादरं श्रयन्ति कुमुदानि रेणुपाण्डराणि ॥ ५५९.१ ॥

गणास्त्रयो भङ्गद्विपदी ॥ ५.६० ॥

त्रयो गणाः प्रतिपाद भवन्ति चेत्, भङ्गद्विपदी नाम भवति। गणाधिकारे वर्तमाने पुनर्गणग्रहण चतुर्लघूना पञ्चलघूना च सर्वेषा गणाना चाभेदेन ग्रहणार्थम्। इतरथा हि चतुर्लघूनामेव ग्रहणं स्यात् ॥ ५.६० ॥

चत्वारः पञ्च षट् सप्त वा ॥ ५.६१ ॥

तस्या भङ्गद्विपद्या न केवल त्रय एव गणा भवन्ति। चत्वारो वा पञ्च वा षड् वा सप्त वा भवन्ति ॥ ५.६१ ॥

भान्ते वा ॥ ५.६२ ॥

तस्या भङ्गद्विपद्याः प्रतिपाद गुरुरन्ते भवति वा न वा ॥ ५.६२ ॥

त्रिंशद्धा परमा ॥ ५.६३ ॥

त्रिंशल्लघवो यस्या भङ्गद्विपद्या. सा भवति त्रिंशद्धा परमा अधिका भङ्गद्विपदी। ततः सर्वाभ्यो भङ्गद्विपदीभ्यो या परमा सा त्रिंशद्धा भवति। तदधिका नास्ति ॥ ५.६३ ॥

द्विपदी गीतिकापरा ॥ ५.६४ ॥

सैव भङ्गद्विपदी द्विपदीत्युच्यते गीतिकापरा भवति चेत्। उदाहरणम्—

क्षीणमम्बु वापीषु सरित्सु च सांप्रतं,
रक्ष्यमार्णवबहुधनमिव भाग्यविपर्यये।
तप्तपांसुरेषा च विशुष्कचन्दनद्रुमा,
रज्जचोरमातेव मही परितप्यते ॥
अवसीदति श्रमासहं गात्रं महिषस्य घर्ममूर्च्छितस्य।
बहुपोष्यबालपरिजनं गृहतन्त्रमिवातुर निरुद्यमस्य ॥ ५६४.१ ॥

इयमपरा द्विपदी—

करणाम्र निष्करुणेन वायुना,
रिपुगार[ण] वारणदानगन्धिना।
बहुवल्लभ [बहुभ]विप्रयोजितो,
जनकान्तं जनधरताय कूजते ॥

---

२६ शाद्वैर्लै° ed. २७ सदच्छन्दसन्दं विहाय ed, (-मच्छन्दमविहाय-छग) २८ रक्ष्यमार्ण बहुधनमिह ed. २९ मत एव ed. ३० जनकान्तं ed.

अधुना मधुकरबन्धुना बन्धूकेन सरजस्ककेसरेण।
भवतेव जगद्बन्धुना कुलमण्डन मण्डितानि भूस्थलानि ॥ ५.६४.२ ॥

क्वचिद्विदारी मध्ये ॥ ५.६५ ॥

क्वचिदयोगान्तेर भङ्गद्विपदीगीतिकयोर्मध्ये विदारी भवति। विदारीलक्षणमुत्तरत्र वक्ष्यति। यथा—

अभिनवकन्दलीकुसुमकेसरलोलवरस्थलीमुखाः,
कुसुमितकुटजसुरभिपरागविराजितसानुकाननाः।
समदमयूरमधुरकेकारवपूरितकन्दरोदराः,
ससलिलमुखरजलदमलिना गिरयो रमयन्ति मानसम्॥
केतकसूचिभिदा मरुता,
बकुलरजांसि समुद्वहता।
अभिमुखदयितजनोऽपि जनः,
सोत्सुक एव बलात् क्रियते ॥
अवनुन्नातपरेणुना करेणुनाथमलिनेन तोयदेन।
उपगिरिमुदन्तविद्युता सकलं जगदर्प्यते मनोभवाय ॥ ५.६५.१ ॥

विदारी भान्ताश्चतुर्दश लघवः ॥ ५.६६ ॥

[गुर्वन्ताश्चतुर्दश लघवः] प्रतिपाद भवन्ति चेत्, विदारी नाम भवति ॥ ५.६६ ॥

मिश्रः पञ्चमः प्रायः ॥ ५.६७ ॥

तस्या विदार्याः प्रतिपाद पञ्चमो लघु पूर्वेण वा लघुना परेण वा मिश्रो गुरुर्भवति प्रायः ॥ ५.६७ ॥

उपान्त्ये आ ॥ ५.६८ ॥

प्रायः इति वर्तते। तस्या विदार्या. प्रतिपादमन्त्यस्य समीपे प्राय ओंकारो भवति। अ[न्य]त्रानियमः।

सायसुरभिरजधूसरया, मृदुमलयानिलशपितया।
कामिजनो नवमालिकया, विगलितमानमनाः क्रियते ॥

त्रयोविंशतिर्भङ्गुरासकम् ॥ ५.६९ ॥

भान्ता इति तु वर्तते। गुर्वन्ताश्चयोविंशतिलघवो यत्र मिश्रिता भवन्ति चेत्, भङ्गुरासकं नाम भवति ॥ ५.६९ ॥

---

११ जीमूत—ed. १२ गुटज ed. १३ मधुरकेकया ed १४ उपान्त्या mss; एवान्त्य. ed. १५ एकारो ed. १६ पूरितया ed. १७ यदपि मिलिता mss.

द्वादशावलम्बनम् ॥ ५.७० ॥

[द्वादश लघवः प्रतिपादं भवन्ति चेत्, अवलम्बनं नाम भवति ।]

[सोऽन्ते] ॥ ५.७१ ॥

तस्य प्रतिपादमन्ते प्रायः सैकारो भवति ॥ ५.७१ ॥

उभे रासकम् ॥ ५.७२ ॥

उभे भङ्गुरासकावलम्बने सहिते रासकमित्युच्यते । यथा—

कँथं बाहुमूलत्रिकदेशनिवेशितानि,
गूहसेऽद्य वसनेन किमङ्ग नखक्षतानि ।
लक्ष्मङ्गनालिङ्गनलग्नमनङ्गसाक्षि,
झर्पँलक्ष्मा तव भरति तृतीयमिवेदमक्षि ॥
दशनद[ल]-प्रँचितेन, क्षतजलवारुणितेन ।
शोभितेबँधरेण, त्वमसि विलासधरे[ण] ॥ ५.७२.१ ॥

गाथा ॥ ५.७३ ॥

गाथेदानीं वक्ष्यते ॥ ५.७३ ॥

सार्या ॥ ५.७४ ॥

सा च गाथा आर्येति ज्ञेया । ऋषेरेवेयमित्यार्या । पञ्चसप्तष्टुवादिजगत्यन्तेषु सा गाथा भवति ॥ ५.७४ ॥

पादैश्चतुर्भिः पञ्चिर्वा ॥ ५.७५ ॥

सा गाथा चतुर्भिर्वा पञ्चिर्वा पादैः स्वजातीयैर्वा विजातीयैर्वा भवति । यथा—

पश्यसि पश्यसि परदोषमात्मदोषं न पश्यसि ।
भर्तारमथ धनं च कुलं च हित्वा किं किं हससि ॥ ५.७५.१ ॥
दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान् ।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीतश्च कामी चोरश्च ते दश ॥ ५.७५.२ ॥

इति जानाश्रय्यां छन्दोविचित्यां जात्यध्यायः पञ्चमः समाप्तः ॥

---

३८ चोऽन्ते ed. ३९ चकारो ed. But the letters may even be चोऽन्ते and च्चकारो. ४० क्या ed. ४१ झपजन्मा ed. ४२ दशनदक्षचितेन ed. ४३ शोभितेन बाधरेण ed.

'I regard you fortunate, whose deeds are highly valued in the pretty songs which are dear to learned men and which are based on wonderful (topics pertaining to) Dharma, Artha and Kāma'. 42. 1.

Sometimes, even the third and also the fifth (Gaṇa is so). 43.

Sometimes, in an alternative employment, even the third and also the fifth Gaṇa in both the halves are either *yalāra* (ııs) or *tlāra* (sıs). By the word *api* (it is suggested that) this happens even in one half (only). Efforts should be made for (finding out) such an employment.

When the half is made whole it is called Āryāgīti. 44.

That same Gīti is called Āryāgıti when its half (Gaṇa i. e., the 8th) is made whole. As:-

'This is that pair of arms, whose armlets have been rubbed against the walls of the Mandara mountain, whose armour is torn by the fierce arrows and whose shield is tinged with the redness of blood'. 44. 1.

Here ends the section on Āryā.

The Jāti called Āryā together with its sub-divisions is defined. Now hereafter, some other Jātis which are in vogue among the people shall be defined.

(That metre is called) Galita when there are five and a half (Gaṇas) in every Pāda. 45.

If there are five full Gaṇas and a half of it more, the metre is called Galita. As:-

'Do you not remember the flashes (*bhāsuratā*) of the arrows discharged by you, when they devoured the lives of fierce lions and Śarabhas in the forest ... ... ?

(If there are) four (Ganas in each Pāda) it is Nirdhāyikā. 46.

If there are four Gaṇas in each Pāda it is called Nirdhāyikā.

Its last (Gana) is either y or i. 47.

The last Gaṇa of all the four Pādas of Nirdhāyikā is either *yalāra* (ııs) or *tlāra* (ısı).

It is the third. 48.

The third Gaṇa in every Pāda of that Nirdhāyikā is generally a *lalāra* (ısı). As:-

'The wicked Manmatha (God of Love) of fearful intentions strikes all people with sharp arrows at their vitals, even though he was angrily burnt to ashes by the wearer of the young crescent moon, oh young girl.'

speech containing many letters is not so gladdening to the ear and the mind (as this lip).'

(Note :—The adjectives of *adhara*, which is evidently meant, are intended to be applicable to both the *adhara* and the *madhu*, yet the qualities of the former excel those of the latter, as said in the first adjective in the second line. The blue lotuses in the case of the *adhara* are the dark-blue glances from the half-closed eyes of the girl. In the end, the speaker says that the profuse words of love from the mouth of the fair one are not so delightful as her lower lip when it is in the lover's mouth, though this latter makes her absolutely silent and unexpressive of her love.)

(It is) a Śīrṣaka, when followed by a Gītikā. 57.

If this same Adhikākṣarā has a Gītikā immediately following it, it is called a Śīrṣka. As :—

'The red insects which are the beauty of the green verdure, move about; the rain-clouds slightly cover the planets, the moon and the sun. Now the lightning moving in the interior of the cloud flashes all around and then the Cātaka birds raise their notes in the sylvan regions, with delighted minds.

And then, as soon as the winds begin to blow, surcharged with the fragrance of the Kutaja flowers, gently embracing the tops of the beds of the sprouts of the Sindhra flowers, so soon they make the minds of the journeying lovers uneasy'.

By the addition of one (Gaṇa) each time (are obtained) Lalita, Subhadrā, Vidruma, Vaṁśapatra, Kuñjara, Puṣpadanta and Mālā (Śīrṣakas). 58.

There take place seven Śīrṣakas as named above. Among them, seven Gaṇas make the Pīda of Lalita and there is a Gītikā at the end; eight Gaṇas make that of Subhadrā and a Gītikā at the end. Thus the remaining Śīrṣakas should be known by the addition of one Gaṇa every time.

It is a Trikalaya when it has a Nirdhāyikā in the middle. 59.

If the Śīrṣaka as described above has a Nirdhāyikā in the middle of it, it is called a Trikalaya. Thus in short, first an Adhikākṣarā, then a Nirdhāyikā in the middle, (and) finally a Gītikā at the end, these three form a Trikalaya. As :—

'At the advent of the night, the day-lotus which had its flower open, now closes itself, being oppressed by the full moon. This bee has

become uneasy. The Kalahaṁsas and the Sārasas accompanied by their mates, raise their pleasant voices, being stationed in the inside of the Kedāras and thinking about something.

Here, the Bandhujīvaka trees appear very charming with their flowers looking like the Indra-gopa insects mounted upon the green verdure. There, the Śirṣaka plants with their open flowers resemble the nights bespangled with stars.

The swarms of bees, having left behind them the juice of the Saptacchada flowers and being extremely greedy, after neglecting (other) flowers, fondly resort to the night lotuses, turned whitish with their pollen. 59. 1.

Three Gaṇas (make a Pāda of a) Bhaṅga-dvipadī. 60.

If there are three Gaṇas in each Pāda, it (i. e., the metre) is called Bhaṅgadvipadī. The mention of a Gaṇa again (in the Sūtra), even when the governing word *gaṇa* is still available (from Sūtra 15), is meant for the adoption of all the Gaṇas, whether the Caturmātras or the Pañcamātras, without any distinction. Otherwise, the Caturmatras alone (which are meant by the word *gaṇa* in Sūtra 15) would have been available.

Or four, or five or six or seven (Gaṇas make its Pāda). 61.

Of that Bhaṅga-dvipadī, there are not merely three, but also four, five, six or even seven Gaṇas.

A bh (i. e., a long letter) stands optionally at its end. 62.

Of that Bhaṅga-dvipadī, a long letter may or may not be at the end of every Pāda.

The longest (among them) contains 30 h (i. e., short letters). 63.

That Bhaṅga-dvipadī which has thirty short letters (i. e., Mātrās) is the last, the longest, among them. Hence the one which is longer than all the other Bhaṅga dvipadīs, contains thirty Mātrās. There does not exist any which is longer than that. *Note h* or a *laghu* signifies both a short letter and an akṣara Mātrā; see Introductory, Note, para 3.

It is (called) a Dvipadī, when a Gītikā follows it immediately. 64.

That same Bhaṅga-dvipadī is called Dvipadī, if it is immediately followed by a Gītikā. Illustration :—

'The water in wells and rivers is now exhausted like the ample treasure, though well protected, at the (evil) turn of one's fortune.

And this earth, with the forest trees completely dried up and its dust well heated, pines away like the mother of an imprisoned thief.

The body of the wild buffalo, who is oppressed by heat, droops down, being unable to bear any exertion, like the troubled household affairs, which require the feeding of many children and dependents, in the case of an idle man.' 64. 1.

Here is another Dvipadī :–

'By the ruthless breeze, which moves about being charged with the odour of the elephant's rut, are tortured the persons who are separated from their dear ones, today, oh compassionate one, oh conqueror of your enemies, oh lord of many beloved ladies and beloved of your people !'

(Note : Every line begins with a vocative).

Now are the spots on the earth adorned by the Bandhūka flower, whose filaments are covered with pollen and which is a friend of the bees, as they (i. e., spots) are adorned by you, who are the friend of the world, oh ornament of your family'. 64. 2.

Sometimes a Vidārī is (put) between (the two). 65.

Sometimes, in a different employment (of the metre), a Vidārī is placed between the Bhaṅga-dvipadī and the Gītikā. The definition of a Vidārī (the author) will give later. As :—

'The mountains, looking darkish owing to the water-filled thundering clouds, please the mind, as they have their lovely table-lands looking wavy owing to the filaments of the fresh flowers of the Kandalī plants, their topmost forests overspread with the fragrant dust of the flowering Kutaja plants, (and) the interiors of their caves filled with the sweet notes of the impassioned pea-cocks.

A (loving) person, though his beloved mate is in front of him, is yet made uneasy by the breeze, which is opening the Ketaka buds and wafting with itself the pollen of the Bakula flowers.

The whole world is worshipfully offered to the god of love by the rain-cloud, which is dark like the lord of a she-elephant, which has dispersed the day-light resembling the dust, and which is prominently displaying its lightning, in the vicinity of the mountain.' 65. 1.

Vidārī (is a metre, where) there are fourteen short letters (i. e., Mātrās, in a Pāda) with a long letter at the end. 66.

If there are fourteen Mātrās (the last two consisting of a long letter) in a Pāda, the metre is called Vidārī. 66.

The fifth (Mātrā) is usually combined (with either the fourth or the sixth). 67.

Of that Vidārī, in every Pāda, the fifth short i. e., Mātrā, is generally combined either with the earlier Mātrā or with the following one, so as to form a long letter. 67. *Note*: *Laghu* is an Akṣara Mātrā, see note on 63.

The penultimate (Gaṇa) is ā. 68.

The word *prāyaḥ* continues. Of that Vidārī, in each Pāda, there is generally, the *ālāra* (i. e., sII) as the penultimate (Gaṇa). There is no rule about the others. 68.

'A passionate lover has her mind dispossessed of pride by the Navamālikā creeper, which is dusky with the fragrant pollen of the evening and which is shaken by the gentle breezes from the Malaya mountain'. 68. 1

Twenty-three (Mātrās make the Pāda of) a Bhaṅgurāsaka. 69.

The word *bhāntāḥ* still continues. If in a Pāda twenty-three Laghus i. e., Mātrās, with a long letter at the end, are mixed up in any way, it is called Bhaṅgu-rāsaka. 69.

Twelve (Mātrās) (Make the Pāda of) an Avalambana. 70.

If there are twelve Laghus i. e., Mātrās, in each Pāda, (the metre) is called Avalambana.

s stands at the end (of the Pāda). 71.

At the end of each Pāda, there is generally a *salāra* (ss). 72.

The two together make a Rāsaka. 72.

The two namely, the Bhangu rāsaka and the Avalambana, together make a Rāsaka. As :—

'Why, how do you conceal by your garment, the nail-marks placed at the base of your arms and at the Trika (by your lover)? The fish-banner god is bringing you a third eye, as it were, which is the witness of Cupid and * * * *. You are as it were adorned with this your lower lip, which is graceful, slightly reddened with the drops of blood and thickly marked with the tooth bites (of the lover)'. 72. 1.

Hereafter the Gāthā. 73.

The Gāthā shall hereafter be described.

It is Ārṣī. 73.

And that Gāthā is to be known as Ārṣī (i. e., archaic or irregular). It is called so, because it belongs to the Ṛṣi alone (and so

must not be employed by the ordinary poets of today). That Gāthā is found in any of the five Jātis beginning with the Anuṣṭubh and ending with the Jagatī.

It is (endowed with) four or six Pādas. 75.

That Gāthā appears with four or six Pādas, either of the same or of the different types. As:-

'You see the faults of others every now and then; but you do not see your own fault. Why do you laugh after abandoning your husband, property and family? 75. 1.

The following ten do not understand Dharma, oh Dhṛtarāṣṭra; know them. They are:- The proud, the intoxicated, the mad, the exhausted, the wrathful, the hungry, the man in haste, the frightened, the passionate and the robber; these are the ten.' 75. 2.

Thus ends the fifth chapter, dealing with the Jātis, in the Jānāśrayī Chandoviciti.

I. Index of Sūtras.

अङ्कान्त्योपान्त्ययोगः	8.16	आद्यमन्त्येन हतम्	8.7
अजमुखश्चीर्गन्तो	3.65	आद्ययोः पची	5.39
अजश्चूस्तृतीयपञ्चमौ	5.2	आद्ये तृतीये चिदौ	5.34
अतिजगत्यां नतिगा	2.194	आद्येऽर्धे उदः	4.15
अतिधृत्यां म्सौ ज्सौ	2.321	आभिर्बहुरूपा	5.22
अतिशक्वर्यां-रजसस्या	2.242	आसां तृतीयस्य	5.23
अलष्टौ यन्नरभलगाः	2.286	उक्तायां गः श्रीः	2.6
अत्युक्तामध्याप्रतिष्ठा	2.4	उत्कृतौ मौ तो	2.376
अत्युक्तायां गौ स्त्री	2.7	उत्साहादिना येनैव	5.40
अथ प्रस्तारादयः	8.1	उद्दिष्टेऽन्त्याल्लात्	8.6
अथ प्रायोऽपभ्रंशे	5.1	उपगीतं तजैः	7.44
अनुष्टुभि त्रौ गौ विभा	2.72	उपान्त्यलोना	4.67
अनुष्टुभि नाद्यात्त्रौ	3.33	उभे विषमा	4.45
अन्तरसमा एव द्वितीय	6.21	उष्णिहि मौ गो	2.52
अन्ते च	3.42	एकाक्षरोक्ता जातिः	2.3
अन्त्येऽत्वात्	4.16	एकोऽष्टाक्षरः पादः	3.40
अन्ययापि	4.87	एतयोः परयोश्च	2.156
अन्यद्वितानम्	2.87	एदोतौ पदान्ते	1.10
अन्यद्विपमम्	1.15	एभिः पादाकुलकम्	3.70
अभिकृतौ भ्मस्भनीगाः	2.372	एषैव नीपरतः	2.386
अभिनव तजैः	7.48	ओजजा चारुहासिनी	3.60
अयुज्याद्यलाद् गः	3.57	ओजजा पश्चिमान्तिका	3.63
अर्धयोर्वा	3.30	ओजयुजोः	3.1
अष्टोपजातिः	6.16	ओजयुजोश्छडा रासः	5.16
अष्टौ कला वसुद्विपदी	7.63	ओजे चौ युजि पचौ	3.62
अष्टौ नत्रा भौ गो	2.263	ओजे विपरीतादिः	3.35
आकृतौ भ्रौ त्रौ त्रौ	2.353	ओजे षण्मात्रा लगन्ताः	3.53
आदौ पश्चित्रलेखा	4.79	× क × प विसर्गानुस्वार	1.7
आद्यचियतिः पद्या	4.3	कडमकान्ते प्रारब्धार्यो	6.3
आद्यमेदानधोऽधो	8.9	कामिन्याद्या व्यत्यये	3.25

कुङ्कुमकेसरं तजैः	7.40	चतुष्पदी वस्तुकं वा	6.18
कृतिः प्राविसमभ्युदथ	2.5	चतौ खरद्विपदी	7.61
कृतौ भौ भौ यौ	2.334	चत्वारिंशत्कला एक	7.57
क्रमवृद्ध्योर्द्व्यसमुपात्	4.20	चपचापचाल्गा माला	4.38
खञ्जकं दीर्घीकृतं	1.84	चपजगगाः कुसुमः	5.15
गन्तचः पचुपाः	4.40	चपजाया अवतंसकः	5.5
गन्तारनालम्	4.66	चपदाश्वातौ वा	6.26
गलितमेगायमकं	4.49	चपाचल्गा दर्दुरः	5.10
गायस्यार्धार्धं समैथैः	4.90	चपाचागा इन्द्रगोपः	5.8
गायात्रानुक्तम्	7.73	चपाचाल्गाः कोकिलः	5.9
गायार्धेऽन्त्यगात्	4.18	चपाचीपाः प्रसृता	4.41
गायिनी	4.21	चपौ जंभेट्टिका	7.67
गाने चिदौ झम्बटकम्	5.42	चयोर्गाथः	4.19
गान्तं पवनोद्धुतम्	4.75	चरजमगा आमोदः	5.11
गान्तं पुष्पितामा	3.16	चलदलाश्चन्द्रलेखा	7.65
गायत्र्यां भौ सावित्री	2.33	चस्र यो मत्तकरिणी	5.21
गीतिः सप्तमे पे	4.9	चादिः कुसुमिता	4.63
गीतिस्कन्धके संकीर्णम्	4.17	चापचपदा ललिता	4.44
गीत्यन्तावलम्बकौ	4.85	चाभ्यां पाभ्यां पाद्धा	4.76
गीर्गीर्विद्युन्माला	2.74	चितौ पचपा वा	6.30
गौ चेद्वाणिनी	2.299	चिपताः क्रीडनकम्	4.69
ग्मध्ये द्वितीयतुर्यौ	4.5	चिपौ षचाता वा	6.32
ग्युपचित्रा	3.66	चीः पद्धडिका	6.31
ग्लावधोऽधो द्विर्द्विरितः	8.3	चीगौ सुमङ्गला	4.52
ग्लावशोकपुष्पमञ्जरी	2.398	चीनींजे जो जो लीर्वान्ते	3.73
ग्लौ दुःखम्	2.9	चुपौ युग्म जो	4.77
घटैश्चित्रलेखा	2.303	चुर्दो नौजे जो	4.42
चः पौ चौ तः समात्	4.31	चुल्गा वा	5.4
चः पौ जो गो कुन्दः	5.6	चूडामणिर्दजैः	7.25
चतुरंहावोजे यथौ	5.36	चूपगा विनता	4.59
चतुष्पञ्चषट्सप्ताष्ट	4.83	चूपौ गरुडपदम्	7.7
चतुष्पदी कला ओजे	6.19	चूरुमात्	4.35

चूपचताश्चपलम्	7.49	जिगावुपिता	2.116
चूपौ चावमृतम्	7.50	जीमौक्तिकदाम	2.172
चृगौ पष्ठे जो	4.1	जैः पतौ पदौ	6.5
चृतौ कुङ्कुमतिलकावली	7.14	जो गौ सती	2.27
चृता छद्मणिका त्रजैः	7.17	ज्गौ विलासिनी	2.17
चृदौ हरिणीकुलम्	7.9	ज्भौ स्जौ गो	2.198
चृपावायामकम्	7.22	ज्रज्रज्गाः पञ्च	2.278
चृ लयः	7.4	ज्रज्रा विभावरी	2.184
चृपौ सुभगम्	7.32	ज्रौ गः सुभद्रा	2.67
चृः स्कन्धकसमम्	7.18	ज्रौ स्जौ गो मञ्जु	2.206
चृतौ कन्दोट्टम्	7.36	ज्रौ ल्गौ प्रमाणी	2.82
चृदौ खमकम्	7.27	ज्सजस्यल्गाः पृथ्वी	2.287
चृपौ गोन्दलम्	7.45	ज्सज्सा जलोद्धत	2.169
चूर्णन्तो मुग्धात्	4.34	ज्सौ गः कुमार	2.54
च्लदायतिदीर्घं ढजैः	7,55	ज्सौ ज्सौ यिल्गा	2.364
च्लदौ सिंहपदम्	7.51	ज्सौ नौ गौ राज	2.229
च्ल बालभुजंगम	7.41	ज्सौ स्यौ कोलः	2.193
चेऽष्टमे स्कन्धकम्	4,13	ञैः पतौ तिः पचौ वा	6.6
चो गीर्नटचरणं	3.71	ञैथादौ पचौ पौ वा	6.7
चो विजया	7.58	टैश्चपदं पचदं	6.8
चौ करिमकरभुजा	7.64	ठैश्चपतं पचदं	6.9
चौ गौ चो गौ नृत्तगतिः	3.72	डैः पातौ चापौ	6.10
चौः दः शशाङ्कवदना	6.25	ढैश्चिदौ पचचं वा	6.11
चौ पः खण्डम्	4.53	णैश्चितौ पिर्त्रा	6.12
चौ पः समः	4.29	त उपवदनकम्	5.29
चौ लान्ततौ चौ	5.24	तच्चरी ढजैः	7.47
छन्दः	2.1	तच्चरभा घचैः	2.240
जगस्रा तौ त्रविन्द्रवज्रा	2.158	तच्छेष्ठे ल्युपात्	4.11
जतजा गावुपेन्द्रवज्रा	2.155	तत्रगा मस्जगगा	3 6
जतत्रा वंशस्थम्	2.159	तत्रा: शुद्धविराट्	3.50
जस्त्रागावुपस्थितम्	2.134	तत् फाग्वीदाम त्रजैः	7.23
जातीकलापर्षे	4.23	तत्रतीर्विषमस्थ	3.14

तत्कोकिलकं	2.298	ते द्विगुणा द्विहीनाः	8.12
तत्राष्टांह्रावोजे चिदौ	5.33	ते पिण्डिताः संख्या	8.10
तत्संगीतं ढजैः	7.43	ते मिश्रे प्रवृत्तकम्	3.58
तत्सुरस्त्रीडितं ठजैः	7.38	ते यमितेऽन्तेऽडिला	5.30
तदादौ द्विगं सर्वलं	3.41	ते रत्नकण्ठिके ठजैः	7.15
तदोजे चतौ मुखात्	4.32	तैः पचादं चीर्वा	6.13
तद्गीतिसमं नजैः	7.10	तो जौ ग उपस्थिता	2.120
तद्दीर्घकं ढजैः	7.52	तो जौ गावुपस्थिता	2.133
तद्युजोर्जः पथ्या	3.34	तो जौ ल्गौ मोटनकम्	2.147
तद्वाराक्रान्तं ठजैः	7.35	तो नौ ल्गौ मुख	2.149
तद्वृजंगविक्रान्तं ठजैः	7.28	तौ चस्रौ विलासिनी	4.60
तन्मा मकरलता	2.102	तौ चितगाः खञ्जकम्	4.50
तन्मौक्तिकदाम ठजैः	7.19	तौ चितौ मञ्जरी	4.61
तभजलगा उत्थापनी	2.148	तौ जो गावित्युवक्त्रा	2.154
तम्या रुचिरा	2.100	त्गौ सोमप्रिया	2.22
तपताः पुष्पमाला	7.72	त्जसस्याः शिशुः	2.259
ता गौ कामबाणः	2.399	त्गा मधुकरिका	2.65
ताजगगा जतजगगा	3.8	त्भौ जौ गो अभ्रकम्	2.215
ताज्लगाः शङ्खः	2.360	त्भौ जौ गौ वसन्तः	2.231
ताभिर्लक्ष्मिका	4.82	त्भौ जौ रो मृदङ्गः	2.261
तारास्रुवकं ढजैः	7.29	त्भौ ज्भौ ज्भौ ल्गौ	2.344
ताल्लिता	2.175	त्भौ स्जौ गो लक्ष्मीः	2.214
तिर्गौ लयग्राह्वि	2.129	त्यौ तनुमध्या	2.36
तीः कामावतारः	2.167	त्यौ य्यौ पुष्पविचित्रा	2.189
तीचौ मुक्तावली	4.46	त्यो भौ नीगौ हंसपदा	2.374
तुर्यान्नतभ्रम्साख्तद्विपुला	3.39	त्रयल्गा विभ्रमः	5.14
तुर्योऽशः पादोऽविशेषे	1.11	त्रयोऽप्यवलम्बकः	4.56
तृतीयषष्ठ्योर्दशादि	6.15	त्रिभिरन्यैरपि	4.89
तृतीयस्य [illegible] तो मत्त	5.19	त्रिर्सौ गो रतिलीला	2.326
तृतीये पञ्च [illegible] जेषे तयोर्वा	5.20	त्रिष्टुभि भौ रो गौ	1.127
तृतीये लक्षिता [illegible] ला यद्	4.10	त्रिष्वप्यन्त्यचस्य ते	4.74
तृतीये षष्ठे त्युपे	4.26	त्री नौ रत्नरंगः	2.352

त्री नौ र्गाश्चित्रकम्	2.362
त्रौ जला	2.47
त्रौ भौ ज्भौ रः कथागतिः	2.346
त्रौ लगौ नाराचम्	2.78
त्र्यादिर्गादिः	1.17
त्सौ गो भ्रमरमाला	2.57
त्लगा नन्दा	2.28
थैः पचातं चिपौ वा	6.14
दशाला वृत्तम्	2.335
दाचदालदाचदालि	7.2
दामात्रा नो रासको	5.3
दीर्घप्लुतौ	1.8
देवगानं फुल्लडकम्	5.41
द्वयोरर्धसंकरे संकीर्णम्	5.27
द्वयोर्व्यत्यये उद्गीतिः	4.8
द्वादश ना ल्गौ ललित	2.384
द्वादशश्च वानवासिका	3.69
द्वाभ्यां भद्रिका	4.11
द्विः पूर्वार्धे गीतिः	4.6
द्विगमापीडः	3.43
द्विमानेकाध्वयोगः	8.17
द्वितीये तुर्ये तयोर्वा	5.18
द्वित्रिचतुःपञ्चषट्कला	1.3
द्वित्रिचतुर्भिर्लक्षणैर्मिश्रा	6.22
द्विपदी	7.1
द्विपद्यन्ते गीतिर्द्विभङ्गिका	4.86
द्विपदवलम्बकान्ते	4.88
द्विर्भजसना म्यौ	2.383
धनलमष्टपट्चतुष्पात्	5.32
धूलां मम्या रौ	2.300
धृगर्यां छैः कलाभिः	6.4
नः स्मौ तौ गौ पद्मम्	2.294
नग्म्यामष्टादिराः	2.390
नजभाजिम्जलगाः	2.380
नजिर्गा वा	2.277
नजौभ्रा वनमञ्जरी	2.351
नज्गागास्त्वरितगतिः	2.112
नज्यगा विपुलभुजा	2.125
न ज्याः शशिलेखा	2.103
नभज्याः कलहंसा	2.160
नभभ्रा द्रुत	2.163
नभभ्रा नभिरा	3.12
नभ्रसा जौ गः	2.331
नम्रसलगाः सिंहः	2.228
नवकदलीपत्रं ढजैः	7.20
नवमश्च चित्रा	3.68
नवरङ्गकं तजैः	7.30
नवावजातिः	6.17
नश्चपला	3.36
नष्टाङ्के गणैर्हते	8.5
नष्टेऽङ्कस्य दले	8.4
नस्रा गावशोका	2.152
नसम्यलगा रोहिणी	2.295
नस्या विशाला	2.101
नाद् गौः	2.257
नाद्धंसगतिः	2.361
नाद् भस्राः प्रियंवदा	2.174
नाम्यां पञ्चमात्रैरुत्कलिका	2.401
नाम्यां स्वधादयः प्रचितः	2.389
नारल्गा नजभ्रा	3.15
नार्द्ध चण्डवृष्टिः	2.387
निगौ निलया	2.115
निजल्गा ललितपदं	2.272
निसौ हीः	2.192

नीगौ त्वरितगतिः	2.219	नौ म्रौ गः क्षमा	2.203
नीर्गावुपचित्रम्	2.231	नौ म्रौ ततं	2.165
नीसभिगा हंसलयो	2.373	नौ र उपच्युतम्	2.95
नीसौ शशिकला	2.243	नौ रगा भद्रिका	2.143
नुगौ चलधृतिः	2.268	नौ रीर्निशा	2.314
नुर्गौ वसुधारा	2.296	नौ रूर्मेघमाला	2.367
नुलावचलधृतिः	2.269	नौ रो यौ भोगिनी	2.258
न्लगावतिरुचिरा	3.31	नौ रौ प्रमुदित	2.181
न्लगा न्लगौ शिखा	3.28	नौ र्यौ कामदत्ता	2.187
न्लगाश्च	3.32	नौ र्यौ गश्चन्द्रिका	2.205
नो जौ भौ कल	2.255	नौ सो गौ वृन्ता	2.139
नो जौ लगौ सुमुखी	2.145	नौ सो लघुगुणमणि	2.104
नो मौ मः सौ लगौ	2.337	नौ सौ गः कमलाक्षी	2.218
नो रिर्मेघावली	2.188	नौ सौ यौ पङ्कजवक्त्रा	2.315
नो रौ बृहतिका	2.89	नौ सौ ललितम्	3.47
नौ गो हरिविलसितम्	2.63	नौ स्त्रौ न्सौ तृतीये	3.49
नौ गौ रतिमाला	2.86	न्गौ मृगवधूः	2.19
नौ तभ्रा उपमालिनी	2.248	न्जज्या नीगौ चपलम्	2.375
नौ तौ गः कुटिल	2.202	न्जज्यास्तामरसम्	2.183
नौ तौ गौ वसन्तः	2.224	न्जभजिराः सिद्धिः	2.350
नौ त्रौ गः क्षमा	2.200	न्जभभ्राः प्रभद्रकम्	2.253
नौ त्सौ गो गौरी	2.213	न्जभ्जजा लगावितथम्	2.297
नौ भौ त्रौ न्यौ ललित	2.366	न्जभ्जर्गा वाणिनी	2.276
नौ भौ लगौ प्रहरण	2.222	न्जभ्जलगा धृतिः	2.235
नौ भ्रावुज्ज्वला	2.166	न्जौ त्रौ गः सुवक्त्रा	2.195
नौ मो भुजगशिशु	2.91	न्जौ त्रौ मालती	2.180
नौ मो रौ चन्द्रोद्योतः	2.247	न्जौ न्सौ गो मद	2.211
नौ मौ यौ चन्द्रमाला	2.307	न्जौ न्सौ भनिलगा	2.379
नौ म्तौ भौ ललितम्	2.308	न्जौ भ्यौ नवमालिनी	2.179
नौ म्यौ पुटो	2.164	न्जौ लगौ ललितगतिः	2.80
नौ म्यौ यो मालिनी	2.246	न्भन्ता गौ शरभ	2.239
नौ म्यौ लगौ करि	2.223	न्भौ जिगौ मङ्गल	2.270

न्यनद्गाः कमल	2.150
न्यमा गौ पतिता	2.140
न्यौ गः कुमुद्वती	2.68
न्यौ न्यौ कुसुम	2.168
न्यौ भ्रौ निसौ	2.370
न्यौ शशिवदना	2.39
न्रज्गा मनोरमा	2.119
न्रन्रग्गाः सुकेसरम्	2.233
म्रौ गो मनोज्ञा	2.70
म्रौ ग्गा सुमालती	2.76
म्रौ शफरिका	2.43
न्लगा अभिमुखी	2.32
न्सौ गौ गुणलयनी	2.84
न्सौ जौ गो लयः	2.208
न्सौ तो गो विद्युन्	2.209
न्सौ मौ यावनङ्गलेखा	2.312
न्सौ म्रौ भ्रौ हरिणीपदम्	2.318
न्सौ म्रौ स्लौ गो हरिणी	2.293
न्सौ रौ गश्चन्द्र	2.207
पङ्क्तौ मभस्गा	2.107
पचपचपा महा	4.51
पचौ ध्रुवकम्	6.24
पचौ लवली	7.68
पतौ मदनविलसिता	7.66
पदावप्सराः	7.62
परार्धमुपगीतिः	4.7
पाचदाश्चित्स्तृतीये	5.17
पाचाजगाः करभकः	5.7
पादः	2.2
पिचौ रतिवल्लभः	1.47
पिदावुत्पक्षः	5.31
पूर्वेऽर्धे मुगौ	3.51
पो रेवका	7.59
पौ चपौ हारावली	4.48
पौ चारुः	7.71
पौ चौ तो गलितकं	4.25
पौ चौ पो वेः	4.28
पौ तः सुन्दरा	4.36
पौ तौ भूषणा	4.37
पौ मल्लिका	4.80
प्रकृतौ म्रौ भौ यिः	2.345
प्रतिष्ठायां म्गौ कन्या	2.15
प्राक्कल्पाद्यगोऽधो	8.2
बृहत्यां भो मौ	2.88
भगगान्ता आपातलिका	3.55
भजसा उदयम्	2.92
भत्नगा मृगचपला	2.122
भत्ना गौ श्रीः	2.132
भा गौ भुजंगविलासः	2 400
भातलगा न्जन्सगा	3.18
भिगगा नजज्या	3.5
भिगौ चित्रगतिः	2.114
भितनिसा द्रुतलघु	2.369
भिम्भसा मणिमाला	2.301
भिर्गौ दोधकम्	2.130
भीः स्लौ शरमाला	2.264
भीगावङ्गरुचिः	2.196
भीन्या भङ्गिः	2.319
भीरसलगा नन्दकम्	2.341
भुगौ संगतम्	2.265
मृगौ मदिरा	2.355
भूः सुभद्रम्	2.368
भो गौ पङ्क्तिः	2.25
मो नौ स्लौ निलगा	2.378

भौ गः कलिका	2.59	मत्ना यिः कुसुमित	2.302
भौ गौ चित्रपदा	2.75	मल्लनीगा वरतनुः	2.356
भौ र उल्लुकम्	2.93	मध्यमार्या मो नारी	2.11
भौ रसल्गा दर्दुरकः	2.236	मनूसगगा अपवाहो	2.377
भ्नौ सुमुखी	2.16	मन्यगाः पणवो	2.110
भ्नजद्वौ स्खलितम्	2.237	मभता गौ वातोर्मी	2.136
भ्नौ गः शारदी	2.64	मभन्यल्गा हारिणी	2.292
